पुण्य के निवासस्थानभूत पुरुष ज्ञानदान करते हैं और वैसे ही–पुण्यशाली–पुरुष उसको ग्रहण करते हैं । जो ऋषि तपश्चर्या में तत्पर हैं वे औषधदान और आहारदान के पात्र हैं तथा क्लेश को प्राप्त व दीन-दरिद्री लोग भी आहार व औषधदान के पात्र होते हैं । अतिशय लोभी जन के द्वारा कल्पित अन्य दानके–भूमि आदि के दान के–पात्र अन्य कितने ही मनुष्य होते हैं । परंतु जो अभयदान देनेवाला है उसके लिये सर्व ही जीव लोक पात्र होता है । अर्थात् वह सब के लिये अभयदान दिया करता है । इससे अधिक और क्या कहा जाय? ॥ २४ ॥

आलस्य से अथवा कृपणपने से आहारदान के देने पर जीव को वैसा दुःख नहीं होगा

२३) 1 विना. 2 गुरोः सकाशादपरो नाराधनीयः 3 D °नैर्ग्रन्थात्. 4 जगति. 5 प्रोक्तः । २४) 1 प्रयच्छन्ति, दापयन्ति. 2 पुण्यनिवासाः 3 भेषज्याहारयोग्या भवन्ति. 4 सुवर्णादिदानस्य. 5 रचितस्य. 6 योग्या भवन्ति. 7 दातुः. 8 अभयदानं विना । २५) 1 P° यथा. 2 भये दत्ते सति. 3 भयेन. 4 निरन्तरम्. 5 यत्नः कर्तव्य ;

86) मुक्ता विमुक्तिसुखसागरसंनिमग्नाः
संसारिसत्त्वनिचया विषयो ऽस्य[1] सो ऽपि[2]।
संभिद्यते[3] ऽचरचरप्रविभागतस्तु[4]
पृथ्वीजलज्वलनवातवनस्पतीति[5] ॥ २६
87) अचरश्चरित्रनिलयैः[1] पञ्चविधो ऽयं जिनैर्गणो ऽवादि[2]।
द्वित्रिचतुःपञ्चकरणनाम्ना तु चरः[3] समाम्नातः[4] ॥ २७ । युग्मम् ।
88) जीवस्थानैर्गुणस्थानैस्तथा संज्ञोपयोगतः।
मार्गणाप्राणपर्याप्तिभेदैर्जीवा अनेकधा[1] ॥ २८
89) जीवराशिरिति प्रोक्तः पालनीयः प्रयत्नतः।
सुदृशा[1] वापरेणापि सर्वदा निजजीववत् ॥ २९
90) प्रेष्या[1] दारुणदुःखदूनमनसो[2] दीना दरिद्रास्तथा
मूकान्धा बधिरा नरा बहुविधव्याधिव्यथाविह्वलाः।
देहीति प्रगिरः[3] प्रसारितकरा एवंविधा यद् ध्रुवं
तद्धिंसाद्रुमपुष्पमेतदपरं[4] प्राप्स्यन्त्यपूर्वं[5] फलम् ॥ ३०

जैसा कि आलस्य से या कृपणपने से भय के देने पर होता है। इससे निश्चयतः उसका नरक में पतन होता है। इस लिये स्वहित में तत्पर रहनेवाले भव्य जीवों को सर्व कुभावों को छोड-कर प्राणियों के लिये अभयदान देने में प्रयत्नशील रहना चाहिये ॥ २५ ॥

मुक्त जीव मोक्ष मुख के समुद्र में निमग्न हो चुके हैं–उन्हें इस अभयदान की आवश्यकता नहीं रही है। जो संसारी प्राणियों का समूह इस अभयदान का विषय है उसके अचर (स्थावर) और चर (त्रस) ऐसे दो भेद हैं। उनमें चारित्र के स्थानभूत जिनदेव ने पृथ्वी, पानी, अग्नि, वायु और वनस्पति इस पाँच प्रकार के प्राणिसमूह को अचर तथा द्वीन्द्रिय, त्रीन्द्रिय, चतुरिन्द्रिय और पंचेन्द्रिय प्राणियों को नाम से चर माना है ॥ २६–२७ ॥

जीवसमास, गुणस्थान, आहारादि संज्ञाएँ, उपयोग, गत्यादिक मार्गणाएँ, प्राण और पर्याप्ति इन भेदों से जीव अनेक प्रकार के हैं ॥ २८ ॥

इस प्रकार से जो यह जीवराशि कही गई है उसका संरक्षण सम्यग्दृष्टि तथा इतर को–मिथ्यादृष्टि को–भी अपने ही जीवन के समान सदा करना चाहिये ॥ २९ ॥

भयंकर दुःख से दुःखित मनवाले जो दीन, दरिद्री, गूंगे, अन्धे, बहरे, अनेक व्याधियों

२६) 1 संसारस्य [अभयस्य]. 2 सोऽपि संसारिसत्त्वनिचयः. 3 भेदवान् भवति. 4 स्थावरत्रस. 5 अचरः स्थावरः। २७) 1 स्थावरः. 2 ऊचे. 3 द्वीन्द्रियादयः. 4 कथितः। २८) 1 बहुप्रकाराः कथिताः। २९) 1 सम्यग्दृष्टिना। ३०) 1 PD °प्रेष्या, किङ्कराः. 2 पीडितचित्ताः. 3 भिक्षुकाः. 4 अवाङ्मनोगोचरम्. 5नारकम्।

91) वैधव्यं[1] कुचकुम्भरम्यरमणीवर्गे हि यज्जायते
दौर्भाग्यं प्रणते[2] विपन्निरुपमे[3][4] मृत्युस्तथा यौवने ।
यन्नार्या[5] अनपत्यता[6] यदपरं जाता म्रियन्ते प्रजा–[7]
स्तद्धिंसाविषवल्लिसंनिधिवशाद्विश्रामविस्फूर्जितम्[8][9][10] ॥ ३१

92) पत्या[1] नित्यं यद्वियोगं लभन्ते लोकालोक्यं[2] यच्च राटिं कुटुम्बात् ।
यत्सापत्न्यं यान्ति रामाः सुदुःखं हिंसादेव्याराधनं तत्प्रसन्नम्[3] ॥ ३२

93) रूपभङ्गमुपयान्ति विचित्रं रोगराजजनितापकृतेर्यत्[1][2][3] ।
यज्जना जगति यान्ति च निन्दां निर्दयत्वसुहृदोपकृतं[4] तत् ॥ ३३

94) सर्वा कल्याणमालेयं दयादेवीप्रसादतः ।
तथाकल्याणमालापि हिंसान्याय्रीसमाश्रयात् ॥ ३४

की पीडा से व्याकुल तथा ' हमें कुछ दो ' इस प्रकार के दीन वचन को कह कर हाथ को फैलानेवाले प्राणी देखे जाते हैं; यह सब निश्चय से हिंसारूप वृक्ष का पुष्प है । इसका अपूर्व फल तो उन्हें आगे प्राप्त होगा ॥ ३० ॥

स्तनकलशों से सुन्दर दीखनेवाली स्त्रियों के समूह में जो वैधव्य प्राप्त होना है, नम्र मनुष्य में जो दारिद्र्य दिखता है, उपमारहित (सज्जन) पुरुष में जो विपत्ति दिखती है, तारुण्य में जो किसीको मरणावस्था प्राप्त होती है, तथा स्त्रीके जो सन्ततिहीनता होती है अथवा सन्तान के उत्पन्न होने पर भी जो उसका मरण हो जाता है; यह सब प्रभाव हिंसारूपी विषवल्ली के पास जा कर कुछ समय के लिये विश्राम करने का है ॥ ३१ ॥

स्त्रियाँ जो पति के साथ निरन्तर वियोग के कष्ट को प्राप्त होती है, किसी के घर में जो कुटुम्ब से नित्य कलह होता हुआ दिखता है, तथा स्त्रियाँ जो सौत के निमित्त से होने-वाले दुख को प्राप्त होती हैं; यह सब हिंसा देवी की आराधना का फल है ॥ ३२ ॥

देह में रोगराज से–प्रबल व्याधि के प्रभाव से–उत्पन्न हुए अपकार से जो मनुष्यों के रूप का विनाश होता है अर्थात् उदुंबर कुष्ठादिक रोग के कारण अवयवों के गल जाने से जो अनेक प्रकार से रूप का बिगाड होता है, तथा जगत में जो लोगों की निन्दा होती है; उस सब को निर्दयपनारूप मित्र का उपकार समझना चाहिये ॥ ३३ ॥

यह सब कल्याण माला अर्थात् धन-धान्य, व स्त्रीपुत्रादिकों के सुख दयारूपी देवती

३१) 1 रण्डत्वम्. 2 नमस्कारे. 3 आपत्. 4 मनोज्ञे. 5 स्त्रियः. 6 पुत्ररहिताः. 7 पुत्राः. 8 निकटिता. 9 P °धिमनाग्वि. 10 विलम्बितविस्फूरणम् । ३२) 1 भर्त्रा. 2 सर्वलोकविद्यमानम्. 3 सफलम् । ३३) 1 क्षय. 2 छेदनात्. 3 मित्रेण. 4 उपकारम् ।

95) दोहाङ्कादयताडनाप्रभृतिभिः[1] शीतातपाद्यैस्तथा
क्षुत्तृष्णादिनिरोधनैर्गुरुरुजाभारातिरोपैरपि ।
तिर्यञ्चो ऽप्रतिकारिणः[2] परवशात् दुःखं सहन्ते हि यत्
तत्तन्निर्दयतानदीतटतरुच्छायाश्रयस्र्जितफूम्[3] ॥ ३५

96) अविज्ञातप्रतीकाराः[1] सतां कारुण्यगोचराः ।
चिरं प्राणन्ति[2] रोगार्ताः[3] प्राणिघाताद्वनेचराः[4] ॥ ३६

97) प्रपाय्यन्ते[1] तप्तं कलिलसलिलं हृद्दहदहो
प्रखाद्यन्ते मांसं निजतनुसमुत्थं सुविरसम्[2] ।
विपाटयन्ते[3] चित्रैर्निशितकरपत्रैरकरुणं
प्रशाय्यन्ते[4] शय्यां प्रति दहनहेतिप्रतिभयाम् ॥ ३७

98) कुम्भीपाके विपाच्यन्ते प्रस्फाल्यन्ते शिलातले ।
पीड्यन्ते चित्रयन्त्रेषु परतन्त्रा[1] यथेक्षवः[2] ॥ ३८

के प्रसाद से मिलते हैं तथा अकल्याणों की माला–अनेक प्रकार के दुख–हिंसारूपी व्याघ्री के आश्रय से प्राप्त होते हैं ॥ ३४ ॥

दूध निकालने, शरीर को दागने व निर्दयतापूर्वक मारने आदि से, ठंड व गर्मी आदि से, भूख व प्यास आदि के रोकने से–समय पर खाना-पीना न देने से, तीव्र रोग से तथा अत्यधिक बोझा लादने से भी तिर्यंचों को जो प्रतिकार रहित दुःख परवशता के कारण सहन करना पडता है, वह सब निर्दयता रूपी नदी के तटवर्ती वृक्ष की छाया के आश्रय के लेने का प्रभाव है ॥ ३५ ॥

वन में रहनेवाले भील आदि प्राणियों का घात करने के कारण रोग से पीडित हो कर उसके परिहार के उपाय को न जानते हुए दीर्घ काल तक उस रोग की वेदना को सहते है व जीवित रहते हैं। उनकी वेदना को देखकर सज्जनों को उनके ऊपर दया आती है ॥ ३६ ॥

नरक में नारकियों को हृदय में दाह उत्पन्न करनेवाला तपा हुआ गहन (ताँबे का) पानी पिलाया जाता है, अतिशय दूषित स्वादवाला अपने ही शरीर का माँस खिलाया जाता है, उनका अंग नाना प्रकार के तीक्ष्ण करोंतों से निर्दयता पूर्वक विदीर्ण किया जाता है, अग्नि ज्वालाओं से घिरी हुयी शय्यापर सुलाया जाता है, उन्हें कुम्भीपाक में पकाया जाता है,

३५) 1 फालादिचिह्नकर्णादिच्छेदनम्. 2 उपायरहिताः. 3 विपाकः उदयः । ३६) 1 अज्ञातोपायाः. 2 जीवन्ति. 3 रोगेन पीडिताः. 4 भिल्लाः श्वापदा वा । ३७) 1 पानं कार्यन्ते. 2 अशुद्धम्. 3 P °विपाद्यन्ते. 4 शयनं कार्यन्ते. 5 आयसपुत्तलिका । ३८) 1 पराधीनाः नारकाः. 2 इक्षुदण्डाः ।

99) इत्थं कदर्थनं[1]मनेकविधं सहन्ते
यन्नारका नरककूपकमध्यमग्नाः ।
कालं प्रभूतं[2]मतिमात्रं[3]मनन्तरालं[4]
हिंसाफलं तदखिलं खलु खेलतीह[5] ॥ ३९

100) (इन्द्रमहर्द्धिकमरुतां[1] मरुतो[2] ऽपि हि वाहनादिविनियोगात् ।)
यन्मनसा तप्यन्ते तदपि च निःशूकता[3]स्फुरितम् ॥ ४०

101) जन्तूपघातजनितोत्कट[1]पातकस्य
मत्वा कटुप्रकटमत्र[2] विपाक[3]मेनं[4] ।
भव्या भवन्तु[5] भवसंभवदुःखभीताः
मा प्राणिवर्ग[6]परिरक्षणबद्धकक्षाः[7] ॥ ४१

102) जीवा ये यत्र[1] जायन्ते रमन्ते तत्र[2] ते यथा ।
निम्बकीटस्य निम्बे ऽपि रतिर्जगति गीयते[3] ॥ ४२

शिलातल पर पटका जाता है, तथा नाना प्रकार के कोल्हुओं में ईख के समान पेरा जाता है। इस प्रकार से यहाँ नरकरूप कुएँ के मध्य में डूबे हुए वे नारकी जीव जो अनेक प्रकार की पीडा को निरन्तर दीर्घकाल तक—अनेक सागरोपम काल तक—सहन किया करते हैं, वह सब हिंसा का फल खेलता है; ऐसा समझना चाहिये ॥ ३७–३९ ॥

इन्द्र और महाऋद्धिधारक सामानिक-त्रायस्त्रिंशादिकों के जो अभियोग्य आदि वाहन देव होते हैं वे वाहन आदि बनने के नियोग से जो मन में संतप्त हुआ करते हैं, वह भी उस निर्दयता की ही महिमा है। तात्पर्य—संक्लेश परिणामों से जो हीन देवगति की प्राप्ति होती है तथा जिससे श्रेष्ठ देवों के वाहन देव बनना पडता है, इसे पूर्व में किये गये क्रूरतापूर्ण व्यवहार का फल समझना चाहिये ॥ ४० ॥

प्राणियों का विघात करने से जो तीव्र पापबन्ध होता है उसके इस प्रत्यक्ष कटु पाप फल को जानकर भावी सांसारिक दुःख से भयभीत हुए भव्य जीवों को प्राणियों के समूह के रक्षण में कटिबद्ध होना चाहिये ॥ ४१ ॥

जो जीव जहाँ उत्पन्न होते हैं, वे वहीं पर रममाण होते हैं। ठीक है—नीम के कीडे को नीम में ही प्रीति होती है, ऐसा लोक में माना जाता है ॥ ४२ ॥

---

३९) 1 पीडनम्. 2 प्रचुरम्. 3 प्रमाणरहितम्. 4 अन्तरालरहितम्. 5 क्रीडति । ४०) 1 इन्द्रमहर्द्धिकदेवानाम्. 2 हीनदेवाः 3 निर्दयतायाः । ४१) 1 जीवघातोत्पन्नम्. 2 लोके. 3 उदयम्. 4 पापम्. 5 D °भवसंभव. 6 संबन्धः 7 कृतप्रतिज्ञाः भवन्तु । ४२) 1 यस्यां गतौ. 2 योन्यादौ. 3 कथ्यते ।

103) सुरेश्वरो[1] दिवि[2] सुरसुन्दरीजनै[3]–
यथा जिजीविषति[4] चिरं तथा जनः ।
जगद्गतो निजनिजजन्मरञ्जितः
कुटीरके[5] कटुतरदुःखपूरके ॥ ४३

104) नाकनेतुरि[1]व नाकविभोगैः कीटकस्य शकृदन्तरितस्य[2] ।
जीविताध्यवसतिः[3] सदृशी स्यान्मृत्युभीतिरपि तुल्यतमैव[4] ॥ ४४

105) रुजा[1] परीताः[2] परतन्त्रजीविताः[3] सुदुर्भगा[4] दुर्गत[5]दीनदुर्धियः ।
सदा कदर्थ्याश्च परैर्विमानिता जिजीविषन्त्येव[6] तथापि जन्तवः ॥ ४५

106) इति मत्वा विधानेन येन येनाङ्गिनां[1] व्यथा ।
जायते वर्जयेत्तं[2] तं धर्मार्थी कालकूटवत् ॥ ४६

107) आजन्म[1] निःशेषरुजा विवर्जिता भोगोपभोगैः स्थितये ऽर्थिता[2] इव ।
राजन्ति रामानयनालिमालिता लोका दयाकल्पलताचला[3]श्रया[4]ः ॥ ४७

जैसे इन्द्र स्वर्ग में सुरांगनाओं के साथ दीर्घकाल तक जीने की इच्छा रखता है वैसे ही इस जगत् में अवस्थित सभी जीव अपनी अपनी पर्याय में अनुरक्त हो कर अतिशय कटु व दुःखों से परिपूर्ण झोंपडी में (शरीर में) दीर्घकाल तक जीने की इच्छा रखते हैं ॥ ४३ ॥

जिस प्रकार स्वर्ग के स्वामी इन्द्र का स्वर्गीय भोगों के साथ वहाँ रहते हुए अपने जीवित के सम्बन्ध में विचार होता है–वह जीवित रहना चाहता है–। उसी प्रकार मल के मध्य में स्थित क्षुद्र कीडे को भी अपने जीवित का विचार होता है । तथा मरण का भय भी समान रूप से उन दोनों को रहा करता है–दोनों में से किसी को भी मरना अभीष्ट नहीं रहता ॥ ४४ ॥

रोग से पीडित परतंत्रतापूर्वक जीवन बितानेवाले, अतिशय भाग्यहीन, दरिद्र, दीन, दुष्ट बुद्धिवाले और सदा पीडित रहनेवाले प्राणी दूसरों से अपमानित होते हैं तो भी वे जीने की इच्छा करते हैं ॥ ४५ ॥

ऐसा समझकर जिस जिस आचरण से प्राणियों को व्यथा उत्पन्न होती है, धर्माभिलाषी जीव को उस उस आचरण को कालकूट विष के समान त्याग देना चाहिये ॥ ४६ ॥

जो लोग दयारूप कल्पलता का स्थिर आश्रय लेते हैं वे आजन्म सर्व रोगों से रहित

---

४३) 1 इन्द्रः. 2 स्वर्गे. 3 अप्सरःसमूहैः. 4 जीवितुं वाञ्छति. 5 शरीरे । ४४) 1 इन्द्रस्य. 2 गूथमध्ये स्थितस्य. 3 जीवितव्यस्य स्थितिः 4 अन्यतः सदृशा । ४५) 1 रोगेण. 2 पीडिताः. 3 पराधीनाः. 4 दुर्लक्षणाः 5 दरिद्र. 6 जीवितुमिच्छन्ति । ४६) 1 एकेन्द्रियादि- जीवानाम्. 2 विधानम् ।४७) 1 जन्मपर्यन्तम् 2 स्थानाय जीविता इव. 3 D °फलाश्रयाः 4 आधाराः ।

108) गौरीशाविव भर्त्रभिन्नतनवस्तारुण्यमञ्जूषिका
गोत्राकाशविरोचनोपमसुतोत्पत्त्या स्तुतोत्पत्तयः ।
रूपस्यावधयो नयस्य निधयः शीलस्य वेला इव
प्राणित्राणसमाश्रयाच्चिरतरं राजन्ति रामा जने ॥ ४८

109) कामं रूपेण भोगैः सुरपतिमसमत्यागतः कर्णमुख्यां-
स्तारेशं कायकान्त्या रविमपि महसा मारुतं साहसेन ।
मान्धातारं जयन्तः शुचिरुचिरचरित्रेण सत्येन धर्मं
कीर्तिव्याप्तत्रिलोका अभयवितरणात् पुण्यभाजस्तपन्ति ॥ ४९

होते हैं । उनसे मानो भोगोपभोग स्थान प्राप्त करने के लिये स्वयं प्रार्थना करते हैं—भोगोपभोग उनको स्वयं प्राप्त होते हैं । —तथा वे स्त्रियों की नयन-पंक्तियों की माला को धारण करते हैं अर्थात् उनको सुन्दर स्त्रियाँ प्रेम से देखती हैं ॥ ४७ ॥

जिन स्त्रियों ने पूर्व में प्राणिरक्षा का भली भाँति सहारा लिया है—जो प्राणिहिंसा से विरत रही हैं—वे उसके प्रभाव से पार्वती और महादेव के समान पति से अभिन्न शरीरवाली—परस्पर में अतिशय अनुरक्त—युवावस्था की पिटारी, सौन्दर्य की सीमा—अतिशय सुन्दर,—न्याय-नीति का भंडार और शीलरूप समुद्र का मानो किनारा होती हैं । अपने वंशरूप आकाश में सूर्य के समान तेजस्वी पुत्र को उत्पन्न करने के कारण लोक में उनके जन्म की स्तुति की जाती है । इस प्रकार से वे चिरकाल तक जनसमूह के मध्य में शोभायमान होती हैं ॥ ४८ ॥

अभयदान दे कर पुण्य का संचय करनेवाले भाग्यशाली जन अपने सौन्दर्य गुण से कामदेव को, भोगों से इन्द्र को, असाधारण दान गुण से कर्ण आदि प्रसिद्ध दानवीरों को, शरीर की कान्ति से चन्द्र को, तेजस्विता से सूर्य को, साहस से पवनपुत्र—हनुमान—को, पवित्र व सुन्दर चरित्र से मांधाता राजा—युवनाश्व राजपुत्र—को, तथा सत्यगुण से धर्मराज—युधिष्ठिर—को जीत कर अपनी कीर्ति से त्रैलोक्य को व्याप्त करते हुये दीर्घकाल तक तेजस्वी जीवन को बिताते हैं ॥ ४९ ॥

४८) 1 ईश्वरौ. 2 सूर्यं. 3 कृत्वा. 4 स्तवितोत्पत्तय:. 5 प्राणिरक्षणसमाश्रयात् । ४९) 1 कन्दर्पम् 2 आश्चर्यंदानात् 3 तेजसा. 4 युधिष्ठिरम्. 5 पुण्यवन्तः पुरुषास्तपन्ति संतापयन्ति एतान् । रूपेण कामं संतापयन्ति, भोगैरिन्द्रम्, असदृशत्यागतः कर्णसदृशान्, चन्द्रं कायकान्त्या, सूर्यं प्रतापेन, पवनं साहसेन बलेन, मान्धातारं नृपं शुचिनिर्मलचरित्रेण, युधिष्ठिरं सत्येन । कस्मात् अभयदानात् । किंविशिष्टाः पुण्यवन्तः कीर्तिव्याप्तत्रिलोकाः ।

110) व्यासङ्गै[1] रहिताः क्षुदादिभिरपि प्रोद्यद्दिनेशप्रभा
य[illegible]द्रुमभोगदत्तनिलयाः पल्यत्रयं प्राणितम्[2] ।
नीरोगा गमयन्ति भोगधरणीजाताः[3] पुमांसः स्त्रियः
पञ्चत्वे[4] त्रिदशा भवन्ति तदिदं जीवावनोत्थं[5] फलम् ॥ ५०

111) भोगभूमाश्च तिर्यञ्चो निःप्रपञ्चा मनुष्यवत् ।
त्रिपल्यजीवितप्रान्ते सुराः स्युः प्राणिरक्षणात् ॥ ५१

112) स्वायत्तं[1] कुरुते यतो ऽपि न परं संसारसौख्यं वरं
यन्निःश्रेयसदस्यु[2]मङ्गज[3]महासप्तार्चिराच्छेदकम् ।
यत्त्रिंशत्त्रितय[illegible]ताब्धि[4]सुखं सर्वार्थसिद्धेः सुराः
सेवन्ते सकलामराधिपनुतास्तत्प्राण्यहिंसार्जितम् ॥ ५२

113) मातुर्यशोधरस्यात्र कथा दृ[illegible][1] ।
सघण्टविश्वसेनस्य तथा क्षेमस्य मन्त्रिणः ॥ ५३

भोगभूमि में उत्पन्न हुए स्त्री-पुरुष आसक्ति व भूख-प्यास आदि की बाधा से रहित, उदित होते हुए सूर्य के समान कान्ति से रमणीय तथा कल्पवृक्षों के द्वारा दिये गये भोगों व भवन से संयुक्त हो कर जो तीन पल्य तक रोगरहित जीवित को धारण करते हैं तथा मरण के पश्चात् जो स्वर्ग लोक में देव होते हैं यह सब उनके जीवरक्षण का फल है ॥ ५० ॥

प्राणि रक्षण — अभयदान — के निमित्त से भोगभूमि में उत्पन्न हुए तिर्यंच भी माया व्यवहार से रहित हो कर मनुष्यों के समान वहाँ तीन पल्य तक सुखपूर्वक जीवित रहते हैं। तत्पश्चात् मरण को प्राप्त हो कर वे भी देव होते हैं ॥ ५१ ॥

सर्वार्थसिद्धि के देव समस्त इन्द्रों के स्तुति का स्वीकार करते हुए तेतीस सागरोपम कालतक जिस सुख का उपभोग किया करते हैं वह उन्हें पूर्वकृत प्राणि रक्षण से — उस अभय दान के प्रभाव से—ही प्राप्त हुआ करता है। उस सुख को छोड कर दूसरा कोई उत्तम संसार का सुख प्राणी को स्वाधीन नहीं करता है। वह मोक्षसुख के चोररूप काम की भयानक अग्नि को — उसकी बाधा को — नष्ट करनेवाला है ॥ ५२ ॥

दृष्टान्त स्वरूप यहाँ राजा यशोधर और उसकी माता की, घण्टा नाम की भार्या से युक्त विश्वसेन की तथा क्षेत्रनामक मंत्री की भी कथा हिंसा व अहिंसा के विषय में प्रसिद्ध है ॥ ५३ ॥

---

५०) 1 आरम्भप्र[illegible]ः. 2 जीवितम्. 3 भोगभूमावुत्पन्नाः 4 मृते सति देवा भवन्ति. 5 जीवरक्षणोत्पन्नं फलम् । ५२) 1 स्वाधीनम्. 2 मोक्षस्य. 3 काम. 4 सागरम् । ५३) 1 दृष्टान्तयोर्द्वया ।

114) निर्बाधं सिद्धिसौख्यं विषयविरहितं भाविकाले ऽप्यनन्तं
दूरं सर्वोपमानं वचनविषयतातीतमात्मस्वभावम् ।
यत्काम[1] कामयन्ते[2] भवभयविधुरा[3] आस्तिकाः[4] शुद्धबोधाः
सिद्धा यद् भुञ्जते तत्त्रुटति न नियतं शंबलं श्रीदयाप्तम् ॥ ५४

115) स्वर्निःश्रेयससंभवं[1] सुखफलं ख्यातं परोक्षं परं
प्रत्यक्षं सदयस्य सूरिरिव[2] स[3] प्रमाथ्यते भूतले ।
आनन्दाश्रुकणप्रपूर्णनयनैः संपीयमानो[4] जनै-
र्विश्वं साजननीव सुप्रभुरिव प्रीतैः कृतज्ञैः[5] परैः ॥ ५५

इति[6] श्री–जयसेन–मुनि–विरचिते धर्मरत्नाकरनामशास्त्रे
अभयदानदयाहिंसालफप्रभाववर्णनो नाम द्वितीयो ऽवसरः ॥ २ ॥

संसार के भय से व्याकुल हो कर यथार्थ वस्तु स्वरूप का श्रद्धान करनेवाले सम्यग्ज्ञानी जीव सब प्रकार की बाधा से रहित, इन्द्रिय विषयों से विहीन, भविष्य में अनन्त कालतक अवस्थित रहनेवाले, सब उपमाओं से दूर–अनुपम, वचन की विषयता से रहित–अनिर्वचनीय– और आत्मा के स्वभावभूत जिस सुख की अतिशय इच्छा किया करते हैं तथा सिद्धजीव जिसका उपभोग करते हैं वह पाथेयभूत शाश्वतिक सुख उस उत्तम जीवदया के निमित्त से प्राप्त होता है जो फिर कभी नष्ट नहीं होता ॥५४॥

स्वर्ग व मोक्ष का उत्कृष्ट सुखरूप फल अत्यन्त परोक्ष है, ऐसा प्रसिद्ध है। परन्तु दयालु भव्य को वह प्रत्यक्ष रूपसे प्राप्त होता है। पृथिवी पृष्ठ पर उस अभयदाता को भव्यजन आचार्य के समान मानते हैं। मनुष्य उसे आनन्दाश्रुकणों से भरी हुई आँखों से देखते हैं। वे उसके विषय में प्रेम तथा कृतज्ञता व्यक्त करते हैं व उसे विश्वासपात्र व्यक्ति के जननी के समान तथा उत्तम राजा के समान समझते हैं ॥५५॥ इस प्रकार श्री जयसेन मुनि विरचित धर्मरत्नाकर शास्त्र में अभयदान, दया तथा हिंसा के फलोंका वर्णन करनेवाला दूसरा अवसर समाप्त हुआ ॥२॥

---

५४) 1 अतिशयेन. 2 वाञ्छन्ति. 3 संसारभयभीताः. 4 जैनाः । ५५) 1 स्वर्गापवर्गसंभवम्. 2 आचार्य इव. 3 सदयः. 4 दृश्यमानः. 5 P °कृतज्ञः, कार्यवेत्ता, 6 P °इति द्वितीयोवसरः ।

[३. तृतीयो ऽवसरः]

[आहारदानादिफलम्]

116) द्वितीयं[1] स्तूयते[2] दानं सर्वतीर्थमतं[3] यतः ।
तद्विना[4] नैव तीर्थानि[5] न तपांसि तपस्विनः ॥ १

117) षण्मास[.] समधियः[1] समुपोष्य[2] वर्षे
वाञ्छन्ति नूनमशनानि विनाशनायाम्[3] ।
तस्माद्विना[4] न हि वपुर्न तपो विदा[5] वा
मोक्षो न तेन[6] रहितो ऽभिमतं ततस्तत्[7] ॥ २

118) उक्तं च—
आद्येनेक्षुरसो[1] दिव्यः पारणायां[2] पवित्रितः ।
अन्यैर्गोक्षीरनिष्पन्नपरमान्न[3]मलालसैः[4] ॥ २*१
तीर्थाधिपैरिति संबन्धः ॥

चूंकि दूसरे आहारदान के बिना न तो तीर्थों की–विविध संप्रदायों की–ही सम्भावना है और न उसके बिना तपस्वी के अनेक प्रकार के तपश्चरण भी स्थिर रह सकते हैं। अतएव सब ही तीर्थों को मान्य उस आहारदान की प्रशंसा की जाती है ॥ १ ॥

निर्मलबुद्धि मनुष्य वर्ष में छह मास उपवास करके तदनंतर पारणा के समय आहार की इच्छा करते हैं। आहार के बिना चूंकि शरीर की स्थिति नहीं रहती, तप नष्ट होता है, ज्ञान भी नष्ट हो जाता है, तथा उसके विना मोक्ष की भी प्राप्ति का संभव नहीं है। इसलिये वह आहारदान आवश्यक माना गया है ॥ २ ॥

कहा भी है–पहले आदिनाथ जिनेश्वर ने पारणा में इक्षुरस को पवित्र किया, अर्थात्

---

१) 1 अन्नदानम्. 2 कथ्यते. 3 सर्वमार्गमतम्, 4 तस्यान्नदानस्य. 5 पन्थानः । २) 1 [बुद्धयः] 2 उपवासं कृत्वा. 3 क्षुधायाम्. 4 अशनात्. 5 ज्ञानम्. 6 अशनेन, श्रेष्ठज्ञानेन वा. 7 अन्नदानम् । २*१) 1 आदिनाथेन. 2 आहार. 3 पायसः क्षीरिः 4 अलोभैः ।

119) आहारेण विना जगत्यभिमताः[1] सिध्यन्ति नो षट्क्रियाः
कार्याकार्यविचारणो ऽपि स चतुर्वर्गो[2] भृशं सीदति[3] ।
वर्णा निर्मलवर्णपूर्णभुवनाः सीमानं[4] मुञ्चन्त्यपि
यान्त्येवं[5] प्रलयं प्रभिन्ननियमा[6]स्तूर्णं तथैवाश्रमाः[7] ॥ ३

120) केचिन्मानसमोजसं[1] कतिपये लेप्यं परे कावलं
श्वाभ्रा[2] दुर्विचिकित्स्यसंततरुजा[3]ग्रस्ताः पुनर्वैक्रियम् ।
जीवा जन्मनि यान्त एव सकला नोकार्मणं कार्मणं
काङ्क्षन्त्येव जगन्ति जीवितमिवा[4]हारं समस्तान्यपि ॥ ४

इक्षुरस का आहार लिया। अजितनाथादि इतर तेईस तीर्थंकरों ने लोलुपता से रहित हो कर गाय के दूध से बने हुए परमान्न (खीर) का आहार ग्रहण किया है ॥ २*१ ॥ श्लोक में कर्ताके रूप में जिनेन्द्रों को ग्रहण करना चाहिये।

लोक में (अभीष्ट) उपाहार के अभाव में छह आवश्यक अथवा असि मषि आदिक जीवन-निर्वाहकी छह क्रियाएँ सिद्ध नहीं हो सकती हैं। उसके विना यह कार्य है और यह अकार्य है, इस प्रकार के विवेक के साथ मनुष्यों में धर्म, अर्थ, काम और मोक्षरूप चार पुरुषार्थ भी निश्चयसे फलित न हो सकेंगे। निर्दोष कीर्तिसे जगतको व्याप्त करनेवाले ब्राह्मण, क्षत्रिय, वैश्य व शूद्र ये चार वर्ण भी अपनी मर्यादा को नष्ट कर देंगे। तथा विविध नियमोंवाले ब्रह्मचर्याश्रम, गृहस्थाश्रम, वानप्रस्थाश्रम और भिक्षुकाश्रम ये चार आश्रम भी शीघ्र नष्ट हो हो जायेंगे ॥ ३ ॥

कितने ही जीव – जैसे देव – मानसिक आहार को, कितने ही प्राणी (अण्डस्थ) ओजस आहार को, कितने प्राणी – जैसे वृक्षलतादिक लेप्याहार को, तथा कितने प्राणी – जैसे मनुष्य व पशु – कवलाहार को, प्रतिकाररहित निरन्तर रोगग्रस्त नारकी जीव वैक्रियाहार को ग्रहण करते हैं। तथा जो जीव पूर्व शरीर को छोडकर उत्तर शरीर को धारण करनेके लिये जा रहे हैं वे नोकर्माहार व कर्माहारको ग्रहण किया करते हैं। तात्पर्य यह है कि लोक में सब ही प्राणी जैसे जीवित की इच्छा करते हैं वैसेही वे उसे स्थिर रखने के लिये आहार की भी इच्छा किया करते हैं ॥ ४ ॥

---

३) 1 अभीष्टाः. 2 ऋषिः, यतिः, मुनिः, अनगारः 3 अतिशयेन खेदखिन्नो भवति. 4 मर्यादाम्. 5 P °यान्तीव. 6 संयमाः 7 वानप्रस्थ, यति, गृही, ब्रह्मचारी. ४) 1 देवा मानसमाहारं वाञ्छन्ति, पक्षिणो ऽण्डकानि ओजसं पक्षाधारं वाञ्छन्ति, वृक्षादि लेप्यं, परे मनुष्याः तिर्यञ्चो ऽपि कवलाहारं वाञ्छन्ति गृह्णन्ति, नारकाः कर्माहारं वैक्रियकं आहारं गृह्णन्ति, तीर्थंकरा नोकर्म भवान्तरे गच्छता जीवकर्मणाम् (?). 2 नारकाः. 3 रोगेण. 4 जीवितव्यमिव ।

121) नाशनायाः[1] समो व्याधिर्भेषजं नाशनोपमम्[2] ।
तत्प्रदेष्टुः[3] परो नास्ति चिकित्साकुशलः[4] कृती ॥ ५

122) आ ारदानमिदमस्तसमस्तदोषं[1]
दातुर्[2]विधाननिपुणस्य भवप्रमोषम्[3] ।
कीर्त्यर्जनं च तनुते परमानुरागं
व्यग्रां[4] समग्रकमलां[5] कुरुते वरीतुम्[6] ॥ ६

123) मित्राण्यरीनपि करोति करोत्यभीष्टं[1]
कष्टं विदूरयति[2] वारयते ऽप्यनिष्टम् ।
मार्तण्डमूर्तिरिव संतमसं समस्तं
दानं निदानविकलं[3] कुदृशो[4] ऽपि दातुः[5] ॥ ७

124) आगांसि[1] क्षपयति वृष्टिरिवाशु तापं
विश्राणनं[2] गुणगणै रहितस्य दातुः ।
प्रोल्लासयत्युरुगु[3]णानसता[4] ऽपि साक्षात्
पानीयपूर्णसरसीव[5] सरोजषण्डान्[6] ॥ ८

भूख के समान कोई रोग और आहार के समान कोई औषध नहीं है। तथा आहार देनेवाले गृहस्थ के समान दूसरा कोई पुण्यवान् (विद्वान्) रोग के परिहार मे कुशल (वैद्य) नहीं है ॥ ५ ॥

समस्त दोषों से रहित यह आहारदान दान की विधि में कुशल दाता के संसारविनाश के साथ उसकी कीर्ति के उपार्जन को व धर्मविषयक उत्कृष्ट अनुराग को भी करता है। साथ ही वह उक्त दाता का वरण करने के लिये समस्त लक्ष्मी को व्याकुल भी कर देता है। उक्त दान के प्रभाव से दाता को सब प्रकार की लक्ष्मी स्वयं आकर प्राप्त होती है ॥ ६ ॥

मिथ्या दृष्टि भी दाता यदि भावमुख की अभिलाषारहित होकर दान देता है तो उसका वह दान शत्रुओं को भी मित्र बनाता है, अभीष्ट को पूर्ण करता है, कष्ट को दूर करता है, अनिष्ट को निवारण करता है, तथा सूर्यबिंब के समान समस्त अज्ञानरूप अंधकार को दूर करता है ॥ ७ ॥

सम्यग्दर्शनादि गुणों के समूह से रहित दाता के द्वारा दिया गया आहारदान उसके

---

५) 1 क्षुधायाः. 2 अशनसदृशम्. 3 D °प्रदातुः तस्याहारस्य दातुः सकाशात्. 4 वैद्यः. ६) 1 शुद्धम् 2 दानशीलस्य. 3 संसारमोषणम्. 4 आकुलाम्. 5 लक्ष्मीम्. 6 वरणयोग्याम्। ७) 1 मनोवाञ्छितम्. 2 निकटीकरोति (?). 3 निदानरहितम् 4 मिथ्यादृष्टिनः पक्षे अन्धः 5 दातृपुरुषस्य. ८) 1 अपराधान्. 2 दानम्. 3 अधिकगुणान्. 4 अविद्यमानान्. 5 पुष्करिणीव. 6 कमलसमूहान् ।

125) किं कर्पूरमयः [illegible]लाचयमयः किं कीर्तिरेखामयः
किं वानन्द[illegible] लसन्मधुमयः[1] किंवा सुहृद्धृन्मयः ।
वीक्षातृप्तविलोचनैर्[2]नरशतैर्वीक्ष्यो ऽपि नालक्ष्यते
त्यागी तिष्ठतु यत्र तत्र सततं प्रीतिप्रफुल्लाननैः[3] ॥ ९

126) गाण्डीवीव[1] धनुर्धरो विधुरि[2]वानन्दप्रदः पश्यतां
वाग्मी सूरिरिव[3] प्रतापनिलयः पूषेव[4] काव्योपमः[5] ।
नीत्या द्यौरिव[6] नीरजो[7] नरमणि[8]र्धात्रीव[9] सर्वसहः
कीर्त्या श्वेतयते तथा न हि यथा दाता दिशां मण्डलम् ॥ १०

127) गतिमतितनुतेजःकान्तिसौहित्य[1]सत्य-
व्रत[illegible]मयमाज्ञातार्थधर्मप्रवृत्ति-
प्रभृतिगुणस[illegible]हा योगिनां तेन[2] दत्ता
अशनवितरिता[3] यः कामधेनूपमानः ॥ ११

अपराधों को इस प्रकार से शान्त कर देता है जिस प्रकार की वर्षा गर्मी के सन्ताप को दूर कर देती है । तथा वह उसके अविद्यमान भी श्रेष्ठ गुणों को इस प्रकार से प्रकट करता है जिस प्रकार कि पानी से परिपूर्ण तालाब कमलसमूह को प्रकट करता हैं । उसे उत्पन्न किया करता है ॥८॥

दानी जहाँ पर अवस्थित होता है वहाँ वह दर्शनीय दाता प्रेमसे विकसित मुखवाले सैकडों जनों के द्वारा आतुर नेत्रोंसे निरन्तर देखे जानेपर भी क्या वह कपूंरस्वरूप है, क्या कलाओं के समूह (चन्द्र) स्वरूप है, क्या कीर्ति की रेखास्वरूप है, क्या आनन्दस्वरूप है, क्या सुन्दर वसन्त स्वरूप है, अथवा क्या मित्र के हृदयस्वरूप है; इस प्रकार सन्देहास्पद होने से वह ठीक से देखा नहीं जाता है । तात्पर्य, यह कि वह शीतलता आदि अनेक उत्तमोत्तम गुणों से संयुक्त होता है ॥ ९ ॥

दाता अर्जुन के समान धनुर्धारी, देखनेवालों को चंद्रसमान आनंददायक, आचार्य के समान भाषणचतुर, सूर्य के समान प्रताप का धारक, नीति से शुक्राचार्य के समान, आकाश के समान नीरज– धूलिरहित–अर्थात् पापरहित होता है । मनुष्यों में रत्नतुल्य वह दाता पृथ्वी के समान सर्वसह–सब संकटों को सहनेवाला–हो कर अपनी कीर्ति से जिस प्रकार दिशाओं के मण्डल को शुभ्र करता है, उस प्रकार दूसरा कोई अपनी कीर्ति से उस दिङ्मण्डल को शुभ्र नहीं करता है ॥ १० ॥

जो आहार देनेवाला पुरुष कामधेनु के समान है उसने योगिजनों को गति, मति,

---

९) 1 अमृतमयः. 2 दर्शनातृप्तनेत्रैः. 3 विकसिताननैः । १०) 1 अर्जुनः. 2 चन्द्रः. 3 बृहस्पतिरिव. 4 सूर्यः. 5 शुक्रसदृशो नीत्या. 6 आकाश. 7 निर्मल. 8 कश्चित् पुरुषरत्नं तथा श्वेतयते यथा दाता श्वेतयते. 9 D °धरित्री. । ११) 1 सज्जनता. 2 आहारदात्रा. 3 आहारदाता ।

128) चलो ऽकुलीनो ऽपि शठो ऽपि मूर्खः परं विशीलो ऽपि दुराशयो[1] ऽपि ।
उपेयते[2] सर्वजनैः प्रदेष्टा[3] यथा समुद्रः सरितां समूहैः ॥ १२

129) कलाकलापं च कुलं च शीलं श्रुतज्ञतां चारुचरित्रतां च ।
प्रकाशयेच्छन्नगुणांश्च दानं[1] पदार्थरूपाणि यथांशुमाली[2] ॥ १३

130) दृप्तारि[1]पक्षच्छिदुरो गुहो[2] यथा दोषान्धकाराभिदुरो[3] रविर्यथा ।
श्रीचन्दनं तापनिराधकं यथा दानं च दुर्नीतिपिधायकं[4] तथा ॥ १४

131) यादृशस्तादृशो वापि पुमां[1]स्त्यागान्महामुनिः[2] ।
कल्याणाशीःप्रजल्पाकै[3]श्चिन्तामणिरिवार्थ्यते[4] ॥ १५

132) दातृयाचकयोर्भेदः कराभ्यां[1]मेव दर्शितः ।
अर्थिन स्तिष्ठता ऽधस्तात् स[2] दातु[3]रुपरि स्थितः ॥ १६

शरीर का तेज, कान्ति, सज्जनता सत्य, व्रत, नियम, महाव्रत (आजन्म व्रत), आज्ञा और तीर्थ धर्मप्रवृत्ति इत्यादि गुणों के समूह दिये हैं ॥ ११ ॥

दाता यदि चंचल, अकुलीन, कुटिल, मूर्ख, दुराचारी और दुष्ट अभिप्रायवाला हो तो भी जिस प्रकार नदियों के समूह समुद्र में जाते हैं उसी प्रकार सब लोग उसीके पास जाते हैं ॥ १२ ॥

जैसे सूर्य पदार्थों के स्वरूप को प्रकाशित करना है वैसे ही दान अनेक कलाओं के समूह, कुल, शील, आगमज्ञान, निर्दोष चारित्र तथा अन्य भी प्रच्छन्न गुणों को प्रकट किया करता है ॥ १३ ॥

जिस प्रकार कार्तिकेय उन्मत्त शत्रुओं के पक्ष को छेदता है, सूर्य रात के अंधकार को चारों तरफ से नष्ट करता है, उत्तम चंदन शरीर के संताप को नष्ट करता है उसी प्रकार दान दुर्नीति को नष्ट करता है ॥ १४ ॥

जिस किसी भी प्रकारका पुरुष दान के प्रभाव से महामुनि हो कर चिन्तामणि के समान अन्य भिक्षार्थी जनों के द्वारा कल्याणसूचक आशीर्वचनोंका उच्चारण करते हुए प्रार्थित होता है ॥ १५ ॥

दाता और याचक के भेद को उन दोनों के हाथ ही दिखला सकते हैं। कारण कि याचक का हाथ नीचे और दाता का हाथ ऊपर रहता है ॥ १६ ॥

---

१२) 1 क्रूरचित्तः. 2 अङ्गीक्रियते. 3 दाता । १३) 1 कर्तृ. २ सूर्यः । १४) 1 दर्पसहितारिः. 2 षण्मुखः ईश्वरपुत्रो वा. 3 भेदकः. 4 आच्छादकम् । १५) 1 पुरुषः. 2 श्रेष्ठः वा महामुनिः वा. 3 कल्याणाशीर्वादप्रजल्पकैः. 4 प्रार्थ्यंते । १६) 1 द्वाभ्यां हस्ताभ्याम्. 2 करः. 3 दातृपुरुषस्य.

133) स्वर्णादिकं बहुविधं शतशोऽपि दानं
स्नानं सहस्रगुणतीर्थसमुद्भवं च ।
कामं[1] करोतु विधिना पितृतर्पणं च
नाऽऽहारदानसममेकमपि प्रभाति[2] ॥ १७

अन्यदर्शने[1]ऽप्युक्तं श्लोकत्रयम् —

134) कनकाश्व[2]तिला नागो रथो दासी मही गृहम् ।
कन्या च कपिला धेनुर्महादानानि ते दश ॥ १७*१

135) श्राद्धे च सुरनद्यां[1] च गयायां चैव भारत ।
वापीकूपतडागेषु षट्सु धर्मो भ्रमान्वितः[2] ॥ १७*२

136) नकुलो यज्ञवाटस्थ[1] इदं वचनमब्रवीत् ।
न सक्तुप्रस्थतुल्यो[2] हि यज्ञो बहुसुवर्णकः ॥ १७*३

137) दानं हि सर्वव्यसनानि हन्तीत्याख्यायि[1] वाक्यं सकलेऽपि लोके ।
कल्याणमालाफललालुपेन[2] देयं[3] स्वशक्त्या तदतन्द्रितेन[4] ॥ १८

मनुष्य भले ही सैंकडो प्रकार से बहुत प्रकार के सुवर्ण आदि का दान करता रहे, तथा वह सहस्र गुणों से युक्त तीर्थजल में भले ही स्नान करता रहे, तथा वह विधिपूर्वक अतिशय पितृतर्पण–श्राद्ध –को भी करता रहे। फिर भी इनमें से एक भी उस आहारदान के समान सुशोभित नहीं हो सकता है ॥ १७ ॥

अन्यदर्शन में भी ये तीन श्लोक कहे गये हैं –

हे भारत! तेरे लिये सुवर्ण, घोडा, तिल, हाथी, रथ, दासी, पृथ्वी, घर, कन्या और कपिला गाय ये दश महादान कहे गये हैं ॥ १७*१ ॥

श्राद्ध, गंगा नदी, गया, वापी, कुआँ और सरोवर इन छह स्थानों में धर्म है, ऐसा मनाना भ्रान्ति है ॥ १७*२ ॥

यज्ञवाट में गया हुआ नेवला यह बोला कि बहुसुवर्णक नामक यज्ञ – जिसमें बहुत सुवर्ण ब्राह्मणों को दिया जाता है – सत्तू के प्रस्थ (एक प्रकार का माप) समान नहीं है। तात्पर्य, बहुत सुवर्णादि के दान की अपेक्षा एक प्रस्थ सत्तू का देना कहीं श्रेष्ठ है ॥ १७*३ ॥

दान सर्व व्यसनों का नाश करता है, यह वाक्य "दाति निकृन्तति व्यसनानि इति

---

१७) 1 अतिशयेन. 2 शोभते । १७*१) 1 परसमयदर्शने. 2 घोटक. १७*२) 1 गङ्गायाम्. 2 भ्रमसंयुक्तः निश्चयरहितः धर्मो भवति न वा भवति । १७*३) 1 यज्ञस्थाने स्थितः. 2 सातूपायेन समानः । १८) 1 उक्तम्. 2 वाञ्छकेन. 3 दानम्. 4 आलस्यरहितेन ।

स्वशक्तिः प्रसिद्धा व्याख्यायते–

138) भागद्वयी कुटुम्बार्थे संचयार्थे[1] तृतीयकः ।
स्वरायो[2] यस्य धर्मार्थे तुर्यस्त्यागी[3] स सत्तमः[4] ॥ १९

139) भागत्रयं तु पोष्यार्थे कोशार्थे तु द्वयी सदा ।
षष्ठं दानाय यो युङ्क्ते स त्यागी मध्यमो ऽधमात् ॥ २०

140) स्वस्वस्य[1] यस्तु षड्भागान् परिवाराय योजयेत् ।
त्रीन् संचयेद्दशांशं[2] च धर्मे त्यागी लघुश्च[3] सः ॥ २१

141) इतो हीनं दत्ते सति सुविभवे यस्तु पुरुषो
मतं तद्यत्किंचित् खलु[1] न गणितं धार्मिकनरैः ।
इमान् भागांस्त्यक्त्वा वितरति[2] बुधो यस्तु बहुधा
महासत्त्वस्त्यागी भुवनविदितो ऽसौ[3] रविरिव ॥ २२

दानम्" इस निरुक्ति के अनुसार [सब लोक में प्रसिद्ध है । इसलिये कल्याण समूह रूप फल की अभिलाषासे दाता को आलस्य छोडकर अपनी शक्ति के अनुसार] दान देना चाहिये ॥ १८ ॥

प्रसिद्ध अपनी शक्ति का व्याख्यान किया जाता है – जो पुरुष अपने अर्जित धन का कुटुम्ब पोषण के लिये दो भाग, संचय के लिये तीसरा भाग तथा धर्म के लिये चौथा भाग नियत करता है, वह उत्तम दाता माना जाता है ॥ १९ ॥

जो अपनी आयमें से सदा कुटुम्ब पोपणके लिये [तीन भाग, संचय के लिये दो भाग और शेष छठे भाग को दानके लिये] नियत करता है वह दानी अधम की अपेक्षा मध्यम कहा गया है ॥ २० ॥

जो दाता अपने धन के दस भागों में से छह भाग परिवार पोषण के लिये, तीन भाग संचय के लिये तथा शेष दसवें भाग को धर्म के लिये नियोजित करता है वह दाता जघन्य माना जाता है ॥ २१ ॥

जो पुरुष अतिशय वैभव के होनेपर भी इससे – एक दशांश से भी कम दान देता है– उसे धार्मिक जन दाता लोगों में कुछ भी नहीं गिनते हैं – उसे वे दाता नहीं समझते हैं । किन्तु जो विद्वान् उपर्युक्त भागों को छोड कर अनेक प्रकार से बहुत धन को देता है, वह दानी महात्मा लोक में सूर्य के समान प्रसिद्ध होता है ॥ २२ ॥

१९) 1 रक्षणार्थे. 2 स्वद्रव्यस्य. 3 चतुर्थः. 4 उत्तमः दाता । २१) 1 स्वकीयद्रव्यस्य. 2 दशमभंशम्. 3 जघन्यदाता । २२) 1 स्फुटम्. 2 ददाति. 3 दाता ।

142) पुव्वपुरिसदाणहलु सुणेविणु लोहु समुब्भवंतु णियमेविणु ।
संसारासारत्तु मुणेविणु णियदव्वाणुसारु सुमरेप्पिणु ॥ २२*१

143) देइ ण जो घरत्थु सो केहउ किं माणुसु चिडउल्लउ जेहउ ।
णियडिंभई अप्पाणु जिं[1] पोसइ मुवउ ण जाणहं[2] कहिं जाईसइ ॥ २२ * २

144) श्रेयान्[1] आदिमदेवदान[2]महितः[3] श्रीचक्रवर्तीरितः[4]
पञ्चाश्चर्यमवाप[5] भूपतिर्मधु[6]श्रीवज्रजङ्घोऽर्हतेः[7] ।
अन्येषां जिनयोगिनां वितरणात्[8] प्रापुर्भवेऽस्मिन्नपि
द्वित्रैर्मुक्तिपदं परे कतिपयै[9]र्भोगांश्च कुर्वादिषु[10] ॥ २३

145) अष्टापदं[1] यथेष्टं तु निष्क्रान्तौ[2] श्रीजिनेश्वरैः ।
स्वयमदायि[3] सत्त्वेभ्यो मध्यस्थैरपि निश्चितम्[4] ॥ २४

146) इति प्रसिद्धं परमागमेऽपि तथापि भोगा विविधाश्च रोगाः[1] ।
नतो गृहस्थैर्यतिभिश्च दानं यथोचितं[2] देयमिहानिदानम् ॥ २५

पूर्व पुरुषों ने दान दे कर जो फल प्राप्त किया है उसे सुनकर, लोभ की उत्पत्ति को नियंत्रित कर संसार की असारता को जानकर और अपने द्रव्य के अनुसार दान देने की योग्यता का स्मरण कर जो गृहस्थ दान नहीं देता है वह गृहस्थ कैसा है, वह क्या मनुष्य है? वह उस चिडिया के समान है जो अपने बच्चों का पोषण करना ही जानता है । वह मरने पर कहाँ जायेगा, यह हम नहीं जानते हैं ॥ २२*१–२ ॥

श्रेयांस राजा आदि जिनेन्द्र को आहारदान देने के कारण महिमा को प्राप्त हुआ, उसकी भरत चक्रवर्ती ने भी स्तुति की। राजा मधु (?) और वज्रजंघ ने जो मुनि के लिये आहारदान दिया था उसके प्रभाव से उन्होंने पंचाश्चर्यों को प्राप्त किया था । अन्य तीर्थंकरों व योगिजनों को आहारदान दे कर कितने ही भव्य जीवों ने इसी भव में और कितनों ने कुरु-देवकुरु व उत्तरकुरु – आदि भोगभूमियों के भोगों को भोगकर दो, तीन अथवा कुछ ही भवों में मोक्ष को प्राप्त किया है ॥ २३ ॥

दीक्षा लेते समय स्वयं तीर्थंकरों ने भी–जो कि मध्यम स्वभाव को प्राप्त थे–प्राणियों के लिये यथेष्ट सुवर्ण को दिया है, यह निश्चित है ॥ २४ ॥

इस प्रकार यद्यपि परमागम में भी दान के विषय में प्रसिद्ध है, तो भी नाना प्रकार के

२२*२) 1 D °अजि पोसइ. 2 D °जाणहि । २३) 1 श्रेयान् राजा प्रथमदाता. 2 आदिनाथदानात्. 3 P °महिमः. 4 P °श्रीचक्रवर्तीडितः, श्रीभरतचक्रवर्तिना ईडितः पूजितः. 5 प्राप. 6 दातृनाम. 7 अर्हतेर्दानात्. 8 दानात्. 9 जन्मभिः. 10 कुरुभोगभूम्यादिषु । २४) 1 सुवर्णम्. 2 दीक्षाकाले. 3 दत्तम्. 4 सत्यं कृतम् । २५) 1 ज्ञात्वा. 2 यथायोग्यम् ।

147) बालो बाढं[1] प्रकुपितमनाः कामिनी वा कुतश्चित्[2]
प्राप्ते ऽभीष्टे[3] प्रहृषिततनुर्भक्ष्यभूषादिरूपे[4] ।
स्वामिन्युच्चै रचयति चटून् कोटिशो ऽभीष्टचेष्टा
दानं प्रीतिप्रमुखवचनं सिद्धतन्त्रं प्रशस्तम् ॥ २६

148) दृष्टान्तमात्रकं चेदं बालकान्ताप्रसादनम्[1] ।
विश्राणनफलं[2] कृत्स्नं[3] केवलं वक्ति[4] केवली ॥ २७

149) ज्ञात्वैतच्च कलेवरं च विभवं[1] पुत्रप्रियाद्यं तथा
सर्वं नश्वरमाशु[2] बुद्बुदतडित्संध्याशरन्मेघवत्[3] ।
प्रौढं शंबलमाकलय्य[4] नियमाज्जन्मान्तरं गत्वरै[5]–
र्दानं किं न विधीयते[6] शुभमहालाभे प्रयत्नार्थिभिः[7] ॥ २८

भोगों को रोग जैसा समझकर गृहस्थ और यति दोनों को ही अपने योग्य दान निदानभावना से रहित होकर देना चाहिये ॥ २५ ॥

जब बालक अथवा कामिनी स्त्री किसी कारण से मन में अतिशय कुपित होते हैं, तब उनको मोदकादि भोज्य पदार्थ और अलंकारादि के देने पर उनका शरीर प्रफुल्लित–रोमांचित–हो जाता है अर्थात् वे प्रसन्न हो जाते हैं। और अनेक इष्ट क्रियाओं को करते हुए वे अपने स्वामी के बारे में मधुर भाषण करते हैं। इसलिये प्रीति से परिपूर्ण वचनों का हेतुभूत वह दान अपनी निश्चित कार्यसिद्धि का प्रशस्त तन्त्र – उपाय है ॥ २६ ॥

बालक और स्त्री की प्रसन्नता का यह केवल दृष्टान्त दिया गया है । दान के संपूर्ण फल का कथन तो केवल केवली ही कर सकते हैं ॥ २७ ॥

यह शरीर, वैभव तथा पुत्र व पत्नी आदिक कुटुम्बीजन ये सब बुलबुले बिजली सन्ध्या तथा शरत्कालीन मेघ के समान शीघ्र नष्ट होनेवाले हैं । ऐसा समझकर अन्य भव को जानेवाले भव्य जीव दान को उत्तम कलेवा जैसा समझकर उत्तम लाभ के लिये उसे प्रयत्नपूर्वक क्यों नहीं देते हैं ? तात्पर्य – दान से जो महापुण्य प्राप्त होता है उससे जीव जन्मान्तर में महासुखी होता है । जैसे कलेवा लेकर ग्रामान्तर को जानेवाला [प्रवासी सुखी होता है वैसे ही दानरूप कलेवा को लेकर जन्मान्तर को जानेवाला] आत्मारूपी प्रवासी भी सुखी होता है ॥ २८॥

---

२६) 1 अतिशयेन. 2 कस्मादपि स्थानात्. 3 वस्तुनि. 4 बालस्य भक्ष्यं, कामिनीनां भूषा आहरणं वस्त्रम् । २७) 1 प्रसन्नत्वम्. 2 आहारदानफलम्. 3 समस्तम्. 4 केवलज्ञानी कथयति । २८) 1 लक्ष्मीम्. 2 विनश्वरं ज्ञात्वा. 3 [?] 4 कलयित्वा. 5 गन्तुकामैः. 6 दीयते. 7 धनिभिः ।

उक्तं च—

150) समागमाः[1] सापगमाः[2] सर्वमुत्पादि भङ्गुरम् ।
काय: संनिहितापायः[3] संपदः पदमापदाम्[4] ॥ २८*१

157) संकल्प्यं कल्पवृक्षस्य चिन्त्यं चिन्तामणेरपि ।
असंकल्प्यमसंचिन्त्यं फलं धर्मादवाप्यते ॥ २८*२

152) अत्य ज्यं द्रविणं निकामकमिदं[1] प्राणात्यये[2] ऽपीश्वराः[3]
सत्यं चेत्परिवर्धयध्वमपरं[4] नेतुं यतध्वं[5] भवम् ।
सुक्षेत्रेषु तदाखिलेषु वपतः[6] श्रद्धाम्बुभिः सिञ्चतः
श्रेयो ऽनन्तगुणं भविष्यति यतः काले बलं प्राप्नुतः[7] ॥ २९

153) एकं क्षेत्रं[1] त्रिभुवनगुरोर्मन्दिरं[2] बिम्बमन्यत्[3]
संघो ऽनर्घ्यः समभवदतः[4] सो[5] ऽपि भेदैश्चतुर्भिः ।
तुर्यं[6] वर्यं प्रवचनमिति[7] स्पर्शनं[8] बीजमुप्तं[9]
यद्वत्तद्वत्फलति निखिलामेषु[10] कल्याणमालाम् ॥ ३०

कहा भी है –

जो इष्ट पदार्थों का संयोग है, वह वियोगसहित है। अर्थात् इष्ट पदार्थों का वियोग अवश्य होनेवाला है। जो उत्पन्न होना है वह नश्वर होता ही है। यह शरीर अपायसहित है, अर्थात् वह नष्ट होनेवाला है तथा संपत्तियाँ आपदाओं का स्थान हैं – विपत्ति को उत्पन्न करनेवाली हैं ॥ २८*१ ॥

कल्पवृक्ष का फल संकल्प्य है – मुझे अमुक पदार्थ प्राप्त हो, ऐसी मन में इच्छा उत्पन्न होनेपर ही कल्पवृक्ष फल देता है। चिन्तामणि रत्न मन में चिन्तवन करनेपर ही इच्छित फल को देता है। परन्तु धर्म संकल्प से रहित व अचिन्तित फल को देता है। इसलिये धर्म उस कल्पवृक्ष से और चिन्तामणि से भी श्रेष्ठ है ऐसा समझना चाहिये ॥ २८*२ ॥

हे धनाढच भव्यजनो! यदि यह सत्य है कि प्राणनाश के समय में भी धन का त्याग करना अत्यन्त अशक्य है तो आप उसे वृद्धिगत करते हुए दूसरे जन्म में ले जाने का प्रयत्न करें इसलिये उसे मस्त उत्तम क्षेत्रों में बो कर – जिन मंदिर, जिनप्रतिमा, जिनशास्त्र, मुनि, आर्यिका, श्रावक और श्राविका इन सप्त क्षेत्रों में देकर – श्रद्धारूप जल से सींचिये। तब वह योग्य समय में फलित होकर पूर्वसे अनन्त गुणित कल्याण (सुख) को प्रदान करेगा, उसे आप प्राप्त कर सकते हैं ॥ २९ ॥

उपर्युक्त उत्तम क्षेत्रों में प्रथम क्षेत्र त्रैलोक्य गुरु (जिनेन्द्र देव) का मंदिर है। दूसरा

२८*१) 1 संयोगाः. 2 वियोगसहिताः. 3 सविनाशः. 4 आपत्सहिताः । २९) 1 अतिशयं वा हितम्. 2 विनाशे. 3 भो ईश्वराः. 4 वृद्धिं प्रापयत. 5 यत्नं कुरुध्वम्, 6 पुरुषस्य. 7 वपिष्यतः पुरुषस्य । ३०) 1 गेहम्. 2 चैत्यालयम्. 3 जिनबिम्बम्. 4 आसीत्. 5 संघः. 6 चतुर्थम्. 7 आगमम्. 8 स्त्रीकारं दानं वा. 9 वपितम्. 10 चैत्यालयादिषु क्षेत्रेषु ।

154) रत्नावलीविविधदारुमयः[1] सुमेरुः[2]
प्रासाद[3] एष उत[4] मेरुरयं जनानाम् ।
भ्रान्तिमदो जिनवरस्य विधाप्यते[5] यै-
स्तेषां महेन्द्रपदवी[6] ननु किंकरीव[7] ॥ ३१

155) स्याद्वादकेतनस्योच्चैः[1] कारयन्ति निकेतनम्[2] ।
ये[3] तेषां सकलो लोको निकामं[4] किंकरायते[5] ॥ ३२

156) किं मेरोर्जिनहर्म्यमेतदुत वा नन्दीश्वरादागतं[1]
लोकालोकगिरेः[2] स्वयंप्रभनगादाहो[3] कुलाद्रायतः[4] ।
इत्थं भ्रान्तिकरं जनस्य विदुषो[5] यं कारयन्ते जना-
स्ते लोलन्ति सदाप्सरःकुचतटोत्संगेषु[6] हारा इव ॥ ३३

क्षेत्र जिन प्रतिमा है। तत्पश्चात् मुनि आर्यिका, श्रावक व श्राविकारूप अमूल्य चतुर्विध संघ यह तीसरा क्षेत्र है। चौथा क्षेत्र श्रेष्ठ निर्दोष आगम है। इन चारों क्षेत्रों में दानरूपी बीज बोना चाहिये। जैसे क्षेत्र में बीज के बोने से फल प्राप्त होता है वैसे ही इन चारों क्षेत्रों में दानरूप बीज के बोने से अनेक कल्याणरूपी फल प्राप्त होते हैं ॥ ३० ॥

जो धनिक जन अनेक रत्नसमूह तथा लकडियों से जिनेन्द्र का ऐसा सुन्दर सुमेरु बनवाते हैं, कि जिसको देखकर लोगों को यह रत्नमय सुमेरु पर्वत है अथवा जिनमंदिर [है ऐसी भ्रांति उत्पन्न होती है। इस प्रकार का जिनमंदिर] बनवाने से धनिकों को इन्द्र पदवी मानो दासी के समान प्राप्त होती है। तात्पर्य — जिनमंदिर बनवानेवाले इन्द्र से भी श्रेष्ठ होते हैं ॥३१॥

जो स्याद्वाद की पताका को धारण करनेवाले जिनेश्वर का भव्य महाप्रासाद बनवाते हैं, उनके अन्य सब लोग अतिशय दास बन जाते हैं ॥ ३२ ॥

क्या यह मेरुपर्वत का जिनमंदिर है; अथवा [वह नंदीश्वर द्वीप से, अथवा] लोकालोक पर्वत से, अथवा स्वयंप्रभ नामक पर्वत से अथवा हिमवदादि कुलपर्वतों से आया है; ऐसी विद्वान् पुरुषों के मन में शंका को उत्पन्न करनेवाले जिनमंदिर को जो भी भव्य बनवाते हैं वे सदैव अप्सराओं के स्तनतटों के बीच में हार के समान लोटते हैं ॥ ३३ ॥

३१) 1 रत्नखचित. 2 शोभनशृङ्गः वा मर्यादायुक्तः. 3 जिनस्य प्रासादे. 4 अहो. 5 कथिते. 6 इन्द्र पदवी. 7 दासी इव । ३२) 1 जिनस्य. 2 गृहम्. 3 भव्याः. 4 अतिशयेन. 5 किंकरवत् आचरति । ३३) 1 अष्टमद्वीपात्. 2 मानुषोत्तरगिरेः. 3 स्वयंप्रभपर्वतात्. 4 षट्कुलपर्वतात्. 5 पण्डितस्य जनस्य. 6 अप्सरसां देवकन्यानाम् ।

157) वास्तूक्तसूत्रविधिना[1] प्रविधापयन्ति[2]
ये[3] मन्दिरं मदनविद्विषतश्चि[4]रं ते ।
रोचिष्णुविश्वरमणी[5]रमणीयभोगाः
सौख्याब्धिमध्यरचितस्थितयो[6] रमन्ते ॥ ३४

158) न्यक्कुर्वन्[1] घनसा[2]रहारहिमवच्चन्द्रद्युतिस्वर्द्युति[3]-
रेत[4]त्तावदकृत्रिमं सुरवरैः संभाव्यते[5] कृत्रिमम् ।
इत्याश्चर्यकरं मनोभवरिपो[6]र्ये कारयन्ते गृहं
ते संसारसमुद्रसंभवसुधासारं[7] प्रपा[8]स्यन्त्यलम् ॥ ३५

159) लेप्यं तथेष्टकचितं[1] च शिलामयं ये-
ऽनेकान्तकेतन[2]निकेतनमात्मशक्त्या ।
निर्मापयन्ति[3] नृसुरेष्वचिरादुषित्वा
यास्यन्ति ते शिवपुरीं हतरोधकौघाः[4] ॥ ३६

जो वास्तुशास्त्र में कही गई विधि के अनुसार काम के शत्रुभूत जिनेश्वर के मंदिर को बनवाते हैं वे कांति से सम्पन्न संपूर्ण स्त्रियों के साथ रमणीय भोगों को भोगते हुए सौख्यसमुद्र के मध्य में स्थित होकर दीर्घकाल तक क्रीडा किया करते हैं ॥ ३४ ॥

कर्पूर, मुक्ताहार, हिमवान् पर्वत, चन्द्रकान्ति और स्वर्ग की शोभा को तिरस्कृत करने वाले जिस कृत्रिम जिनमंदिर के विषय में देव अकृत्रिमना की सम्भावना करने लग जावें, ऐसे आश्चर्यजनक, मदन के वैरी स्वरूप जिनेश्वर के मंदिर को जो भव्य बनवाते हैं, वे भविष्य में संसाररूप समुद्र के मथन से उत्पन्न हुए श्रेष्ठ अमृत का इच्छानुसार पान करेंगे ॥ ३५ ॥

जो भव्य पुरुष अनेकान्तरूप ध्वज के धारण करनेवाले जिनेश्वर के मंदिरको अपनी शक्ति के अनुसार मिट्टी आदि से, ईंटों से अथवा पाषाण से निर्माण कराते हैं, वे मनुष्यों और देवों में निवास कर–उनके सुख को भोगकर–संसार में रोकनेवाले समस्त ज्ञानावरणादि कर्मों के समूह को नष्ट करते हुए शीघ्र ही मुक्ति नगरी को प्राप्त करनेवाले हैं ॥३६ ॥

---

३४) 1 P °सूक्तविधिना. शिल्पिकारशास्त्रोक्तविधिना. 2 कारयन्ति. 3 पुण्यवन्तः. 4 मदनशत्रोः सर्वज्ञस्य. 5 मोक्षरमणी. 6 देदीप्यमानसंसारस्त्रीमनोज्ञभोगसौख्यसमुद्रमध्यकृतस्थानाः । ३५) 1 निराकुर्वन् सन्. 2 कर्पूर. 3 स्वर्ग. D °स्वर्धुनी. 4 गृहं चैत्यालयम्. 5 अकृत्रिमं विचार्यते. 6 जिनस्य. 7 सौख्यम्. 8 पानं करिष्यन्ति । ३६) 1 इंटकृतम्. 2 जिनस्य. 3 कारयन्ति. 4 हतरोधका ज्ञानावरणादिकर्मौघा यैस्ते हतरोधकौघाः ।

160) तार्णं[1] च पार्णं[2] च कुटीरमात्रं वासमयं[3] दारुमयं[4] स्वशक्त्या ।
हर्म्यं चलं[5] स्थास्नु[6] च कारयन्ति ये ते भविष्यन्ति च मुक्तिभाजः ॥ ३७

161) ये चैत्य[1]चैत्यभवना[2]गमपुस्तकानि
निर्मापयन्त्यधममध्यमसत्तमानि[3] ।
तेषां स्वकीयपरिणामविशुद्धिहेतोः
सूरीश्वराः[4] फल[illegible]शान्त[5] भिदेलिमं[6] न ॥ ३८

162) चिन्तामणिकल्पलताकामदुघा[1] विजयते यतो ऽचिन्त्यम् ।
फलतीयं प्रयतध्वं भावविशुद्ध्यै ततो भव्याः ॥ ३९

163) आचन्द्रार्कमवारितं तनुमतां धर्मस्य सत्रं परं
प्राणित्राणसुधाप्रपा गुणगणक्षेत्रं पवित्रावनी ।
स्वर्निःश्रेयसदेशयात्रिकजनक्षे[illegible][1] बुधै-
राम्नातं जिनवेश्म दुर्गतिपतद्धस्तावलम्ब ऽचलः ॥ ४०

जो भव्य श्रावक अपनी शक्ति के अनुसार घास अथवा पत्तों की झोंपडीस्वरूप, वस्त्रमय तंबूस्वरूप अथवा काष्ठस्वरूप चल या स्थिर जिनमंदिर को बनवाते हैं, वे भी मुक्ति को प्राप्त करनेवाले हैं ॥ ३७ ॥

जो हीन, मध्यम अथवा उत्तम जिनप्रतिमा, जिनमंदिर तथा सिद्धान्त ग्रंथों का निर्माण कराते हैं, उनको अपने परिणामों की विशुद्धि के कारण अविनाशी फल प्राप्त होता है यह महान आचार्यों का उपदेश है ॥ ३८ ॥

प्राणी जिस परिणाम विशुद्धि से चिन्तामणि, कल्पलता और कामधेनु के ऊपर विजय प्राप्त करता है, यह चूंकि अभीष्ट, अचिन्तनीय फल को प्रदान करती है, इसीलिए उस परिणाम विशुद्धि की प्राप्ति के लिये भव्य जीवों को सदा प्रयत्न करना चाहिये ॥ ३९ ॥

वह जिनमन्दिर जगत में जब तक चंद्रसूर्य हैं, तब तक स्थिर रहकर प्राणियों को धर्म का दान करनेवाली उत्कृष्ट दानशाला, प्राणियों की रक्षा करनेवाली अमृत पानशाला

३७) 1 तृणजनितम्. 2 वृक्षपत्रजनितम्. 3 वस्त्रजनितम्. 4 काष्ठजनितम्. 5 चलं गम्यम्. 6 स्थिरीभूतम् । ३८) 1 जिनप्रतिमा. 2 चैत्यालयम्. 3 जघन्यमध्यमोत्कृष्टानि. 4 जिनाः. 5 कथयन्ति. 6 कथंभूतं फलं; न भिदेलिमं विनश्वरं, अविनश्वरं मोक्षफलमित्यर्थः । ३९) 1 इयं भावविशुद्धिः कर्त्री चिन्तामणिप्रभृतिकल्पलताकामदुघा । ४०) 1 गमनशील ।

164) मुनिः कश्चित्स्थानं रचयति यतो जैनभवने
विधत्ते व्याख्यानं [illegible][1] धर्मनिरतः।
भवन्तो[2] भव्यौघा भवजलधिमुत्तीर्य[3] सुखिन-
स्ततस्तत्कारी[4] किं जनयति जने यन्न सुकृतम् ॥ ४१

165) मर्त्यमस्तकमाणिक्यं [illegible]ण्डनम्।
निकेतनं जिनेन्द्रस्य को ऽपि कारयते कृती[1] ॥ ४२

166) यावत्कृत्य[1]मशेषितं[2] सुकृतिभिस्तैरेव[3] सिद्धैरिव
प्रध्वस्तं रविणेव संतततमः सर्वं तथा दुष्कृतम्।
तैर्[3]आलेखि[4] शशाङ्कमण्डलगता स्वाङ्का प्रशस्तिः स्थिरा
यैर्[illegible]शभवनं स्वं[5] वा यशो मूर्तिमत् ॥ ४३

(प्याऊ) व गुणसमूह का निवासस्थान, पवित्रभूमि – तीर्थक्षेत्र, तथा स्वर्ग व मुक्तिस्थान को जानेवाले पथिकों का कल्याणकारी अद्वितीय मार्ग – बीच का विश्रामस्थान है। विद्वानों ने दुर्गति में गिरनेवाले जनों को सहारा देनेवाला निश्चल हस्तावलम्बन कहा है ॥ ४० ॥

जिनमंदिर में चूंकि कोई भी जैन मुनि आ कर निवास करता है तथा धर्म का व्याख्यान करता है, जिसे जानने से भव्य जीवों के समूह धर्म में तत्पर होकर संसाररूप समुद्र को पार करते हुए शाश्वतिक सुख का अनुभव करते हैं। इसलिये जिनमंदिर का निर्माण करानेवाला गृहस्थ लोगों में कौनसा पुण्यकारक कर्म नहीं करता है? ॥ ४१ ॥

पुरुष मस्तक को भूषित करनेवाले चूडामणि रत्न के समान भूमण्डल को भूषित करनेवाले जिनमंदिर को कोई विरला ही पुण्यात्मा गृहस्थ निर्मापित करता है ॥ ४२ ॥

जिन महापुरुषों ने मूर्तिमान अपने यश के समान जिनालय का निर्माण कराया है उन्हीं पुण्यशाली महात्माओंने सिद्धों के समान समस्त कार्य को निःशेष किया है – वे सब कार्य को पूर्ण करके कृतकृत्य हो चुके हैं। उन्हींने समस्त पाप को इस प्रकार से नष्ट किया है, जिस प्रकार कि सूर्य विस्तृत अन्धकार को नष्ट किया करता है। तथा उन्हींने चन्द्र-मण्डलगत अपनी चिरस्थायिनी प्रशस्ति को भी लिख दिया है ॥ ४३ ॥

४१) 1 अवधारणाक्रियमाणा धर्मनिरताः. 2 उत्पद्यमानाः सन्तः. 3 तरित्वा. 4 जैनभवनस्य कर्ता
४२) 1 पुण्यवान् पुरुषः। ४३) 1 करणीयम्. 2 पूर्णं कृतम्. 3 सुकृतिभिः. 4 लिखापितं. 5 स्वकीयम्।

167) जीर्णं जिनेन्द्रभवनं वसुधापुरन्ध्र्याः
कर्णावतंस[1] इव कालवशादतीव[2] ।
ये ऽभ्युद्धरन्ति सुकृतैकविलासभाज-
स्तेषां तु कीर्ति वनीजनकर्णपूरः[3] ॥ ४४

168) धर्मः समुद्धृतस्तेन कुलकीर्तिर्नवीकृता ।
न्यरोधि[1] नारकः पन्था येन जीर्णोद्धृति[2]ः कृता ॥ ४५

169) पोतो रत्नप्रपूर्णो झगिति जलनिधौ[1] भिद्यमानो धृतस्तै-
र्देहः कुष्ठेन शीर्णः सुरवपुरुपमस्तैः कृतः प्राणभाजाम्[2] ।
आकृष्यैवान्तकास्या[3]दमृतमित्र तरां पायिताः प्राणिनस्तै-
र्यैः प्रासादो जिनानां पुनरपि नवतां प्रापितः[4] शीर्यमाणः ॥ ४६

170) विश्वं[1] विलङ्घ्य लोभांशाः प्रसरन्तो निवारिताः ।
तेन स्वं द्रविणं येन जीर्णे वेश्मनि योजितम् ॥ ४७

जो अतिशय पुण्यशाली जन पृथिवीरूप पुत्रवती स्त्री के कर्णफूल के समान कालवशात् जीर्णशीर्ण हुये जिनमंदिर का जीर्णोद्धार करते हैं, उनका यश भूमण्डलगत समस्त जन को कर्णफूल के समान सुशोभित करता है ॥ ४४ ॥

जिसने जिनमंदिर का जीर्णोद्धार किया है, उसने धर्म का उद्धार करके अपने वंशकी कीर्ति को नवीन किया है, तथा नरक के मार्ग को रोक दिया है—नरक में जाने से अपने को बचा लिया है ॥ ४५ ॥

जिन्होंने जीर्ण हुए जिनेश्वर के प्रासाद को पुनः नवीन किया है, उन्होंने समुद्र में टूटनेवाली रत्नों से भरी हुई नौका को झट से डूबने से बचा लिया है, उन्होंने कुष्ठरोग से गलित प्राणियों के शरीर को देव-शरीर के समान सुंदर बनाया है, अथवा उन्होंने प्राणियों को यम के मुख से निकालकर उन्हें अतिशय अमृत ही पिलाया है ॥ ४६ ॥

जिसने अपने धन का सदुपयोग जीर्ण जिनमंदिर के उद्धार में किया है, उसने जगत को लांघकर आकाश में फैलनेवाले लोभांशों को रोक दिया है, ऐसा समझना चाहिये। तात्पर्य यह कि, महा लोभ को उत्पन्न करनेवाले धन को जिनमंदिर के निर्माण कार्य में लगानेसे वह लोभ नष्ट होता है ॥ ४७ ॥

४४) 1 कुण्डल इव. 2 अतीव जीर्णम्. 3 कुण्डल इव । ४५) 1 निवारितः. 2 जीर्णोद्धरणम् । ४६) 1 समुद्रे. 2 प्राणिनाम्. 3 यमवदनात्. 4 नवीनं कारापितम् । ४७) 1 संसारः ।

171) स पुमानर्थवज्जन्मा तस्यैवार्थो ऽपि सार्थकः[1] ।
कुले जयध्वजो ऽसौ[2] च येनाकारि[3] जिनालयः ॥ ४८

172) वैडूर्यसूर्यशशिकान्तमसारगल्ल-
नीलादिरत्नबहुभेदमयीं जिनार्चाम्[1] ।
निर्मापयन्ति सुधियः स्फटिकादिरथ्यां[2]
पाषाणभेदमयसत्तनुमात्मशक्त्या[3] ॥ ४९

173) रौक्मीं[1] रीतिमयीं[2] च लेप्यरचितं चित्रितां[3] मृण्मयीं[4]
यद्वा राजनराजपट्टघटितां श्रीखण्डखण्डात्मिकाम्[5] ।
श्रेष्ठां काष्ठमयीं गरिष्ठवपुषं शक्त्यान्यदीयामपि
निर्माप्य प्रतिमां प्रतीतयशसो[6] लोके भवन्त्यत्र ते[7] ॥ ५०

174) कुसंगं दौर्भाग्यं दुरितसुरतिं[1] कूटनिकृतिं[2]
परायत्तां वृत्तिं परिभवभयक्लेशकुपथाम्[3] ।
वियोगं[4] योगं[4] वा प्रियारिपुजनैर्दुःसहतरं
न ते ज्ञास्यन्ते[5] के समवसरणस्था इव जनाः ॥ ५१

जिसने जिनमंदिर को निर्माण कराया है वह अपने कुल में जयध्वज समान है — अपने कुल की विजयपताका को फहरानेवाला है । ऐसे पुरुष का जन्म तथा धन भी सार्थक समझना चाहिए ॥ ४८ ॥

निर्मल बुद्धि के धारक भव्य जीव अपनी शक्ति के अनुसार वैडूर्य, सूर्यकान्त, चन्द्रकान्त, मसारगल्ल और नीलम इत्यादि अनेक भेदयुक्त रत्नों की, स्फटिक की अथवा अनेक प्रकार के विशेष पाषाणों की उत्तम आकृतिवाली प्रतिमा को निर्मापित करते हैं, तथा जो सुवर्ण की, पीतल की, वालु आदि से बनी हुई, चित्रमय और मिट्टी की, चांदी की, राजावर्त नामक मणि की (यह मणि अलसी के पुष्प के समान वर्णवाला होता है), चंदन की लकडी की, तथा श्रेष्ठ काष्ठ से बनी हुई भी दृढ शरीरवाली जिनमूर्ति को अथवा शक्ति के अनुसार अन्य धातुकी भी मूर्ति को बनवाते हैं, वे यहाँ लोक में प्रसिद्ध यश से सुशोभित होते हैं ॥ ४९-५० ॥

प्रतिमा निर्माण करनेवाले सज्जनों को समवसरण में बैठे हुए भव्य जीवों के समान

---

४८) 1 सफलः. 2 पुमान्. ३ कारितम् । ४९) 1 जिनप्रतिमाम्. 2 प्रतोली. 3 उत्तमशरीराम् । ५०) 1 रुक्ममयीम्. 2 पित्तलमयीम्. 3 चित्रकारनिर्मिताम्. 4 मृत्तिकानिर्मिताम्. 5 चन्दनखण्डनिर्मापिताम्. 6 व्याख्यातयशोयुक्ताः. 7 ते पुरुषाः । ५१) 1 रागम्. 2 मायाम्. 3 कुपथां वृत्तिम्. 4 प्रियजनैः सह वियोगं रिपुजनैः सह संयोगम्. 5 न जानन्ति ।

175) अरे यदि समीहसे[1] गमयितुं निशां शारदीं
शशाङ्कधवलीकृताष्टदिशमङ्गनाभिः समम्[2] ।
तदा शिरसि कुर्वता सुचिरमञ्जलिं याच्यसे[3]
मनोमदनसूदनप्रतिकृतेः कृते यत्यताम्[4] ॥ ५२

176) कल्याणसंपदखिलापि वशीकृतोच्चै–
रुच्चाटितं स्वमनसो ननु वैमनस्यम्[1] ।
विद्वेषितं[2] सकलमप्यहितं च दूरात्[3] ।
संस्तम्भितः सुकृतिभिर्हितविप्रयोगः[4] ॥ ५३

177) सत्यंकारो[1] ऽर्पितः स्वर्गमर्त्यशर्म वशीकृतम् ।
शासनं[2] सूचितं मुक्तो पुंसा कारयता[3] जिनम् ॥ ५४ । युग्मम् ।

दुर्जनसंगति, दुर्भाग्य, पाप में प्रेम, असत्य, कुटिलता, पराधीन जीवन, अपमान से उत्पन्न हुआ भय और दुःख का बुरा मार्ग, असह्य ऐसा प्रिय जन के साथ वियोग और वैरी जन के साथ संयोग आदि बाधाएँ प्राप्त नहीं होतीं ॥ ५१ ॥

हे मित्र ! चन्द्र से आठ दिशाओं को शुभ्र करनेवाली शरद् ऋतु की रात्रि को यदि तू अपनी स्त्रियों के साथ आनंद से बिताना चाहता है तो मैं मस्तक पर हाथ जोडकर तुझ से यह याचना करता हूँ कि तू मनोमदनसूदन की – अन्तःकरण से काम को नष्ट कर देनेवाले जिनेन्द्र की – प्रतिमा को प्रतिष्ठित कराने का प्रयत्न कर ॥ ५२ ॥

जिन प्रतिमा का निर्माण करानेवाले पुण्यशाली सत्पुरुषों ने संपूर्ण कल्याणकारी संपत्ति को पूर्णतया अपने आधीन कर लिया है, अपने मन से वैमनस्य को दूर कर दिया है, संपूर्ण ही अहित के विषय में दूर से विद्वेष किया है अर्थात् उसने सर्वथा अपने हितको ही किया है, पुण्यवान भव्यों के होनेवाले अहित को नष्ट किया है, स्वर्ग और मनुष्य के सुख को अपने स्वाधीन करने के लिये मानो सत्यंकार दिया है, (व्यापारी लोग माल अपने को ही मिले इस हेतु से जो विक्रेता को मूल्य का कुछ भाग प्रथम ही दे कर माल को रोक लेते हैं, उसे सत्यंकार कहते हैं ।) तथा मुक्तिविषयक शासन की सूचना की है – वह शीघ्र ही मुक्ति का शासक होनेवाला है ॥ ५३-५४ ॥

५२) 1 वाञ्छसि. 2 सार्धम्. 3 याचनां करोमि. 4 सर्वज्ञबिम्बनिर्मापणाय यत्नं कुरुताम् । ५३) 1 मनःकलुषता. 2 विनाशितम्. 3 D °विदूरात्. 4 सुकृतिभिः हितानां वियोगः दूरात् स्तम्भितो निरोधित इत्यर्थः । ५४) 1 व्यापारीवत् साई दत्ता स्वर्गं प्रति. 2 आज्ञा. 3 निर्मापयता ।

178) मर्त्येन[1] संरचयता प्रतिमाप्रतिष्ठां[2]
आत्मा नरोत्तमपदे गमितः[3] प्रतिष्ठाम् ।
तन्नास्ति यन्न विहितं[4] स्वहितं प्रशस्तं
तन्नास्ति यन्न दुरितं निखिलं निरस्तम् ॥ ५५

179) स्वर्विषय[1]भुक्तिभूमिं स्वहस्तितं सौख्यपत्रमालिखितम् ।
श्रीमुक्तेरिव दूतीं कारयता[2] जिनपतिप्रतिमाम् ॥ ५६

180) सत्पुरुषाणां मध्ये कृतो निबन्धो[1] निवारितं पापम् ।
जिनबिम्बविधापनतः समासतः फलमिदं सिद्धम् ॥ ५७

जिन प्रतिमा की प्रतिष्ठा करानेवाले पुरुष ने अपनी आत्मा को पुरुषोत्तम के पद पर प्रतिष्ठित कराया है–उत्तम पुरुष की अवस्था को प्राप्त कराया है । ऐसा प्रशंसनीय कोई आत्महित नहीं है जिसे इसने नहीं किया हो, तथा ऐसा कोई पातक नहीं है, जिसे उसने नष्ट नहीं किया हो ॥ ५५ ॥

श्रेष्ठ मुक्ति की दूती जैसी जिनेन्द्र की प्रतिमा को निर्मापित करानेवाले सद्गृहस्थने स्वर्गीय विषयभोग की भूमि को अपने हाथ में कर लिया, ऐसा मानो सुख का पत्र (रसीद), ही लिख दिया है । तात्पर्य यह है, जिन प्रतिमा को निर्माण करानेवाला भव्य जीव शीघ्र ही स्वर्ग व मोक्ष के सुख को प्राप्त किया करता है ॥ ५६ ॥

जिन प्रतिमा की प्रतिष्ठा-विधि से मनुष्य सत्पुरुषों के समूह में अपना निबंध–संबंध–स्थापित कर लेता है, तथा पाप को रोक देता है । यह जिनबिंब स्थापन का फल संक्षेप से सिद्ध है–कहा गया है ॥ ५७ ॥

५५) 1 मनुष्येन. 2 P °प्रतिमापदिष्टा. अप्रतिष्ठप्रतिमा. 3 नीतः. 4 कृतम् । ५६) 1 स्वर्गगोचर. 2 निर्मापकेन । ५७) 1 निदानं वा संबन्धः ।

181) भ्रूभङ्गानतभूमिपालमखिलं[1] न प्रार्थये भूतलं
दूरादेव पराकरोमि[2] तमपि स्वर्गाङ्गना[3]संगमम् ।
एतस्मिन् भवसागरे निपततामालम्बने निश्चला
भक्तिः केवलमस्तु[4] नाथ भवतः पादारविन्दद्वये ॥ ५८

इति श्री-जयसेन-मुनि-विरचिते धर्मरत्नाकरशास्त्रे आहारदान-
जिनगृहनिर्म[illegible]र्णनो नाम तृतीयो ऽवसरः ॥ ३ ॥[5]

हे प्रभो ! केवल मेरे भौंहों की कुटिलता से जिसके भूमिपाल नम्र हुए हैं ऐसी अखिल भूमि को भी प्रार्थना मैं नहीं करना चाहता तथा स्वर्गीय देवांगना के उस संगम को भी मैं नहीं चाहता – उस से दूर ही रहना चाहता हूँ । मैं तो केवल आपके चरणारविन्दों की उस भक्ति का चाहता हूँ, जो इस संसार–सागर में पडनेवाले जनोंको निश्चल हस्तावलम्बन देती है ॥५८॥

इस प्रकार तृतीय अवसर समाप्त हुआ ॥ ३ ॥

५८) 1 षट्खण्ड. 2 तिरस्करोमि. 3 जी गानाम्. 4 भवतु. 5 P °इति तृतीयोवसरः ।

[४. चतुर्थो ऽवसरः]

[साधुपूजाफलम्]

182) मुक्ताफलानि बहुशो ऽपि सुवृत्तभाञ्जि
रन्ध्रान्वितानि गुणार्त्यसहस्तनाति ।
गुण्यो गुणैरतितरां परिपूरयेत
तद्वत्कृती स्वहृदयं प्रविभूषणाय ॥ १

183) बलिबन्धनमालोक्य[1] युक्तं पात्रपरीक्षणम् ।
सो ऽवश्यं बध्यते मुग्धो निःशीलेभ्यो ददाति यः ॥ २

184) मातापितृकामदुघाप्रभृतीन् जयति प्रसत्ति[1]रिह यस्य[2]
भविनां सहगामिफलः[3] संघो ऽसौ पापा[4]त्पातु ॥ ३

जैसे डोरा डालने के कार्य में समर्थ कोई कुशल कारीगर बहुतसे मोती अतिशय गोल होते हुए भी यदि वे छिद्रयुक्त हो तो वह उसमें डोरा डालता है, वैसे ही भव्य जीव सदाचारादि गुणों से युक्त होकर भी उसने अपना हृदय अधिक उज्ज्वल करने के लिये गुणों से अतिशय परिपूर्ण करना चाहिये ॥ १ ॥

बलिराजा के बन्धन को देखकर पात्रपरीक्षा के विना बलि राजा के अविवेकपूर्वक दान देने व इसी कारण उस के वामनरूपधारी–विष्णु के बन्धन में पडने का विचार करके– दाता को पात्र की परीक्षा करना उचित है । कारण कि जो मूर्ख निःशील–सदाचाररहित अपात्र–जनों के लिये देता है वह अवश्य बांधा जाता है–कर्मबन्धन में पडता है ॥ २ ॥

जिस संघ को प्रसन्नता–वात्सल्यभाव–माता, पिता और कामधेनु आदि को जीतती है अर्थात् उनसे भी वह भक्तों का अधिक हित करती है तथा जिसकी प्रसन्नता का फल जीव के

चूंकि सब वस्तुओंकी उत्पत्ति आरम्भादिके द्वारा होती है, इसलिये दान देने में हिंसा होती है; तथा दान देने को उद्यत हुए जन को ' तू दान मत दे ' ऐसा निषेध करने पर अन्तराय होता है; इस लिये इस प्रकरण में आत्मज्ञों को चुपचाप रहना योग्य है । ऐसा क[illegible]नेवाले अज्ञानी के विषय में सूत्रकार का ऐसा सूत्र कहते हैं ॥ २ ॥

जो दान की प्रशंसा करते हैं वे प्राणियों के वध की इच्छा करते हैं । तथा जो उस दान का निषेध करते हैं वे अंतराय को करते हैं ॥ २ * १ ॥

---

१) 1 न ज्ञात्वा ऽज्ञात्वेत्यर्थः. 2 कथंभूतास्ते वराकाः निजोदरपूरकाः. 3 कथंभूतानां तेषां वराकाणाम्, कर्णेजपानां जनैर्निन्द्यानाम् । २) 1 आरम्भादि भवति. 2 तस्मिन् दाने निषेधिते सति अन्तरायो भवति. 3 हिंसा दाने कथने ऽपि. 4 कथयन्ति. २*१) 1 p 'उ', तु पुनः. 2 वहं वधं हिंसाम्. D वधं. 3 जीवानाम्, D प्राणिनां. 4 पुनः निषेधः, D पुनः. 5 D प्रतिषेधन्ति ।

291) लिङ्गपाशाः[1] सुदुर्बुद्धिमारोप्येत्थं सुकर्मणाम्[2] ।
गृह्णन्ति निभृताः[3] सर्वे बका इव हि धार्मिकाः[4] ॥ ३

292) नो जानन्ति जिनागमं जडधियो नो सौगताद्यागमं
नो लोकस्थितिमुज्ज्वलामृजु[1]महो व्यामोहयन्तो ऽन्वहम्[2] ।
दातॄणामथ गृह्णतामसुमतां[3] कृत्वान्तरायं[4] तरां
मिथ्यादेशनया नयन्ति नरकं लोकं व्रजन्ति स्वयम् ॥४

293) महानुभावा भवमुत्तरीतुं प्राणैरपि प्राणिगणोपकारम् ।
कुर्वन्ति केचित्करुणार्द्रचित्ताश्चन्द्रा इवाल्हादितजीवलोकाः ॥ ५

294) अन्ये ऽमुनैव परितापितविश्वविश्वा
वैश्वानरा इव नरा निरये[1] रयेण[2] ।
गन्तुं द्वयप्रकृतयः[3] कथयन्ति मिथ्या
किं कुर्महे वयमहो विषमो हि मोहः ॥ ६

तथा चोक्तं कलिकालसर्वज्ञैः—

जो कुलिंगी साधु पुण्यकार्यों में ऐसी दुर्बुद्धि को आरोपित कर के विनीत भाव से सब को ग्रहण करते हैं वे बगुला पक्षियों के समान धार्मिक हैं ॥ ३ ॥

वे दुष्ट बुद्धि न तो जिनागम को जानते हैं, न बौद्ध आदिकों के आगम को जानते हैं और न निर्मल लोकव्यवहार को भी जानते हैं । वे भोले मनुष्यों को प्रतिदिन मुग्ध करते हुये दाता और ग्राहक प्राणियों के मध्य में दान देने का अतिशय निषेध कर के मिथ्योपदेश के द्वारा दूसरे लोगों को नरक में ले जाते हैं और स्वयं भी नरक में जाते हैं ॥ ४ ॥

चंद्र के समान सब जीवों को आनंदित करनेवाले कितने ही महानुभाव संसार से पार होने के लिये मन में अतिशय दयालु हो कर अपने प्राणोंसे (प्राण देकर) भी प्राणिसमूह का उपकार किया करते हैं ॥ ५ ॥

अग्नि के समान समस्त विश्व को संतप्त करनेवाले दूसरे जन स्त्री और नपुंसक की प्रकृति से युक्त — मायाचारी — हो कर शीघ्रतासे नरक में जाने के लिये मिथ्या उपदेश करते हैं । इस विषय में हम क्या करें ? क्योंकि मोह भयानक है ॥ ६ ॥

इस विषय में कलिकालसर्वज्ञ ने कहा भी है —

३) 1 लिङ्गमेव पाशः तिर्यग्जीवबन्धनो येषां ते लिङ्गिपाशाः. 2 पुण्यवतां धनयुक्तानां राजादीनाम्. 3 मायया प्रच्छन्नाः । ४) 1 सरलं जनं लोकं मोहयन्तः सन्तः. 2 दिनं दिनम्. 3 प्राणिनाम्. 4 विघ्नं विनाशम् । ६) 1 नरके. 2 वेगेन. 3 किंचिदुपकारकिंचित्संतापकारिणः द्वयप्रकृतयः ।

295) दुराग्रहग्रहग्रस्ते विद्वान् पुंसि[1] करोति किम् ।
कृष्णपाषाणखण्डेषु मार्दवाय न[2] तोयदः[3] ॥ ६*१

296) प्रायः संप्रति कोपाय सन्मार्गस्योपदेशनम् ।
निर्लूननासिकस्येव विशुद्धादर्शदर्शनम् ॥ ६*२

297) तथापि किंचित्कथयामि युक्तं[1] मध्यस्थ[2]लोकस्य खलूपयुक्तम्[3] ।
मोहव्यपोहाय[4] विहाय[5] कृत्यं[6] स्वार्थात्परार्थो महतां महिष्ठः ॥ ७

298) यावद्वर्षं ननु जिनवृषो वर्षति स्वर्णवर्षं
हर्षोत्कर्षं प्रणयि[1]शिखिनां बिभ्र[2]दुर्वीगताना[3]म् ।
नो संदिग्धं[4] न च विरचितं केनचिन्मादृशेदं
प्रोक्तं प्रोच्चैरविचलवचोविश्रुतैः श्रीश्रुतज्ञैः ॥ ८

दुराग्रह रूप पिशाच से पीडित मनुष्य के विषय में भला विद्वान् क्या कर सकता है ? अर्थात् वह भी उसे समझाने में समर्थ नहीं होता है । सो ठीक भी है, क्योंकि, मेघ काले पत्थर के टुकडों पर बरस कर के कुछ मृदुता को उत्पन्न नहीं कर सकते हैं ॥ ६*१ ॥

जिस प्रकार नकटे को निर्मल दर्पण का दिखलाना क्रोध को उत्पन्न करनेवाला होता है, उसी प्रकार वर्तमान में सन्मार्ग का उपदेश देना भी प्रायः कोप का कारण हुआ करता है ॥ ६*२ ॥

इस प्रकार यद्यपि वर्तमान में समीचीन उपदेश का देना भी क्रोध का जनक होता है तो भी मैं मध्यस्थ जन को लक्ष्य कर के उनके मोह को नष्ट करने के लिये स्वार्थ कार्य को छोडता हुआ कुछ योग्य उपदेश को करता हूँ, जो कि उनके लिये उपयोगी हो सकता है । और यह ठीक भी है, क्योंकि, महान् पुरुष स्वार्थ की अपेक्षा परोपकार को ही अधिक महत्त्व दिया करते हैं ॥ ७ ॥

समस्त भूमण्डलगत याचक रूपी मोरों को अतिशय आनन्दित करने के लिये एक वर्ष-तक जिनवृष – तीर्थंकर प्रभु – सुवर्ण की वृष्टि को किया करते हैं । यह वचन न तो संदिग्ध और न मुझसरीखे किसी अल्पज्ञ पुरुष के द्वारा कहा गया है । किन्तु उसे अतिशय निश्चल (सत्य) भाषण से ख्याति पाये हुए श्री श्रुत के ज्ञाता पूर्वाचार्यों ने ही कहा है ॥ ८ ॥

६*१ 1 पुरुषे. 2 न भवति. 3 मेघः । ७) 1 कथंभूतम् उपदेशम्. 2 कस्य. 3 उपदेशम्. 4 कस्मै मोहविनाशाय. 5 परित्यज्य. 6 निजकार्यम् । ८) 1 शिष्य. 2 धारयन्. 3 पृथ्वीगतानाम्. 4 संदेहरहितम्. ।

299) निष्क्रान्तिकाले[1] सकला जिनेन्द्रा यादृच्छिकं[2] दानमतुच्छ[illegible]ः ।
य[illegible]न्ति विच्छिन्नदरिद्रभावं मेघा इवाम्भो भुवि निर्विशेषम् ॥ ९

300) दिशन्त्येते[1] मोहान्न खलु निखिलेभ्यः[2] स्वविभवं[3]
भवन्तो विज्ञानैस्त्रिभिरपतितैस्तीर्थपतयः[4]
भवे पूर्वे ऽभ्यस्तैरनुगतधियो नाप्यकुशलं[5]
प्रवृत्तेः[6] कर्मास्याः किमविकसितं[7] कारणमिह[8] ॥ १०

301) किंतु दानान्तरायस्य कर्मणो ऽपचये[1] सति ।
[illegible]मिके भावे दानमुक्तं जिनागमे ॥ ११

302) अर्थे ऽपि तीर्थकृन्नाम[1] नामकर्मोदयाद[2]यम्[3] ।
दयाकरो महासत्त्वः सर्वसत्त्वोपकारकः ॥ १२

जिस प्रकार मेघ बिना किसी भेदभाव के पृथिवी पर सर्वत्र जल को दिया करते हैं उसी प्रकार समस्त तीर्थंकर दीक्षा ग्रहण के समय में महती इच्छा के वशीभूत हो कर–निरीहवृत्ति से–सबके लिये बिना किसी प्रकार के भेदभाव के दरिद्रता को नष्ट करनेवाले इच्छानुरूप दान को दिया करते हैं ॥ ९ ॥

ये अप्रतिपाति तीन ज्ञानों–मति, श्रुत, एवं अवधि–के साथ तीर्थंकर हो कर पूर्व भव में अभ्यस्त उक्त तीनों ज्ञानों से अनुगत बुद्धि हो कर समस्त प्राणियों के लिये कुछ अज्ञानता से दान नहीं दिया करते हैं। साथ ही वे इस दान के रूप में प्राणियों का कुछ अहित करते हों, सो भी नहीं है। फिर उनकी दान प्रवृत्ति का कारण यहाँ कौनसा विकासरहित कर्म समझा जाय? ॥ १० ॥

परन्तु दानान्तराय कर्म का अपचय–सर्व घातिस्पर्धकों का उदयक्षय–होने पर क्षायोपशमिक दान भाव आत्मा में प्रगट होता है और तब उनकी दान में प्रवृत्ति होती है, ऐसा जिनागम में कहा है ॥ ११ ॥

जिस प्रकार (दानान्तरायके क्षय के साथ) तीर्थंकर नामक नामकर्म के उदय से दया को खानि–अतिशय दयालु, महाबली–(या महात्मा) और समस्त प्राणियों के उपकार में निरत ये तीर्थंकर जिनदेशना में–धर्मदेशना में–प्रवृत्त होते हैं उसी प्रकार वे दानान्तराय के क्षयोपशम जनित दान–गुण से प्रेरित हो कर वे गृहस्थावस्था में अर्थ के प्रदेशन में–सुवर्णादि के दान में–भी निरन्तर

९) 1 दीक्षाकाले. 2 यदृच्छया वाञ्छितम् । १०) 1 यच्छन्ति. 2 याचकेभ्यः. 3 स्ववैभवं प्रयच्छन्ति. 4 कथंप्रकृतयः तीर्थपतयः, त्रिभिर्ज्ञानैः संयुक्ताः सन्तः. 5 नायुक्तम्. 6 प्रवृत्तेः. 7 पुण्यरहितं कारणम्, न पुण्यसहितं कारणमित्यर्थः. 8 लोके । ११) 1 विनाशे । १२) 1 तीर्थंकरः. 2 अहो. 3 तीर्थकृत् ।

303) प्रदेशने प्रवर्तेत देशनायामिवानिशम् ।
प्रशस्यते तथापीदं[1] देशनेव प्रदेशनम् ॥ १३ ॥ युग्मम् ।

304) नाशुभस्य फलं दानं निदानं[1] वा निदर्शनम् ।
कर्मणः क्वापि सिद्धान्ते दीयमानं विधानतः ॥ १४

305) शुभे कृत्ये[1] कृते[2] पूर्वे[3] सर्वैः सर्वार्थवेदिभिः ।
प्रवर्तितव्यमन्यैश्च न्याय एष सतां मतः ॥ १५

306) वचो ऽप्यशेषमेतेषां प्रमाणीक्रियते बुधैः ।
विशिष्टा किं पुनश्चेष्टा दृष्टादृष्टाविरोधिनी ॥ १६

307) यथा तपस्तथा शीलं तीर्थनाथैरनुष्ठितम् ।
तथा दानमपि श्रेष्ठमनुष्ठेयमनुष्ठितम् ॥ १७

308) निष्क्रान्ता[1] यद्भुवनपतयो नाभिजातप्रमुख्याः
संघार्यैते चतुरवगमा[2] मार्गमादर्शयन्ति ।
तूष्णींभावादपि विहरणात्प्रीणयन्तो ऽङ्गिजातं
ब्रूयुर्देयं स्वहितनिरतैस्तन्न किं धार्मिकाणाम् ॥ १८

प्रवृत्त रहते हैं तो भी इस सुवर्णादि दान की उस देशना के समान ही प्रशंसा की जाती है ॥ १२–१३ ॥

यह दान अशुभकर्म का फल अथवा कारण है, इस प्रकार का विधिपूर्वक आगम में दिया जानेवाला उदाहरण कहीं पर भी उपलब्ध नहीं है ॥ १४ ॥

सर्वज्ञों ने पहले शुभ कर्म के करनेपर तदनुसार सब अन्य (छद्मस्थ भी) प्रवृत्त हुआ करते हैं, यही न्याय सज्जनों को अभीष्ट है॥१५॥

विद्वान् उनके – सर्वज्ञों के–संपूर्ण वचन को प्रमाण मानते हैं । ठीक है – क्या कभी ऐसी कोई प्रवृत्ति देखी गई है जो प्रत्यक्ष के विरुद्ध हो ? अर्थात् नहीं देखी गई ॥ १६ ॥

तीर्थंकरोंने जिस प्रकार तप और शील का परिपालन किया है उसी प्रकार उन्होंने आचरणीय उस श्रेष्ठ दान का भी परिपालन किया है ॥१७॥

नाभिराज के पुत्र भगवान ऋषभनाथ को आदि लेकर इन सब ही लोकनायकोंने–

१३) 1 P °यथापीदं । १४) 1 कारणम् । १५) 1 करणीये. 2 कारणाय. 3 P °पूर्वैः । १८) 1 दीक्षां गताः. 2 ज्ञानवन्तः ।

309) दानं निदानं[1] यदि पातकानां संपाद्यते[2] नैव तदा मुनीन्द्राः ।
दद्युस्त्वनिन्द्या निरवद्यविद्याचतुष्टयाढ्याः सितसच्चरित्राः[3] ॥ १९

310) अयुक्ते न प्रवर्तन्ते मर्त्यनाथा[1]स्तथाविधाः ।
रागद्वेषप्रमादादिविमुक्ता मुक्तिसंमुखाः ॥ २०

311) न ह्युत्तरारम्भभवो ऽपि दोषो दातुर्भवेन्निश्चितमत्र कश्चित् ।
परोपकाराय दयापरस्य प्रवर्तमानस्य शुभाशयस्य ॥ २१

312) अन्यथा हि महादानं महारम्भनिबन्धनम्[1] ।
न दद्युर्विधिना धन्या विवीर्या[2] निधनं[3] धनम् ॥ २२

313) एष्टव्यमत एवेदं गुर्वादेरपि नान्यथा ।
अन्नादि देयं व्याध्यादेः कदाचित्स्याद्विधायकम् ॥ २३

तीर्थंकरों ने—जन्मजात मति, श्रुत और अवधि इन तीन ज्ञानों के साथ दीक्षित हो कर चतुर्थ मनःपर्यय ज्ञान को भी प्राप्त करते हुए संघ के लिये मौनपूर्वक भी मार्ग को दिखलाया है। पश्चात् विहार कर के उन्हों ने प्राणिसमूह को प्रसन्न करते हुए उस मार्ग की प्ररूपणा भी की है। इसलिये जो सत्पुरुष आत्मकल्याण में उद्यत हैं उन्हें क्या धर्मात्मा जन के लिये आहारादि को नहीं देना चाहिये ? अवश्य देना चाहिये ॥१८॥

यदि दान पापोंका कारण होता तो निर्दोष चार ज्ञानों के साथ उत्तम चारित्र को धारण करनेवाले प्रशंसनीय मुनीश्वर-तीर्थंकर—उस दान को कभी भी नहीं देते। कारण कि, राग, द्वेष व प्रमादादि दोषों से रहित हो कर मुक्ति के संमुख हुए वैसे महापुरुष—तीर्थंकर—अयोग्य कार्य में प्रवृत्त नहीं हो सकते हैं ॥ १९-२० ॥

जो दयालु दाता निर्मल अभिप्राय से परोपकार करने में प्रवृत्त हो रहा है उसे निश्चय से कोई उत्तर आरम्भसे उत्पन्न हुआ दोष भी नहीं लग सकता है ॥ २१ ॥

यदि वह दान आरम्भजनित दोष से संगत होता तो फिर महादान (विपुलदान) तो अत्यधिक आरम्भ का कारण हो सकता था। तब वैसी अवस्था में विशिष्ट वीर्य-शाली, पुण्यपुरुष विधिपूर्वक नश्वर धनका दान कैसे कर सकते थे ? (परन्तु चूंकि उन विचारशील महापुरुषोंने प्रचुर दान दिया है अतएव इससे सिद्ध है कि वह दान आरम्भजनित दोष से दूषित नहीं है) ॥ २२ ॥

यदि दान आरम्भजनित पाप का कारण होता तो फिर कोई गुरु—मुनि—आदि सत्पा-

१९) 1 कारणम्. 2 P °संपद्यते. 3 कविगमकवादिवाग्मिरूपाः । २०) 1 राजानः । २२) 1 कारणम्. 2 PD पराक्रमयुक्ताः. 3 D °वीर्याऽनिधनं. ।

314) प्रत्तं[1] प्रबन्धेन[2] गिरा गुरूणां साधर्मिकेभ्यो भरतेन दानम् ।
अन्यैश्च[3] धन्यैर्धनसार्थवाहमुख्यैः प्रभूतैः[4] समयप्रासैः[5] ॥ २४

315) कल्याणहेतुस्तदभूदमीषां[1] नानर्थसंपादि निरर्थकं वा ।
तीर्थाधिनाथप्रथमान्नदानं दातुः शिवाय प्रथितं निदानम्[2] ॥ २५

316) मुख्यं च धर्मस्य चतुर्विधस्य[1] प्रोक्तं जिनेन्द्रैः समये समस्तैः ।
तीर्थान्तरीयैः कथितं च शिष्टं दानं जिनानां नितरामभीष्टम् ॥ २६

317) बाह्यं तु पञ्च बाह्यं यत्कारणं दानवारणे ।
अमीभ्यो दृश्यते नूनं न चादृष्टं प्रकल्प्यते ॥ २७

318) स्वयं च सर्वं गृह्णन्ति गृद्धा गृध्रा[1] इवामिषम् ।
कयापि भङ्ग्या निर्भाग्या भङ्गमन्यस्य कुर्वते ॥२८

त्रोंके लिये भी उस के देने की इच्छा नहीं कर सकता था। इस के अतिरिक्त कदाचित् अन्नादि देय वस्तु रोगादि का भी कारण हो सकती है । पर इस से उसे पाप का कारण नहीं माना जा सकता ॥ २३ ॥

गुरुजनों के सदुपदेश से सन्दर्भपूर्वक भरत चक्रवर्ती ने तथा धन नामक प्रमुख व्यापारी आदि को लेकर आगम प्रसिद्ध अन्य भी बहुतसे पुण्यशाली पुरुषों ने साधर्मी जनों के लिये दान दिया था और वह दान भरतादि दाताओं तथा पात्रों के भी कल्याण का कारण हुआ है, वह न तो उन के अनर्थ का–आपत्ति का–कारण हुआ है और न व्यर्थ भी हुआ है। तीर्थंकरों के लिये जो प्रथम बार आहारदान दिया जाता है वह दाता के लिये मुक्ति का कारण होता है, यह आगम में प्रसिद्ध है ॥ २४–२५ ॥

सब ही जिनेन्द्रोंने दान, शील, पूजा और तप इस चार प्रकार के धर्म में दानधर्म को मुख्य कहा है । अन्य धर्मानुयायियों ने भी उस दान का वर्णन किया है । यह दानधर्म जिनेश्वरों को अतिशय अभीष्ट है ॥ २६ ॥

दान निषेध में जो पाँच प्रकार के कारण इन लोगों से कहे गये हैं वे इनके लिये ही दीखते हैं । जो अदृष्ट है अर्थात् जो नहीं दीखता है उसकी कल्पना नहीं की जाती है ॥ २७ ॥

जिस प्रकार गीध पक्षी (अन्य पक्षियों को बाधा पहुँचा कर) स्वयं ही सब मांस का ग्रहण किया करते हैं, उसी प्रकार भाग्यहीन जन लोलुपता के वश हो कर स्वयं तो सब कुछ ग्रहण करते हैं, परन्तु दूसरों के लिये किसी भी बहाने से उस दान में बाधा पहुँचाया करते हैं ॥२८॥

---

२४) 1 दत्तम्. 2 PD उपदेशेन. 3 प्रत्तं दत्तम्. 4 प्रचुरैः. 5 श्रावकाणां मध्ये मुख्यैः D श्रावकाणां । २५) 1 भरतादीनाम्. 2 कारणम् । २६) 1 दानपूजाशीलतपसः चतुर्विधस्य धर्मस्य । २८) 1 D गृद्धा ।

319) परो व्यामोह्यते येन गम्यते दुर्गतौ स्वयम् ।
क्रियते शासनोच्छेदो धिगीदृक्[1]कलिकौशलम् ॥ २९

320) विज्ञप्तिः सा भवतु भविनां[1] सा च वाचां प्रवृत्ति–
श्चेतोवृत्तिः कलिलविकला सैव सा कापि शक्तिः
आज्ञा सैव प्रभवतु यया शक्यते संविधातुं
मोहापोहः स्वपरमनसोः शासनाभ्युन्नतिश्च ॥ ३०

321) अन्नादिदाने ऽथ भवेदवश्यं प्रारम्भतः प्राणिगणोपमर्दः[1] ।
तस्मान्निषिद्धं ननु नेतियुक्तं यूकाभयान्नो परिधानहानम्[2] ॥ ३१

322) पापाय हिंसेति निवारणीया दानं तु धर्माय ततो विधेयम्[1] ।
दुष्टा दशानामुरगादिदष्टा यैवाङ्गुली सा किल कर्तनीया ॥ ३२

323) कृष्यादि कुर्वन्ति कुटुम्बहेतोः पापानि चान्यानि समाचरन्ति ।
देवादिपूजादि विवर्जयन्ति हिंसां भणित्वेति कथं[1] न मूढाः ॥ ३३

जो दूसरे के लिये व्यामोह उत्पन्न करता है– उसे भ्रान्ति में पाडता है– वह स्वयं दुर्गति को प्राप्त होता हुआ जैन धर्म को नष्ट करता है। उस के इस प्रकार के पाप की (कलियुगकी) कुशलता को धिक्कार है ॥२९॥

जिसके आश्रय से अपने और अन्य सार्धर्मिकों के मन के मोह को नष्ट कर के धर्म की उन्नति की जा सकती है वही भव्यों की विज्ञप्ति, वही वचनप्रवृत्ति, वही पापरहित मनोवृत्ति, वही कोई अपूर्व शक्ति और वही आज्ञा प्रभावशालिनी हो सकती है ॥३०॥

अन्नादि कें देने में चूंकि पीसने, कूटने एवं पकाने आदिका प्रकृष्ट आरम्भ होता है और उस आरम्भ से प्राणिसमूह की हिंसा होती है, इसीलिये अन्नादि दानका निषेध किया जाता है, ऐसा जो कहता है उसका वह कहना युक्तियुक्त नहीं है । कारण कि जुओं के भय से कुछ वस्त्रों को नहीं छोडा जाता है ॥ ३१ ॥

चूंकि हिंसा पाप का कारण है अतः उसका निषेध करना योग्य है । परन्तु दान तो धर्म का कारण है, अत: उसका निषेध न करके विधान करना ही योग्य है । उदाहरणार्थ, दस अँगुलियोंमें से जो अंगुली सर्पने काटने से दूषित बनी है उसे ही कटवाया जाता है ॥ ३२ ॥

---

२९) 1 PD पापं । ३०) 1 संसारिजीवानाम् । ३१) 1 D °पमर्दत:. 2 व[illegible]म् । ३२) 1 कर्तव्यं दातव्यम् । ३३) 1 ते कथं न मूढा भवन्ति अपि तु भवन्ति ।

324) संत्यज्य पूज्यं जननीजनादि ये दुष्टचेष्टामतिचेष्टयन्ति ।
तेषां भवन्तो ऽपि भवन्ति तुल्याः सक्ता[1] गृहे देवगुरूंस्त्यजन्तः ॥ ३४

325) अथाप्यनारम्भवतो[1] न युक्तं प्रारम्भणं धर्मनिमित्तमेव ।
द्रव्यस्तवो[2] हन्त गतो ऽन्तमेवं ध्वस्तः समस्तो गृहमेधिधर्मः ॥ ३५

326) द्रव्यस्तवः प्रधानो धर्मो गृहमेधिनां यतो ऽभिदधे ।
द्रव्यस्तवस्य विरहे भवत्यभावस्ततस्तस्य ॥ ३६

327) युक्त्यागमानगतं संगतमुपगन्तुमीदृशं न सताम् ।
द्रव्यस्तवभावस्तवरूपो धर्मो जिनैर्जगदे[1] ॥ ३७

328) जन्माभिषेकादिमहं जिनानां व्याख्यानधात्रीरचनां च चित्राम् ।
कुर्वन्ति सर्वे त्रिदशाधिपाद्या नन्दीश्वरादौ महिमानमुच्चैः ॥ ३८

जो कुटुम्ब के निमित्त से कृषि आदि आरम्भ कार्यों को तथा आवश्यकतानुसार दूसरे भी पापकार्यों को तो करते हैं, परन्तु हिंसा के कारण बतलाकर देवपूजा एवं गुरुपूजा आदि शुभ कार्यों का निषेध करते हैं; उन्हें मूर्ख कैसे न समझा जाय ? अर्थात् अवश्य ही वे मूर्ख आत्मवंचना कर के अपने को नरकादि दुर्गतिका पात्र बनाते हैं ॥ ३३ ॥

हे शुभ कर्म निषेधक जनो ! जो अपने पूज्य माता पिता आदि को त्याग कर अतिशय निंद्य आचरण को करते हैं, आप भी उन्हीं के समान हैं । क्यों कि आप गृहस्थाश्रमी होते हुए भी घरपर आये हुए देव एवं गुरु आदि का अनादर करते हैं ॥३४॥

यदि यहाँ यह कहा जाय कि, जो स्वयं आरम्भसे रहित है उसके लिये धर्म के निमित्त से भी प्रकृष्ट आरम्भ करना योग्य नहीं है । तो उस के उत्तर में यह खेद के साथ कहना पडेगा कि इस प्रकार से तो द्रव्यस्तव--द्रव्यपूजा व दान आदि जो कि गृहस्थ का धर्म है वह सब समाप्त हो जावेगा । ॥३५॥

चूंकि गृहस्थों के धर्म में द्रव्यस्तव को प्रधान कहा गया है, इसीलिये उस द्रव्यस्तव के नष्ट हो जाने पर गृहस्थ धर्मका विनाश होगा ही ॥ ३६ ॥

धर्म के निमित्त आरंभ करना योग्य नहीं है । यह उपर्युक्त कथन चूंकि युक्ति और आगम का अनुसरण नहीं करता, इसलिये वह सज्जनों के स्वीकारने योग्य नहीं है । कारण यह कि जिनेश्वरों ने धर्म को द्रव्यस्तव और भावस्तव रूप से दोनों भी प्रकार का कहा है ॥३७॥

इन्द्रादिक तीर्थंकरों के जन्माभिषेकादि उत्सव को, विचित्र व्याख्यान धात्री— समवस-

३४) 1 आसक्ताः । ३५) 1 आरम्भरहितस्य. 2 दानादयः । ३७) 1 कथितम् । ३८) 1 D चरित्राम् ।

329) अष्टापदाद्रौ[1] भरतादिभूपैर्वेश्मानि बिम्बानि च कारितानि ।
हर्षेण चक्रिप्रमुखैर्नृमुख्यैः पूजा जिनानां विहिता हिता च ॥ ३९

330) साधर्मिकेभ्यो भरतेन दत्तं भोज्यादि भक्त्या विविधं विधाय ।
मोक्षाय निःशेषमभूदमीषां[1]मेतज्जिनोक्तं क्रियमाणमेव ॥ ४०

331) ग्रामं क्षेत्रं वाटिकां कोषधान्यं वाहं[1] हट्टं देवदेवाय भक्त्या ।
दत्त्वा केचित्पालयित्वा तथान्ये धन्याः सिद्धाः साधुसिद्धान्तसिद्धाः ॥ ४१

332) आचेष्टन्ते सर्वकार्याण्यनार्या भार्यादीनां सर्वथा सर्वदा ये ।
देवादीनां नैव दीनास्तु मन्ये धर्मे द्वेषो निश्चितः कश्चिदेषाम्[1] ॥ ४२

333) आरम्भश्चेत् पापकार्ये ऽपि कृत्यो[1] धर्मायासौ[2] संविधेयः[3] सुधीभिः ।
वोढव्या[4] चेच्चेटिकाया उपानद्[5] वाढं व्यूढा[6] तद्[7]वरं स्वामिनः सा[8] ॥ ४३

रण भूमि —की रचना को और नन्दीश्वरादि पर्वों में अष्टाह्निक पूजा महोत्सव आदिको ठाट बाटसे करते हैं । इससे सिद्ध है कि धर्म के लिये आरम्भ करना अयोग्य नहीं है ॥३८॥

भरत आदि राजाओं ने कैलाश पर्वतपर जिन मन्दिर और जिन प्रतिमाओं का निर्माण कराया है । तथा मनुष्यों में प्रमुख चक्रवर्ती आदि राजाओं ने जिनेन्द्रों की हितकारक पूजा आनन्दसे की है ॥३९॥

भरत चक्रवर्तीने साधर्मिक जनों को भक्तिपूर्वक अनेक प्रकार का आहारादि दान दिया था । और यह सब धर्मकार्य चूंकि आगमोक्त विधि से ही किया गया था, अतएव वह उनकी मुक्ति का कारण हुआ ॥ ४० ॥

कितने ही सज्जन देवाधिदेव के लिये—जिनालय आदि के संरक्षण के लिये— ग्राम, खेत, उद्यान, कोष-भंडार, धान्य (गेहूँ—चावल आदि) , वाह—घोडा या नाव आदि—और हाट—बाजार या दूकान को देकर तथा दूसरे कितने ही भाग्यशाली सज्जन इन सब दी गई वस्तुओं का संरक्षण कर के साधु सिद्धान्त में सिद्ध—मुनिधर्म में निपुण—होते हुए मुक्ति को प्राप्त हुए हैं ॥४१॥

जो दुष्ट पुरुष पत्नी व पुत्र आदि के सर्व कार्योंमें सर्वदा सर्व प्रकार से प्रयत्नशील रहते हैं, परंतु देव, गुरु व शास्त्र आदि के लिये कुछ नहीं करते हैं उन बेचारों का धर्म के विषयमें कोई अपूर्व द्वेष निश्चित है ॥ ४२ ॥

जब पाप कार्य में भी आरंभ करना पडता है तब उसे धर्म के निमित्त तो करना ही

३९) 1 कैलासाद्रौ । ४०) 1 भरतादीनाम् । ४१) घोटकवृषभादि । ४२) 1 दीनानामनार्याणाम् । ४३) 1 करणीयः. 2 आरम्भः. 3 करणीयः. 4 वाहितव्या. 5 पाणही. 6 वाहिता गृहीता. 7 ततः. 8 सा उपानत् पाणही ।

334) पापारम्भविवर्जनं गुरुयशोराशेः शुभस्यार्जनं
गेहाद्याग्रहनिग्रहेण मनसो निःसंगतासंगतिः ।
कल्याणाभिनिवेशिता तनुमतां सन्मार्गसंदर्शनं
धर्मारम्भवतां भवन्ति भविनामित्यादयः सद्गुणाः ॥ ४४

335) स्थानोपयोगा[1]त्साफल्यं भवस्य[2] विभवस्य च ।
परस्परोपकारः[3] स्याद् धर्मतीर्थप्रवर्तनात् ॥ ४५

336) संसारसागरे घोरे देहभाजां[1] निमज्जताम् ।
तीर्थं श्रीतीर्थनाथस्य यानपात्रमनुत्तरम्[2] ॥ ४६

337) भक्तिश्चेज्जिनशासने जिनपतौ संजायते निश्चला
तत्कृत्येषु बलात्प्रवृत्तिरतुला संपद्यते देहिनाम् ।
भक्तः किंकरतां प्रयाति[1] दिशति[2] स्वं स्वापतेयं गुणा –
नादत्ते पिदधाति दूषणगणं प्राणानपि प्रोज्झति[3] ॥ ४७

चाहिये । उदाहरणार्थ, यदि दासी की जूती को धारण किया जाता हो तो स्वामी की जूती को धारण करना कहीं उससे अधिक अच्छा है ॥४३ ॥

धर्म के लिये आरम्भ करनेवाले भव्य जीवों के पाप को उत्पन्न करनेवाले आरम्भ का त्याग उत्तम विपुल कीर्ति की प्राप्ति, घर आदि विषयक ममत्व के नष्ट कर देने से मन की निःस्पृह वृत्ति का संयोग, तथा अन्य सब प्राणियों के कल्याण के अभिप्राय से उन्हें समीचीन मार्ग का दिखलाना, इत्यादि अनेक उतम गुण हुआ करते हैं ॥ ४४ ॥

योग्य स्थान में जिन मंदिर और जिन प्रतिमा की पूजा प्रभावना के लिये जो अपनी सम्पत्तिका उपयोग करता है, उसका भव (जन्म) और वैभव दोनों ही सफल होते हैं। इस प्रकार धर्म तीर्थ की प्रवृत्ति के चलते रहने से दाता और पात्र का परस्पर में उपकार होता है ॥ ४५ ॥

भयानक संसारसमुद्र में डूबनेवाले प्राणियों के लिये श्रीतीर्थंकर का तीर्थ अनुपम नौका के समान सहायक होता है ॥ ४६ ॥

यदि जैन धर्म और जिनेन्द्र के विषय में स्थिर भक्ति होती है तो प्राणियों की अनुपम प्रवृत्ति उस जैन धर्म और जिनेन्द्र के कार्यों में जबरन् हुआ करती है । तथा भक्त पुरुष दास

४५) 1 दानात्. 2 मनुष्यजन्मनः. 3 दानात् दातृपात्रयोर्द्वयोः परस्परमुपकारो भवति । ४६) 1 प्राणिनाम्. 2 उपमारहितम् उतमं प्रधानम् । ४७) 1 गच्छति. 2 यच्छति. 3 त्यजति ।

338) चैत्यस्य कृत्यानि विलोकयन्तो ये पापभाजो यदि वा यतीनाम् ।
कुर्वन्त्युपेक्षा[1]मपि शक्तियुक्ता मिथ्यादृशस्ते जिनभक्तिमुक्ताः ॥ ४८

339) आरम्भो ऽप्येष पुण्याय देवाद्युद्देशतः कृतः ।
सामग्र्यन्तःपातित्वाज्जीवनाय विषं यथा ॥ ४९

340) भिन्नहेतुक एवायं भिन्नात्मा भिन्नगोचरः ।
भिन्नानुबन्धस्तेन स्यात्पुण्यबन्धनिबन्धनम् ॥ ५०

341) लोभादिहेतुकः पापारम्भो गेहादिगोचरः ।
पापानुबन्धी संत्याज्यः कार्यो ऽन्यः पुण्यसाधनः ॥ ५१

342) धर्मारम्भरतस्य रज्यति जनः कीर्तिः परा जायते
राजानो ऽनुगुणा भवन्ति रिपवो गच्छन्ति साहायकम् ।
चेतः कांचन निर्वृतिं च लभते प्रायो ऽर्थलाभः परः
पापारम्भभराद्यनर्थविरतिश्चेति प्रतीता गुणाः ॥ ५२

बनकर अपनी सब सम्पत्ति को दे डालता है और गुणों को ग्रहण करता है। इस के अतिरिक्त वह दोष समूह को आच्छादित कर के प्राणों को भी छोड देता है ॥ ४७ ॥

जो पापीजन शक्तिसम्पन्न हो कर जिनप्रतिमा अथवा मुनियों के भी कार्यों को– पूजा, प्रतिष्ठा एवं आहार दानादि को– देखते हुए भी उनकी उपेक्षा किया करते हैं उन्हें जिनभक्ति से रहित मिथ्या दृष्टि समझना चाहिये ।। ४८ ॥

देव, शास्त्र व गुरु के उद्देश से किया गया महान् आरंभ भी उसकी सामग्री के अन्तर्गत होने से पुण्य के लिये होता है। जैसे–विष इतर सामग्री से युक्त होने पर जीवन के लिये –प्राण रक्षा का कारण भी होता है ॥ ४९ ॥

इस आरंभ का चूंकि हेतु भिन्न, स्वरूप भिन्न, विषय भिन्न और सम्बन्ध भी भिन्न है; इसीलिये वह पुण्यबंध का कारण होता है ॥ ५० ॥

लोभ के कारण जो गृह-कुटुम्बादि – के विषय में आरम्भ किया जाता है वह पाप का बन्धक होने से छोडने के योग्य है। परन्तु दूसरा–जिनगृह व जिनप्रतिमा के निर्माणादि तथा आहारदानादि विषयक आरम्भ–पुण्य का बन्धक होने से आचरणीय है ॥ ५१ ॥

जो भव्य धर्म के निमित्त आरम्भ में निरत होता है उस से लोग प्रेम करते हैं, उसे

---

४८) 1 अवगणनम् ।

343) न मिथ्यात्वात्प्रमादाद्वा कषायाद्वा प्रवर्तते ।
श्राद्धो[1] द्रव्यस्तवे[2] तेन तस्य बन्धो ऽस्ति नाशुभः ॥ ५३

344) शुभः शुभानुबन्धीति बन्धच्छेदाय जायते ।
पारंपर्येण यो बन्धः स प्रबन्धाद्विधीयते ॥ ५४

345) द्रव्यस्तवे[1] भवति यद्यपि को ऽपि दोषः
क्वाप्यागमे प्रकथितो ऽतिलघुस्तथापि ।
कृत्यो[2] गुणाय महते स न किं चिकित्सा-
क्लेशो गदापगमनाय बुधैर्विधेयः ॥ ५५

346) लोकोत्तरे गुणगणे बहुमानबुद्धिः
शुद्धिः परा स्वमनसो मनुजोत्तमत्वम् ।
स्याद्धर्मसिद्धिरखिले जगति प्रसिद्धिः
सिद्धिः क्रमेण जिनपूजनतो जनानाम् ॥ ५६

उत्तम कीर्ति का लाभ होता है, राजा उस के अनुकूल होते हैं, शत्रु सहायक होते हैं, उसका चित्त किसी अभूतपूर्व शान्ति को प्राप्त होता है, उसे प्रायः बहुत धन का लाभ होता है, तथा वह प्रचुर पापारम्भ से परिपूर्ण अनर्थों से—निरर्थक कर्मों से—विरक्त होता है । इस प्रकार धर्मारम्भ में तत्पर भव्य के ये प्रसिद्ध गुण हुआ करते हैं ॥ ५२ ॥

श्रावक चूँकि मिथ्यात्व से, प्रमाद से अथवा कषाय से द्रव्यस्तव में — पूजा-प्रतिष्ठा एवं दानादिरूप बाह्यसंयम में—प्रवृत्त नहीं होता है, इसीलिये उसको अशुभ का बन्ध नहीं होता है ॥ ५३ ॥

शुभबन्ध शुभानुबन्धी होता है । इसलिये बन्धच्छेद के लिये परम्परा से जो बन्ध कारण हो जाता है वह विपुल प्रमाण से करना चाहिये (?) ॥ ५४ ॥

यद्यपि द्रव्यस्तव में कुछ—आरम्भजनित—दोष होता है, ऐसा किसी आगम में निर्दिष्ट भी किया गया है तो भी वह चूँकि अतिशय अल्प होता है, इसलिये उस दोष की अपेक्षा गुण की अधिकता को देखकर उस द्रव्यस्तव को करना चाहिये । ठीक है—क्या विवेकी जन रोग को दूर करने के लिये चिकित्सा के क्लेश को नहीं सहन करते हैं ? ॥ ५५ ॥

जिनपूजन से मनुष्यों को क्रम से अलौकिक गुणसमूह में अतिशय आदर की बुद्धि, अपने अन्तःकरण की उत्कृष्ट विशुद्धि, मनुष्यों में श्रेष्ठता, धर्म की प्राप्ति, समस्त लोक में प्रसिद्धि और अन्त में मुक्ति भी प्राप्त होती है ॥ ५६ ॥

---

५३) 1 श्रावकः. 2 दाने । ५५) 1 दाने. 2 करणीय ।

347) देवा[illegible]कजयुग्मपूजां
छत्राद्यवाद्य[illegible]सुमै [illegible] जस्रम् ।
मृत्वा गतामरगतौ किल दुर्गतां[1]लं
स्त्रीत्वादि पूजनफलं समयप्रसिद्धम् ॥ ५७

348) [illegible]चागमा विधिनिषेधविधायको[1] ऽत्र
पारत्रिके खलु विधौ सुधियां प्रमाणम् ।
द्रव्यस्तवे ऽस्ति स च नास्ति च युक्तिबाधा
संसाधिकाधिकमतेः क्रमते च युक्तिः ॥ ५८

349) संप्राप्य ये नरभवं जिनशासनं च
संसारसागरविलङ्घनयानपात्रम् ।
द्रव्यस्तवं[1] परिहरन्ति जनास्तरां ते[2]
चिन्तामणिं समधिगम्य[3] परित्यजन्ति ॥ ५९

जो भक्त इन्द्रादिक देवों के भी देव ऐसे श्री जिनेश के चरणकमलयुगल की पूजा छत्र आदि वादित्र, और पुष्पों से निरन्तर करते हैं वे मर कर के देवगति में जन्म लेते हैं। वहाँ से उन्हें मनुष्य लोक में स्त्रीत्व व दरिद्रता आदिक नहीं प्राप्त होते हैं। पूजन का यह फल आगम में प्रसिद्ध है ॥ ५७ ॥

पारलौकिक विधिके विषय में विधान अथवा निषेध को करनेवाला जो आगम विद्वानों को प्रमाण है, वह द्रव्यस्तव के विधान में उपलब्ध होता है और इसमें युक्ति से कुछ बाधा भी नहीं आती है। अपि तु जो विशेष विद्वान् हैं उनकी युक्ति उक्त द्रव्यस्तव की सिद्धि करने में हि प्रवृत्त होती है ॥ ५८ ॥

जो संसारसमुद्र के पार कराने में नौका के समान जैनधर्म और मनुष्यभव को प्राप्त कर के द्रव्यस्तव से विरत रहते हैं, वे मनुष्य मानो चिन्तामणि को प्राप्त करके उसे यों ही छोड देते हैं ॥ ५९ ॥

---

५७) 1 दुर्गति. सोमा ब्राह्मणीकी सासू षट्कर्मोपदेशग्रन्थे जलपूजाकथायां प्रसिद्धा कथा। ५८) द्रव्यस्तवभावस्तव। ५९) 1 दानम्. 2 P °जनास्त एते. ३ प्राप्य।

350) देवादिकृत्यरहिणो[1] गृहिणः प्रहीणाः
शोच्याः सत भवमताः[2] पशुभिः समानाः ।
जन्मान्तरे गुरुनिरन्तरदुःखदूना[3]
दीना न किंचन कदापि शुभं लभन्ते ॥ ६०

351) एवं कृत्वा कारयित्वा यतीनामाहाराद्यं यच्छतां नास्ति दोषः ।
पुण्यस्कन्धः केवलं देहभाजां संजायेत स्वर्गनिर्वाणहेतुः ॥ ६१

352) प्रोक्तः स्वल्पः क्वापि यः कर्मबन्धः सारम्भत्वात्सर्वदास्त्येष[1] तेषाम् ।
इत्थं चेदं प्रोक्तयुक्त्यावसेयं[2] सिद्धान्तार्थः शुद्धबुद्ध्यावबोध्यः[3] ॥ ६२

353) इष्यते दोषलेशोऽपि प्रभूतगुणसिद्धये ।
यथा दष्टाङ्गुलिच्छेदश्छेकैर्[1] जीवितहेतवे ॥ ६३

जो निकृष्ट गृहस्थ देव-गुरु आदि के विधेय सत्कार्य से रहित होते हैं उनके उपर सत्पुरुषों को तरस आता है व वे उन्हें पशुओं के समान तिरस्कार के पात्र समझते हैं । ऐसे दीन जन परभव में निरन्तर भारी दुःख से पीडित हो कर कभी भी कुछ हित को नहीं प्राप्त कर सकते हैं ॥ ६० ॥

इस प्रकार जो प्राणी आहारादिक को स्वयं बनाकर अथवा दूसरों से बनवाकर मुनियों के लिये देते हैं वे कुछ भी दोष के भागी नहीं होते, अपि तु उनके इससे जो पुण्यस्कन्ध का बन्ध होता है, वह उनके लिये स्वर्ग व मोक्ष का कारण होता है ॥ ६१ ॥

आगम में जो कहीं पर गृहस्थों के अतिशय अल्प कर्मबन्ध कहा गया है वह उनके आरम्भसहित होने के कारण सदा ही हुआ करता है । इस प्रकार युक्ति से इस कथनका निश्चय कर के निर्मल बुद्धि से आगम के रहस्य को समझ लेना चाहिये ॥ ६२ ॥

जिस आरम्भ विशेषसे अतिशय अल्प दोष के उत्पन्न होनेपर भी यदि बहुत गुणों की प्राप्ति होती है तो वह आरम्भ अभीष्ट माना जाता है । उदाहरणार्थ, यदि सर्प ने अंगुलि में काट लिया है तो प्राणरक्षारूप महान् लाभ को देखकर उस अंगुली का कटवा देना भी विद्वानों के द्वारा अभीष्ट माना गया है ॥ ६३ ॥

---

६०) 1 रहिताः. 2 ज्ञाताः. 3 पीडिताः । ६२) 1 कर्मबन्धः. 2 निश्चयं करणीयम्. 3 ज्ञातव्यः ।
६३) 1 विचक्षणैः ।

354) कृष्यादिकम बहुजङ्गमजन्तुघाति
कुर्वन्ति ये गृहपरिग्रहभागसक्ताः ।
धर्माय रन्धन[1]कृतां किल पापमेषा-
मेवं वदन्नपि न लज्जित एव दुष्टः ॥ ६४

355) एवंविधस्याप्यबुधस्य वाक्यं सिद्धान्तबाह्यं बहुबाधकं च ।
मूढा दृढं श्रद्दधते कदर्याः पापे रमन्ते ऽमतयः[1] सुखेन ॥ ६५

356) नाभेयादिभि[1]रन्यजन्मनि मुनेर्नानाविधैरौषधै-
स्तैलाभ्यञ्जनतो वराशनविधे रोगावगूर्णस्य[2] वै ।
भक्त्यावेशवशादसौ[3] शिवकरी गुर्वी चिकित्सा कृता
तस्याः[4] सौख्यपरंपरामनुपमां भुक्त्वा शिवं ते ऽगमन्[5] ॥ ६६

357) वह्निप्लुष्टं नैगमश्चोज्जयिन्यां श्राद्धः[1] साधुं साधुतैलादिपाकैः ।
चित्राकारैश्चारुभिश्चोपकारैः कृत्वा कल्पं[2] किं न कल्याणमायात्[3] ॥ ६७

जो गृहस्थ घर, परिग्रह तथा भोगों में आसक्त होकर बहुत से त्रस जीवों के घात के कारणभूत खेती आदिक कार्यों को करते हैं, उन्हें धर्म के लिये भोजन के तैयार करने में पापका भागी कहनेवाले दुष्ट को लज्जा नहीं आती ? (तात्पर्य, मुनियां को आहार देने के लिये जो आरम्भ होता है, उससे पाप अल्प और पुण्य महान् होता है अतः ऐसे आरम्भका निषेध करना अनुचित है) ॥ ६४ ॥

जो अज्ञानी जन लोभ के वशीभूत होकर इस प्रकार वोलनेवाले मूर्ख के भी आगम-बाह्य और अतिशय बाधक वचन पर स्थिर श्रद्धा करते हैं, वे दुर्बुद्धि पाप में आनन्द से रममाण होते हैं, ऐसा समझना चाहिये ॥ ६५ ॥

वृषभादि तीर्थंकरों ने पूर्व जन्म में रोगयुक्त मुनीश्वर की अनेक प्रकार की औषधों, तैलमर्दन और उत्कृष्ट आहार देने से जो भक्तिपूर्वक सुखदायक भारी चिकित्सा की थी उससे वे अनुपम सुखपरम्पराको भोग कर मुक्ति को प्राप्त हुए हैं ॥ ६६ ॥

उज्जयिनी नगरी में किसी वैश्य श्रावक ने अग्निसे जले हुए साधु को उत्तम तैलादि पाक से तथा और भी विविध सुन्दर उपचारों से नीरोग कर के क्या अपने स्वर्गरूप कल्याण को नहीं प्राप्त किया है ? अवश्य प्राप्त किया है ॥ ६७ ॥

---

६४) 1 आहारादिनिष्पादनम् । ६५) 1 मतिहीनाः । ६६) 1 ऋषभनाथप्रभृतिभिः. 2 रोगपीडितस्य मुनेः. 3 चिकित्सा. 4 चिकित्सायाः. 5 गताः । ६७) 1 श्रावकः. 2 स्वर्गम्. 3 P° कल्याणमाप ।

358) श्रीमान्[1] द्वारवतीपुरि प्रतिगृहं निर्माप्य सद्भेषजं
दत्त्वा व्याधिकदर्थितं[2] मुनिवरं संप्राचिकित्सत्तराम्[3] ।
तेनागृह्यत[4] निर्विकल्पमनसा[5] दाता ग्रहीता ततो
लप्स्येते[6] सुखसंततिं प्रवचने प्रोक्तं विशेषादिति ॥ ६८

359) शक्तितो भक्तितश्चापि रुक्मिणी हरिवल्लभा ।
उत्कृष्टश्रावकादीनां वैयावृत्त्यं चकार च ॥ ६९

360) नानावग्रहकष्टितानथ रुजाग्रस्तान् व्रतैः कर्शितान्[1]
दिग्वासोनिवहानभीष्टकरणाद् भैषज्यतः पथ्यतः ।
इत्थं स्वेन परैरपि प्रतिदिनं प्रोल्लासिवक्त्राम्बुजो[2]
गम्भीरः समुपाचरच्चिरतरं श्रीनन्दिषेणो मुनिः ॥ ७०

361) आर्या वर्या रेवती भक्तिनिष्ठा सम्यग्दृष्टिर्विश्रुता सुश्रुतानाम् ।
आहाराद्यं साधु संपादयन्ती वाञ्छाछेदं[1] किं न सोपाचचार[2][3] ॥ ७१

द्वारावती नगरी में ऐश्वर्यशाली कृष्ण ने प्रत्येक घर में उत्तम औषध को तैयार करा कर उसे व्याधिसे व्यथित मुनिराज को देते हुए उनका उपचार किया था । तथा उस मुनिराज ने भी उसे निराकुल भाव से ग्रहण किया था । इससे निश्चित है कि इस प्रकार के दान से दाता और उसे ग्रहण करनेवाला पात्र दोनों ही सुखपरम्पराको प्राप्त करते हैं । इसका विवेचन आगम में विशेष रूप से किया गया है ॥ ६८ ॥

कृष्ण की प्रिय पत्नी रुक्मिणीने अपनी शक्ति और भक्तिके अनुसार उत्कृष्ट श्रावक आदिकोंका वैयावृत्त्य किया था —उन्हें आहारादि के द्वारा संमानित किया था ॥ ६९ ॥

नन्दिषेण मुनिने अनेक अवग्रहों —तपनियमादिकों —से पीडित, रोगों से आक्रान्त और व्रताचरणों से कृशता को प्राप्त हुए दिगम्बर मुनिसमूहों का हितकर औषधों से अभीष्ट किया था। इस प्रकार उस नन्दिषेण मुनिने स्वयं तथा दूसरों के द्वारा भी दीर्घकाल तक प्रतिदिन उनका उपचार कराया था । उस समय उस गम्भीर नन्दिषेण मुनि का मुख-कमल अतिशय प्रफुल्लित रहा है ॥ ७० ॥

जो मान्य, श्रेष्ठ व भक्ति में संलग्न रेवती रानी स्थिर सम्यग्दृष्टि के रूप में प्रसिद्ध

---

६८) 1 विष्णुः. 2 पीडितम्. 3 निर्व्याधिमकरोत्. 4 मुनिना. 5 गृहीतम्. 6 लभते । ७०) 1 पीडितान्. 2 मुखकमलः । ७१) 1 वाञ्छापूरणम्. 2 रेवती राणी. 3 कृतवती ।

362) श्रद्धालुः किं श्राविका चेलनाख्या श्रीसिद्धान्ते विश्रुता[1] स्थैर्यकारात् ।
नानारूपैरौषधैः संस्कृतान्नं दत्त्वार्यायाः किं न संप्राचिकित्सत्[2] ॥ ७२

363) सीतया रामचक्रिभ्यां[1] वने गुप्तसुगुप्तयोः ।
आश्चर्यपञ्चकं प्राप्तं दानात्तद्धितं भुवि ॥ ७३

364) अन्यच्च देशकुलभूषणयोरुभाभ्यां[1] कष्टं व्यनाशि[2] निजजीवितसंशयेन ।
चण्डोपसर्गकरणाच्च महामुनीनां दुःखं सुदुःसहतरं समभूज्जटायोः[3] ॥ ७४

365) भूयांसो[1] ऽन्ये ऽपि कथ्यन्ते पुण्यभाजो जिनागमे ।
कृत्वा कृत्यानि[2] साधूनां संप्राप्ताः संपदं पराम् ॥ ७५

366) ग्रहीतुं नाम[1] नामापि भागधेयैर्नरैः परम् ।
साधूनां प्राप्यते दातुं भक्त्या भक्तादि किं पुनः ॥ ७६

थी, उसने श्रुतशाली मुनिराजों के लिये उत्तम आहारादि को संपादित कराकर उनकी इच्छा को दूर करते हुए क्या निःस्पृहतापूर्वक उनका उपचार नहीं किया था ? ॥ ७१ ॥

चेलना रानी नाम की जो श्रद्धालु–सम्यग्दर्शन से संपन्न–श्राविका धर्म से च्युत होते हुए साधर्मी जन को उस धर्म में स्थिर कराने में आगमप्रसिद्ध है, उसने अनेक प्रकार की औषधियों से संस्कृत-मिश्रित –आहार को दे कर क्या आर्यिका की चिकित्सा नहीं की थी ? ॥ ७२ ॥

सीता के साथ राम और लक्ष्मणने दण्डकारण्य में गुप्त और सुगुप्त मुनियों को आहार-दान दे कर इस पृथिवी पर पंचाश्चर्यों को तथा उसी प्रकार अपने हित को भी प्राप्त किया था ॥ ७३ ॥

इसके अतिरिक्त उन्हीं रामचंद्र और लक्ष्मण ने अपने प्राणों को संकट में डालकर देश-भूषण और कुलभूषण मुनियों के कष्ट को नष्ट किया था । तथा पूर्वभव में– दण्डक राजा की पर्याय में –महामुनियों के ऊपर घोर उपसर्ग करने से जटायु पक्षी को अतिशय दुःख उत्पन्न हुआ था ॥ ७४ ॥

जिनागम में ऐसे अन्य भी अनेक पुण्यवान स्त्री-पुरुषों का वर्णन किया गया है, जिन्होंने साधुओंके कार्यों को कर के उत्कृष्ट वैभव को–स्वर्ग मोक्षादि की लक्ष्मी को–प्राप्त किया है ॥७५॥

साधुओं का केवल नामग्रहण भी भाग्यशाली मनुष्यों को प्राप्त होता है, फिर भला भक्तिपूर्वक उनको आहारादि देने के प्रसंग में क्या कहा जाय ? उसकी प्राप्ति को तो विशेष पुण्य का फल समझना चाहिये ॥ ७६ ॥

---

७२) 1 प्रसिद्धा. 2 चिकित्सतवती । ७३) 1 रामलक्ष्मणाभ्याम् । ७४) 1 रामलक्ष्मणाभ्याम्. 2 विनाशितम्. 3 जटायुपक्षिणः दण्डकारण्यसंबन्धः पद्मचरित्रे प्रसिद्धः । ७५) 1 बहवः. 2 करणीयानि । ७६) 1 अहो ।

367) यस्यान्नपानैः संतृप्ताः साधवः साधयन्त्यमी ।
स्वाध्यायादिक्रियां सार्वी तस्य[1] पुण्यं तदुद्भवम् ॥ ७७

368) ब्रूषे[1] ऽथ व्याधिबाधायामभ्याहृत्य विधीयते ।
साधूनामौषधान्नादि शेषकाले तु दुष्यति ॥ ७८

369) किं व्याधिबाधा साधूनां गौरव्या यदि वा गुणाः ।
गुणाश्चेद् भक्तपानादि दातव्यं व्याधिना विना ॥ ७९

370) बुभुक्षा च महाव्याधिः स्वाध्यायध्यानबाधिनी ।
आर्तिप्रवर्तिनी भीमा शमनीयाशनादिभिः ॥ ८०

371) अथ न्यायागतं कल्प्यं देयं[1] युक्तं न चापरम् ।
युक्तं तदुक्तं बोद्धव्यं मध्यस्थैः शुद्धबुद्धिभिः ॥ ८१

372) अन्यायेनागतं दत्तमन्यदीयं हि निष्फलम् ।
तेन स्वकीयं दातव्यं स्वामिनेति निवेदितम् ॥ ८२

जिस दाता के अन्न पानी से तृप्त हुए मुनिजन आत्महितकर सब स्वाध्यायादि क्रियाओं को करते हैं, उससे उत्पन्न हुआ पुण्य उस दाता को प्राप्त होता है ॥७७ ॥

यदि यह कहा जाय कि साधुओं को व्याधिबाधा के होनेपर उन्हें औषधदान व अन्नदान करना योग्य हैं परन्तु अन्यकाल में अर्थात् उनकी नीरोग अवस्था में वह दोषजनक है; तो इसके उत्तर में हम पूछते हैं कि क्या साधुओं की रोगपीडा गौरवास्पद है या उनके गुण गौरवास्पद हैं ? यदि गुण गौरवास्पद हैं तो फिर रोग के विना भी साधुओं को आहारपानादि देना ही चाहिये ॥ ७८–७९ ॥

भूख वह महाव्याधि है जो स्वाध्याय तथा ध्यान में बाधा उत्पन्न करती हुई पीडा को भी उत्पन्न करती है । इस भयंकर व्याधि को आहारादिके द्वारा शान्त करना चाहिये ॥ ८० ॥

इसके अतिरिक्त जिस अन्नादि द्रव्य को न्यायपूर्वक प्राप्त किया गया है तथा जो साधुजन के ग्रहण करने योग्य भी है वही द्रव्य देने के योग्य है, इतर द्रव्य – अन्याय से प्राप्त व ग्रहण के अयोग्य आहारादि–देने के योग्य नहीं है । इस प्रकार जो कहा गया है उसे पक्षपात से रहित निर्मलबुद्धि जन को योग्य समझना चाहिये ॥ ८१ ॥

अन्यायसे प्राप्त किये गये दूसरे के आहारादिक पदार्थों को देनेपर उस दान का कुछ

७७) 1 तस्मात् स्वाध्यायसकाशादुत्पन्नं पुण्यं तस्यापि भवति यस्यान्नपान । ७८) 1 ब्रवीषि । ८१) 1 दयं द्रव्यमन्नादिकम् ।

373) कल्प्यं योग्यं तु साधूनां धर्मकार्ये ऽपि कारणम् ।
वितीर्ण[1]मपि नायोग्यं गृह्णन्ति यतयो यतः ॥ ८३

374) [1]यद्वान्यायागतं कल्प्यं देयमेवेति कथ्यते ।
लोभेनाशोभनं दानमदानं वा निवार्यते ॥ ८४

375) तथा कल्प्ये ऽपि सत्येव कश्चिद्दानाय दुर्विधः[1] ।
विधत्ते ऽभिन्नमन्नादि सो ऽमुना प्रतिषिध्यते ॥ ८५

376) विधिरौत्सर्गिको वायमुत्तमं दानमीदृशम् ।
अन्यत्तु मध्यमादि स्यान्न तु दोषाय जायते ॥ ८६

377) सर्वत्र चास्ति न्यायो ऽयमुत्कृष्टमुपदिश्यते ।
अन्यत्तु न प्रतिक्रुष्ट[1]मदुष्टं पुण्यपुष्टये ॥ ८७

फल नहीं प्राप्त होता है। इसलिये स्वामी (दाता) को न्यायप्राप्त अपने ही आहारादिक पदार्थ को देना चाहिये, ऐसा कहा है ॥ ८२ ॥

कारण इस का यह है कि दाता के द्वारा दिये गये कल्प्य—ग्रहण करने योग्य उचित आहारादि ही साधुओं के स्वाध्यायादि कार्यों में सहायक होते हैं। इसीलिये वे अयोग्य आहार के देने पर भी मुनिजन उसे ग्रहण नहीं करते हैं ॥ ८३ ॥

अथवा, जो आहारादि द्रव्य अन्यायसे प्राप्त किये गये हैं वे यदि साधुजन के लिये ग्रहण करने के योग्य हैं तो उन्हें भी देना ही चाहिये। कारण यह कि ऐसा करने से लोभ के वश हो कर जो निन्द्य दान दिया जाता है अथवा दिया ही नहीं जाता है उसका इससे निषेध हो जाता है ॥ ८४ ॥

तथा कोई दरिद्री आहारादिक के कल्प्य—देने योग्य—होने पर भी उसे अभिन्न करता है, अर्थात् योग्य और अयोग्य आहारादिक को एक करता है। इस से वह निषिद्ध माना गया है ॥ ८५ ॥

अथवा मुनिजन के लिये न्यायप्राप्त कल्प्य आहारादि को देना चाहिये, यह पूर्वोक्त विधान औत्सर्गिक—सामान्य—है। इसलिये इस विधि के अनुसार दिया गया दान उत्तम माना गया है। इस से भिन्न—अन्याय प्राप्त व अकल्प्य आहारादिक—दान को मध्यम व जघन्य समझना चाहिये और वह दोषजनक नहीं है ॥ ८६ ॥

यह न्याय—पूर्वोक्त विधान—सर्वत्र उत्कृष्ट कहा गया है। इस से भिन्न दान का विधान निषिद्ध नहीं है, किन्तु वह भी दोष रहित व पुण्य की पुष्टि का कारण है ॥ ८७ ॥

---

८३) 1 दत्तम् । ८४) 1 अथवा । ८५) 1 दीनो दरिद्रः । ८७) अनुत्कृष्टम् ।

378) व्याख्येयमेवमेवेदमन्यथा न व्रताद्यपि ।
देयं ग्राह्यं च केनापि संपूर्णं विधिना विना ॥ ८८

379) अथ कालादिदोषेण न्यूनो[1] ऽपि विधिरिष्यते ।
व्रतादेरिव भक्तादेर्दाने ऽप्येष[2] समिष्यताम् ॥ ८९

380) आरम्भरहितं वा दायकमुद्दिश्य[1] दर्शितं कल्प्यम् ।
देयं कृत्वा ददतः[2] प्रतिमापन्नस्य भङ्गभयात् ॥ ९०

381) यो[1] ऽपि क्वचिदपि समये[2] कृत्वा ददतो[3] निवेदितो दोषः ।
सो[4] ऽप्येवंविधविषये विदुषा[5] योज्यो न सर्वत्र ॥ ९१

382) यदि वाधिकृत्य पात्रं सामान्येनैव निर्निमित्तमिदम् ।
देयं कल्प्यं जल्पितमनल्पबुध्द्यावबोद्धव्यम् ॥ ९२

इस उपर्युक्त औत्सर्गिक व आपवादिक विधि का व्याख्यान इसी प्रकार से —औत्सर्गिक विधि से दिया गया दानादि उत्तम तथा शेष (अपवाद विधि से दिया गया) दानादि मध्यम या जघन्य होता है, परन्तु होता वह भी निर्दोष है; ऐसा —करना चाहिये । कारण यह कि यदि ऐसा उसका व्याख्यान नहीं किया गया तो फिर विधि के बिना उस दान के समान संपूर्ण व्रत आदि भी न तो किसी के द्वारा दिया जा सकेगा और न किसी के द्वारा ग्रहण भी किया जा सकेगा ॥ ८८ ॥

इसलिये यदि कालादि के दोष से उक्त व्रतादि के ग्रहण में कुछ हीन विधि भी अभीष्ट मानी जाती है तो फिर उक्त व्रतादि के समान आहारादिक के दान में भी कालादि दोष से उस हीन विधि को स्वीकार करना चाहिये ॥ ८९ ॥

अथवा, आरम्भ से रहित दाता को लक्ष्य कर के पूर्वोक्त कल्प्य दिखलाया गया है; क्योंकि आरम्भ त्याग प्रतिमा को प्राप्त श्रावक यदि देयको कर के—आहारादि को तैयार कर के देता है तो उसके उस स्वीकृत प्रतिमा के भंग होने का भय है ॥ ९० ॥

आहारादि को स्वयं निर्मित कर के देने वाले श्रावक को जो किसी आगम ग्रन्थ में दोष कहा गया है, उसकी भी योजना विद्वान् मनुष्य को इसी प्रकार के विषय में करना चाहिये, न कि सब प्रकार के विषय में ॥ ९१ ॥

अथवा सामान्यतया पात्र को उद्देश्य करके व्याध्यादि निमित्त के बिना उदार बुद्धि से कल्प्य को देय कहा गया है ऐसा समझना चाहिये ॥ ९२ ॥

८९) 1 ऊनः हीनो ऽपि विधिः. 2 ऊनविधिः । ९०) 1 पात्रम्. 2 दातुः पुरुषस्य । ९१) 1 दोषः. 2 आगमे. 3 प्रयच्छतः पुरुषस्य. 4 दोषः. 5 पण्डितेन ।

383) यस्मात्सति निर्वाहे बालग्लानादिहेतुविरहे वा।
गृह्णन्त्य[illegible] यं न साधवो वारितं तेन ॥ ९३

384) अनिर्वाहे तु गृह्णन्ति ग्लानादेश्च प्रयोजने ।
देशाद्यपेक्षं [illegible] तथा चोवाच तार्किकः ॥ ९४

385) किंचित्कल्प्यम[illegible]ल्प्यं स्यात्किंचित्स्यादकल्प्यमपि कल्प्यम् ।
पिण्डः शय्या शास्त्रं छात्राद्यं भेषजाद्यं वा ॥ ९५

386) देशं कालं पुरुषावस्था[1][illegible]पयागशुद्धिपरिणामान् ।
प्रसमीक्ष्य भवति कल्प्यं नैकान्तात्कल्प्यते कल्प्यम् ॥ ९६

387) ग्रहीष्यन्ति न वा ते तु ज्ञातुमेतन्न शक्यते ।
दातव्यं सर्वथा च स्यात्साधुभ्यो धर्मसिद्धये ॥ ९७

388) उक्तं चेच्छेन्न वा साधुस्तथापि विनिवेदयेत् ।
अगृहीतेऽपि पुण्यं स्याद्दातुः सत्परिणामतः ॥ ९८

कारण यह कि निर्वाह के होने पर अर्थात् कल्प्य आहार के मिल जानेपर अथवा बाल और व्याधिग्रस्त आदि निमित्त के अभावमें साधुजन अकल्प्य आहार को ग्रहण नहीं करते हैं, इसलिये अकल्प्य आहार का निषेध किया गया है॥ ९३ ॥

इसके विपरीत निर्वाह के न होने पर–कल्प्य आहारके न प्राप्त होनेपर– तथा बाल व व्याधिग्रस्त आदि प्रयोजन (निमित्त) के होनेपर साधुजन देश कालादिकी अपेक्षा से कल्प्यादिक आहारको ग्रहण करते हैं । इस विषय में तार्किक विद्वान् ने ऐसा कहा है ॥ ९४ ॥

पिंड (आहार), शय्या, शास्त्र, छात्र आदि अथवा औषध आदि; इनमें देशकालादिकी अपेक्षा कोई कल्प्य तो अकल्प्य और अकल्प्य भी कल्प्य हुआ करता है ॥ ९५ ॥

देश, काल, पुरुष की अवस्था, उपयोग, शुद्धि और परिणाम; इनका विशेष विचार करके कल्प्य होता है । एकान्तसे – देशकाल आदिकी अपेक्षा के विना – कल्प्य की कल्पना करना योग्य नही है ॥ ९६ ॥

वे – साधुजन – उसे ग्रहण करेंगे या नहीं ग्रहण करेंगे, यह जानना शक्य नहीं है । इसलिये धर्म की सिद्धि के लिये साधुओंको सब प्रकारसे आहारादिका दान करना चाहिये ॥ ९७ ॥

दाताके निर्देश कर ने पर पात्र उसे (निर्दिष्ट वस्तु को) ग्रहण करे अथवा न करे,

---

९६) 1 P 'पुरुषमवस्थाम् ।

389) किंचोपदेशेन विनापि भक्तः शक्तश्च दत्ते हि यथाकथंचित्।
मिथ्याविचारं च करोत्यभक्तस्तुच्छस्वभावः समदातुकामः ॥ ९९

390) भक्तिव्यक्तिः कथमिव भवेदागतानां यतीनां
यद्याहारं न पचति[1] गृही सुन्दरं सादरं च।
अन्यस्यापि स्वजनहृदयः[2] कृत्यमौचित्यमित्थं
गौरव्याणां[3] किमुत जगतः साधु साधर्मिकाणाम् ॥ १००

391) नामापि साधुलोकानामालोकादि विशेषतः।
को ऽपि पुण्यैरवाप्नोति दानादि तु किमुच्यते ॥ १०१

392) एष्टव्य[1]मित्थमेवेदं मध्यस्थैः सूक्ष्मदृष्टिभिः।
विधातुं[2] बुध्यते श्राद्धै[3]र्वन्दना[4]द्यपि नान्यथा ॥ १०२

तो भी दाताको उसके विषय में निवेदन करना ही चाहिये।कारण यह कि ऐसा करने से साधु के उसे ग्रहण न करने पर भी दाता के शुभ परिणाम से उसे पुण्य की प्राप्ति होती है ॥ ९८ ॥

दूसरे, जो समर्थ दाता साधुजन के विषय में भक्ति रखता है वह उनके लिये उपदेश के विना भी किसी न किसी प्रकारसे आहारादि को देता ही है। परन्तु जो मुनिजन में अनुराग नहीं रखता है वह हीन स्वभाववाला मनुष्य नहीं देने की इच्छा से मिथ्या विचार को किया करता है ॥ ९९ ॥

यदि गृहस्थ आदर से सुन्दर आहार को नहीं पकाता है तो आये हुए मुनि के विषय में उसको भक्ति कैसी प्रगट हो सकती है ? जिसका आत्मीय जनों के विषय में प्रेम है ऐसा गृहस्थ जब अन्य व्यक्ति का भी मधुर भाषणपूर्वक दानादि देकर उचित आदर करता है तब क्या वह जिनका गौरव जगत् करता है ऐसे सार्धमिक साधुजन के लिये समुचित आहारादि देकर उनका आदर सत्कार नहीं करेगा ? ॥ १०० ॥

कोई भी भाग्यशाली मनुष्य साधुजन के नाम को भी पुण्योदयसे सुन पाता है व उनका दर्शन तो उसको विशेष पुण्यसे ही प्राप्त होता है। फिर यदि उसको उनके लिये दान देने आदिका प्रसंग प्राप्त होना है तो क्या कहना है– वह तो महापुण्योदय से ही प्राप्त समझना चाहिये ॥ १०१ ॥

जो मध्यस्थ – पक्षपात से रहित – और सूक्ष्म विचारक हैं उन्हें 'यह ऐसा ही है' ऐसा स्वीकार करना चाहिये। कारण यह कि ऐसा स्वीकार करने के विना श्रावक मुनियों के लिये वन्दना कैसे करना चाहिये, यह भी न जान सकेंगे ॥ १०२ ॥

१००) 1 यदि पाकं न करोति तदा भक्तिः कथं प्रकटा भवति. 2 गृही. 3 माननीयानाम्। १०२) 1 अङ्गीकर्तव्यम्. 2 कर्तुम्. 3 श्रावकैः. 4 D° वन्दनाद्यपि।

393) न चेयं क्वापि सिद्धान्ते निषिद्धा किंतु साधिता ।
स्थाने स्थाने ऽनवद्याया[1] वन्दनाया विधानतः ॥ १०३

394) आरम्भान्तरमन्तरे गुरुतरं गेहाद्यसद्गोचरं
मुञ्चत्यत्र[1] समग्रमग्रिमगुणग्रामं मुनेर्मानतः ।
मान्यं सो ऽन्यगुणान्तरं च लभते छिन्द्यात्क्वचित्[2]संशयं
दुष्टानेन[3] न वन्दना यदि वदेद्दाने समाधिः समः ॥ १०४

395) वन्दनादिगुणान् दिव्यानन् नानभिवाञ्छता[1] ।
दानं विशेषतो देयं यत्यवस्थानकारणम् ॥ १०५

396) मुनीनां ज्ञानादौ भवति बहुमानः प्रकटित-
स्तदन्येषां मार्गो जिनवचनभक्तिः परहितम् ।
धने ऽनास्थाभावो गुरुपुरुषकृत्यानुकरणं[1]
कियन्तः कथ्यन्ते वितरण[2]गुणाः सिद्ध्यनुगुणाः ॥ १०६

यह वन्दना किसी भी सिद्धान्त में निषिद्ध नहीं है, किन्तु उसकी आवश्यकता ही कही गई है। आगम में स्थान स्थानपर उक्त निर्दोष वन्दना का विधान किया गया है ॥ १०३ ॥

वन्दना के समय गृहस्थ चूंकि बीच में गृहादि के असद्गोचर (?) अन्य भारी आरम्भ को छोड देता है, मुनि के सन्मानसे वह समस्त श्रेष्ठ गुण समूहको एवं आदरणीय अन्य गुणान्तर कोभी प्राप्त करता है तथा किसी विषय में उत्पन्न हुए संशय को नष्ट करता है; इसीलिये वह वन्दना दोषयुक्त नहीं है; ऐसा यदि कहा जाता है तो यही समाधान समानरूप से दान के विषय में भी जानना चाहिये ॥ १०४ ॥

जो सत्पुरुष सम्पूर्ण वन्दनादि अनेक दिव्य गुणों की प्राप्ति की इच्छा करता है उसे मुनिजन को धर्म में स्थिर करनेवाले दान को विशेष रूपसे देना चाहिये ॥ १०५ ॥

आहारादिक देने से मुनियों के ज्ञानादि गुणों में बहुमान प्रकट होता है, अन्य लोगों को दान मार्ग का परिचय होता है — एक को दान देते हुए देख कर अन्यजन भी उसमें प्रवृत्त होते हैं, जिनवचन में भक्ति उत्पन्न होती है उससे परका — पात्र का — हित होता है (अथवा दाता का उत्कृष्ट हित होता है), दान देने से धन में अनास्था भाव — उसकी नश्वरताका निश्चय उत्पन्न होता है, तथा महापुरुषों के कृत्यों का — उदारता, औदार्य, वत्सलता एवं प्रभावना आदि समीचीन कार्यों का — अनुसरण होता है। सिद्धि के अनुकूल उन दानके प्रचुर गुणों मे से भला यहाँ कितनों का वर्णन किया जा सकता है? ॥ १०६ ॥

१०३) 1 वन्दनायाः । १०४) 1 दाने. 2 वन्दनाविषये. 3 प्रकारेण । १०५) पुरुषेण । १०६) 1 श्रेयांसादिवत् [illegible] भवति. 2 दान ।

397) धर्मे स्थैर्यं स्यात्कस्यचिच्चञ्चलस्य प्रौढं वात्सल्यं बृंहणं[1] सद्गुणानाम् ।
दानेन श्लाघा शासनस्यातिगुर्वी दातृणामित्थं दर्शनाचारशुद्धिः ॥ १०७

398) औदार्यं वर्यं[1] पुण्यदाक्षिण्यमन्यत् संशुद्धो बोधः पातकात्स्याज्जुगुप्सा
आख्यातं मुख्यं सिद्धधर्मस्य लिङ्गं लोकप्रेयस्त्व[2]द्दातुरेवोपपन्नम्[3] ॥ १०८

399) तीर्थोन्नतिः परिणतिश्च परोपकारे
ज्ञानादिनिर्मलगुणावलिकाभिवृद्धिः ।
वित्तादिवस्तुविषये च विनाशबुद्धिः
संपादिता भवति दानवता[1]त्मशुद्धिः ॥ १०९

400) सीदन्ति पश्यतां येषां शक्तानामपि साधवः ।
न धर्मो लौकिको ऽप्येषां दूरे लोकोत्तरः स्थितः[1] ॥ ११०

401) सीदन्तो यतयो यदप्यनुचितं किंचिज्जलान्नादिकं
स्वीकुर्वन्ति विशिष्टभक्तिविकलाः कालादिदोषादहो ।
मालिन्यं[1] रचयन्ति यज्जिनमतस्यास्थानशय्यादिना
श्राद्धा[2]नामिदमेति दूषणपदं शक्ता[3]नुपेक्षाकृताम्[4] ॥ १११

दान देनेसे किसी चञ्चल– धर्ममार्गसे च्युत होते हुए– साधर्मिक की उसमें स्थिरता होती है, धार्मिकों में प्रौढ (अतिशय) वात्सल्य प्रगट होता है, धार्मिकों में सद्गुणों की वृद्धि होती है, तथा दान देने से जिनशासन की बडी प्रशंसा होती है। इस प्रकार दाताजन के दर्शनाचारकी शुद्धि होती हैं ॥ १०७ ॥

श्रेष्ठ उदारता, पवित्र मृदुता या सरलता, निर्मलज्ञान, पाप से ग्लानि, तथा लोकप्रियता ये अनादि सिद्ध धर्मके चिन्ह कहे गये हैं। और ये सब गुण दाता को ही प्राप्त होते हैं ॥१०८॥

दान देनेसे तीर्थ की उन्नति, दाता की परोपकार परिणति (प्रवृत्ति), ज्ञानादि निर्मल गुणसमूह की वृद्धि, धन आदि वस्तुओं में नश्वरता का विचार और दाता की आत्मशुद्धि भी है ॥ १०९ ॥

दुःख के दूर करने में समर्थ हो कर जो श्रावक साधुजन को कष्ट में देखकर भी उनके दुःख को दूर नहीं करते हैं, उनके लौकिक धर्म भी सम्भव नहीं है, फिर भला लोकोत्तर धर्म तो उनसे बहुत दूर है, ऐसा समझना चाहिये ॥ ११० ॥

रोगादि से पीडित साधुजन विशिष्ट भक्ति से रहित होते हुए काल आदिके दोष से

---

१०७) 1 वर्धनम् । १०८) 1 श्रेष्ठम्. 2 धर्मलिङ्गम्. 3 युक्तम् । १०९) 1 पुरुषेण । ११०) उत्तमो धर्मः सोऽपि नास्ति । १११) 1 मलिनता. 2 श्रावकाणाम्. 3 शक्तौ सत्यां. 4 अवगणनाकराणाम् ।

402) अपात्रबुद्धिं ये साधौ लिङ्गमात्रे ऽपि कुर्वते ।
नूनं न पात्रतास्त्येषां यथात्मनि तथा परे ॥ ११२

403) सुदृगादिपरं पात्रं सर्वमुक्तं जिनागमे ।
दानं तु निर्गुणेभ्यो ऽपि दातव्यमनुकम्पया ॥ ११३

404) आहारवस्त्रामत्रादिदाने पात्रपरीक्षणम् ।
कुर्वन्तः[1] किं न लज्जन्ते दरिद्राः[2] क्षुद्रचेतसः ॥ ११४

405) सर्वज्ञो[1] हृदि[2] वाचि[3] तस्य वचनं काये प्रणामादिकं
प्रारम्भो ऽपि च चैत्यकृत्यविषयः पापाज्जुगुप्सा परा ।
हीनानामपि सन्त्यमी शुभदृशां येषां गुणा लिङ्गिनां
ते मन्ये जगतो ऽपि पात्रमसमं शेषं किमन्विष्यते[4] ॥ ११५

यदि अपने पद के अयोग्य जल व अन्नादि का स्वीकार करते हैं तथा अयोग्य वसति व शय्या आदिका ग्रहण करके जिनमत में मलिनता को उत्पन्न करते हैं तो यह दोष शक्ति होनेपर भी उपेक्षा करने वाले श्रावकों पर आता है– इसे श्रावकों का दोष समझना चाहिये ॥ १११ ॥

जो किसी विशेष साधुके अथवा लिंगी–साधु–मात्र के विषय में अपात्र बुद्धि को करते हैं–उसे पात्र नहीं समझते हैं– उनकी निश्चय से जैसे स्वयं अपने में पात्रता नहीं है वैसे ही वे दूसरे के– साधु के –विषय में भी अपात्रता की कल्पना करते हैं ॥ ११२ ॥

जो सम्यग्दर्शन आदिसे सम्पन्न हैं वे सब पात्र हैं ऐसा जिनागम में कहा गया है। इसके अतिरिक्त दान तो निर्गुणों को भी– सम्यग्दर्शन आदि गुणों से रहित जनों को भी– दया भाव से देना चाहिये ॥ ११३ ॥

आहार वस्त्र व पात्र आदि देने के लिये पात्र की परीक्षा करनेवाले दरिद्र श्रावक अपनी इस क्षुद्र मनोवृत्ति पर लज्जित क्यों नहीं होते हैं ? ॥ ११४ ॥

चारित्र से हीन होने पर भी जिन उत्तम दृष्टिवाले – सम्यग्दृष्टि – लिंगियों के हृदय में सर्वज्ञ, वचन में उसकी वाणी, शरीर में उनके लिये प्रणामादिक, जिनमन्दिर व जिन प्रतिमा संबंधी कार्य विषयक प्रकृष्ट आरम्भ और मन में पाप से अतिशय ग्लानि ये गुण होते हैं उनको मैं लोक में अनुपम पात्र मानता हूँ। फिर भला शेष को–परिपूर्ण संयमी आदिको– क्यों खोजा जाता है ? ॥ ११५

---

११४) 1 D सन्तः. 2 हीनाः। ११५) 1 D सर्वज्ञदेव. 2 D हृदये. 3 D वचने. 4 विचार्यते D धर्मकार्येऽन्यत्किमवलोक्यते ।

406) चतुर्दशाद् गुणस्थानात्सर्वे सर्वे ऽप्यपेक्षया।
निर्गुणाः सगुणास्तु स्युस्[1]तृतीयादुत्तरे[2] क्रमात् ॥ ११६

407) साधवो दुष्षमाकाले[1] कुशीलबकुशादयः ।
प्रायः शबलचा[रि]त्राः[2] सातिचाराः प्रमादिनः ॥ ११७

408) सगुणो निर्गुणो ऽपि स्यान्निर्गुणो गुणवानपि ।
शक्यते न च निश्चेतुं[1] मान्यः सर्वो ऽप्यतो[2] मुनिः ॥ ११८

409) गुणानुरागितैवं स्याद्दर्शनाभ्युन्नतिः परा ।
लोके ऽत्र पात्रता पुंसां परत्र कुशलं परम् ॥ ११९

410) अक्रूरता गुणापेक्षा[1] दोषोपेक्षा[2] दयालुता।
उदारतोपकारेच्छा विधेया[3] सुधिया[4] सदा ॥ १२०

411) एकं पापं देयभावे ऽप्यदानं साधोरन्यन्निन्दया निर्निमित्तम् ।
गृह्णन्त्युच्चैः क्रूरचित्ता वराकाः पापैः पापा नैव तृप्यन्ति लोकाः ॥ १२१

चौदहवें गुणस्थान से पूर्व गुणस्थानवर्ती सब ही अपेक्षाकृत निर्गुण हैं- हीन गुणवाले अथवा गुणों से रहित हैं। तथा तीसरे गुणस्थान से आगे के गुणस्थानवर्ती सब ही जीव क्रम से अपेक्षा कृत सगुण -सम्यग्दर्शनादि गुणों से सहित अथवा परिपूर्ण गुणवाले - हैं ॥११६ ॥

इस पंचमकालमें कुशील व बकुशादिक साधु प्रायः शबल चारित्र- दूषित चरित्रवाले -अतिचारों से सहित और प्रमादयुक्त होते हैं ॥ ११७ ॥

जिसे सगुण समझा है वह कदाचित् निर्गुण हो सकता है। और जिसे निर्गुण समझा है वह सगुण हो सकता है । इस प्रकार जब सगुण और निर्गुण का निश्चय करना शक्य नहीं है तब ऐसी अवस्थामें जिनलिंगधारी सब ही मुनिजनका सत्कार करना चाहिये ॥ ११८ ॥

इस प्रकारसे- गुणी और निर्गुणका विचार न करके जिनलिंगधारक साधुमात्रको आहारादिके देनेसे- दाताजनोंकी गुणानुरागिता, सम्यग्दर्शन की उत्कृष्ट उन्नति, इस लोक में पात्रता और परलोक में उत्कृष्ट हित होता है ॥ ११९ ॥

निर्मलबुद्धि मनुष्य को दुष्टता का परित्याग, गुणों की अपेक्षा, दोषों की उपेक्षा, दयालुता, उदारता -दातृत्व बुद्धि- और परोपकार की इच्छा सदा ही करनी चाहिये ॥ १२० ॥

जिनका मन क्रूर है ऐसे पापी लोग देने योग्य आहारादिक के होने पर भी जो नहीं

---

११६) 1 D भवेयुः. 2 तृतीयगुणस्थानादुपरि. ११७) 1 P° दुःखमाकाले. 2 D° कलुषितचारित्राः। ११८) 1 निश्चयं कर्तुम्. 2 D कारणात् । १२०) 1 वाञ्छा. 2 अवगणना. 3 कर्तव्या. 4 बुद्धियुक्तेन ।

412) ख्यातं मुख्यं जैनधर्मप्रधानं श्राद्धस्यो[1]क्तं द्वादशं तद्व्रताद्यम् ।
दत्तं पूज्यैः कीर्तितं चागमज्ञैर्युक्त्या युक्तं दीयतां निर्विवादम्[2] ॥१२२

413) किंचिद्दायकमुद्दिश्य किंचिदुद्दिश्य याचकम् ।
देयं[1] च किंचिदुद्दिश्य निषिद्धं वै तथागमे ॥ १२३

414) त्यक्तारम्भो यथारभ्य साधुभ्यो ऽप्यशनादिकम् ।
न दद्यात्पापिने ऽन्यो ऽपि दानमेतत्प्रवर्तनम् ॥ १२४

415) कन्याफलं यथोद्दिश्य वापीकूपसरांसि[1] वा ।
दानं दद्यान्न धर्मार्थी ध्वस्तयुक्तफलादिकम् ॥ १२५

416) उत्सर्गेणा[1]पवादेन[2] निश्चयाद् व्यवहारतः ।
क्षेत्रपात्राद्यपेक्षं च सूत्रं योज्यं जिनागमे ॥ १२६

देते हैं, यह एक पाप हुआ, तथा साधुओं की जो वे निष्कारण निन्दा करते हैं, यह दूसरा पाप हुआ, इस प्रकार से वे दोनों ही घोर पापों को ग्रहण करते हैं। ठीक है–बेचारे पापी लोग पापों से कभी तृप्त नहीं होते हैं ॥ १२१ ॥

जो प्रसिद्ध दान मुख्य व जैन धर्म में प्रधान है उसे यद्यपि संख्या में बारहवाँ व्रत कहा गया है, तो भी उसे श्रावक के व्रतों में प्रथम व्रत समझना चाहिये। उक्त दान को पूज्य पुरुषों ने दिया है और आगम के ज्ञाता जनों ने उसकी स्तुति की है। इसलिये युक्ति से युक्त उस दान को विना किसी विवाद के देना योग्य है ॥ १२२ ॥

आगम में किसी दान का निषेध दाता की अपेक्षा से, किसीका निषेध याचक (पात्र) की अपेक्षा से और किसीका निषेध देय वस्तु की अपेक्षा से किया गया है ॥१२३ ॥

यथा– आरम्भत्यागी सद्गृहस्थ को भोजन आदि का आरम्भ करके साधुओं के लिये भी दान नहीं देना चाहिये। इसी प्रकार आरम्भरत गृहस्थ भी पापी मनुष्य को आहारादिक नहीं देवे। कारण कि उस दानसे उसको पाप में ही प्रवृत्ति होनेवाली है (?) ॥ १२४॥

धर्मार्थी दाता कन्याफलकी अपेक्षासे जैसे कन्यादान नहीं करता है वैसे ही उसे वापी, कुआँ, सरोवर और तालाब आदिका भी फल की अपेक्षा से दान करना योग्य नहीं हैं। तथा बिगडे हुए व उच्छिष्ट फलादिक देना भी योग्य नहीं है ॥ १२५॥

जिनागम में उत्सर्ग और अपवाद, निश्चय और व्यवहार, क्षेत्र व पात्र आदिकी अपेक्षासे सूत्रकी योजना करनी चाहिये ॥ १२६॥

---

१२२) 1 श्रावकस्य. 2 D अनिदानवन्धेन। १२३) 1 D दातव्यम्। १२५) 1 D सरोवराणि। १२६) 1 संक्षेपेण. 2 विस्तारेण।

417) न किंचित्कृत्यमेकान्तादकृत्यं वा जिनागमे ।
गुणदोषौ तु संचिन्त्य कृत्याकृत्यव्यवस्थितिः ॥ १२७

418) विधीयते[1] गुणः शुद्ध ईषद्दोषो महागुणः ।
न समधिकदोषस्तु गुणो दोषो न केवलः ॥ १२८

419) आलोच्यागममागमज्ञपुरुषानापृच्छय[1] धर्मार्थिनो
दृष्ट्वा शिष्टजनप्रवृत्तिमधुना श्रुत्वागमे प्राक्तनीम्[2] ।
मोहापोहविधित्सया[3] शुभधियां किंचिन्मया वर्णितं
कर्णे कार्यमिदं[4] विचार्य निपुणैः पुण्यार्थिभिः सज्जनैः ॥ १२९

420) दानाभावे भवति गृहिणां मुख्यधर्म[1] महाणं[2]
साधूनां च स्थितिविरहतो मार्गनाशः क्रमेण ।
लोके निन्दा जिनपतिमतस्यावदातस्य[3] गुर्वी
दानं युक्त्या जयमुनिरुपासाधयत्साधुसिद्धयै ॥ १३०

पञ्चमो ऽवसरः ॥ ५ ॥

962) बालव्युत्पत्तिसंसिद्ध्यै कांश्चिदन्यान्[1] प्रदर्शये ।
अहिंसनस्य पर्यायान्[2] संदृष्टानपि जातितः[3] ॥ ५

963) स्यात्संरम्भसमारम्भारम्भेभ्यो[1] विनिवर्तिनः ।
कषायेभ्यो हृषीकेभ्यो[2] द्व्यक्षादिषु[3] यथायथम्[4] ॥ ६

964) समग्र प्रतिमास्थानसमारोहणकारिणः ।
अहिंसा परमां कोटिं समारोहत्यनाकुलम् ॥७। युग्मम् ।

965) प्रसिद्धं च –
देवतातिथिपित्रर्थं मन्त्रौषधभयेन वा ।
न हिंस्यात्प्राणिनः[1] सर्वानहिंसाख्यं व्रतं मतम् ॥ ७*१

966) हर्म्यकार्य[1]मखिलं नियोजयेत् दृष्टिपूत[2]मथ यद्द्रवाभिधम्[3] ।
वस्त्रगालितमथाशनादिकं स्पृष्टदृष्ट[4]मुरुधर्मवासनः ॥ ८

के विघातक होने से उस हिंसा से पृथक् नहीं हैं–उसी के अन्तर्गत हैं । इन सब का जो पृथक् पृथक् उल्लेख किया गया है वह केवल शिष्यों के लिये उनका विशेष परिज्ञान कराने के लिये किया गया है ॥ ४*१० ॥

मन्दबुद्धि जनों को उसका विशेष परिज्ञान प्राप्त हो सके, इस उद्देश से यहाँ उक्त अहिंसा की जातिस्वरूप से देखी गई कुछ अन्य भी पर्यायोंका–विशेषों का कथन किया जाता है ॥ ५ ॥

जो गृहस्थ द्वीन्द्रिय आदि त्रस जीवों के विषय में कषायों व इन्द्रियों के साथ संरम्भ, समारम्भ और आरम्भ से निवृत्त हो कर समग्र प्रतिमास्थानों–श्रावक के दार्शनिक व व्रतिक आदि ग्यारह ही भेदों पर–आरूढ होना चाहता है–उनके परिपालन में उद्यत हो रहा है–उसकी अहिंसा निराकुल स्वरूप से चरम सीमा को प्राप्त होती है ॥ ६–७ ॥

देवता, अतिथि, पितर, मंत्र, औषध और भय के वश जो सब प्राणियों का–किसी भी प्राणी का–प्राणवियोग नहीं करता है, यह अहिंसानामक व्रत माना गया है ॥ ७*१ ॥

धर्म के प्रबल संस्कार से संयुक्त भव्य जीव को घर के समस्त स्वच्छतादि कार्य को नेत्रों से भली भाँति देखकर करना चाहिये । जो पानी के समान पतले पदार्थ हों उन्हें वस्त्र से

---

५) 1 कान्चित्. 2 D विशेषान्. 3 मुख्यतः । ६) 1 D मनवचनकाययोगेभ्यः. 2 D इन्द्रियेभ्यः. 3 द्वीन्द्रिया [दिषु],D त्रसजीवेषु. 4 D भङ्गेन त्रसानां हिंसा न कर्तव्या । ७*१) 1D जीवान् । ८) 1 D गृहकार्यं. 2 D समस्तमवलोक्य. 3 जलघृततैलतक्रदुग्धादि इव, D दुग्धादि पेयवस्तूनि. 4 D हस्त वा दृष्टिशोधित ।

967) स्पर्शनात्किमपि दर्शनात्परं हेयमस्ति मनसो ऽपि किंचन ।
सम्यगेवमवबुध्य धीधनः सेवतां विमलकर्म शर्मदम् ॥ ९
968) कार्यकर्मणि निजे नियोजयेदाश्रितांश्च सकलान् प्रयत्नतः ।
प्रायशो यदिह दण्ड्यते विभुर्भृत्यदोपकरणादितीरितम् ॥ १०

969) संधानपानकफलं दलमूलपुष्पं
जीवैरुपद्रुतमपीह च जीवयोनिः ।
नालीनलादिसुषिरं च यदस्ति मध्ये
यच्चाप्यनन्तमनुरूपमदः समुज्झ्यम् ॥ ११

970) अमिश्रं मिश्रसंसर्गि कालदेशदशाश्रयम् ।
वस्तु किंचित्परित्याज्यमपीहास्ति जिनागमे ॥ ११*१

छानकर उपयोग में लाना चाहिये । भोज्य पदार्थों को हाथ से स्पर्श कर के और नेत्रों से देख कर के खाना चाहिये ॥ ८ ॥

किसी वस्तु का हेयपना स्पर्शन होने से ज्ञात होता है, कोई वस्तु देखने से त्याज्य प्रतीत होती है, तथा कोई अन्य वस्तु मन से विचार करने पर त्याज्य समझकर छोडी जाती है । इस प्रकार वस्तुओं के हेयपने को भलीभाँती जानकर विद्वान् मनुष्य को सुखदायक निर्मल कार्य को करना चाहिये ॥ ९ ॥

योग्य कार्य के करने में सेवकों को यत्नाचारपूर्वक नियुक्त करना चाहिये । कारण यह है कि प्रायः सेवकों के अपराध से स्वामी को दण्डित किया जाता है, ऐसा कहा गया है ॥१०॥

जीवों से व्याप्त व उनकी उत्पत्ति के योनिभूत संधानक (अचार), पेय अर्थात् दो दिनों से अधिक दिनों का तक्र आदि, फल-जिसमें सूक्ष्म जीव उत्पन्न होते हैं, पत्र, मूल और पुष्प ये जीवोंसे परिपूर्ण पदार्थ त्याज्य हैं । तथा नाली (वनस्पति विशेष), नल (एक प्रकार का पोला तृण) और सुषिर (अन्य पोली वनस्पति) एवं जो अनन्तकायिक हैं ऐसे सब ही पदार्थ त्याज्य हैं ॥ ११ ॥

इस जिनागम में काल, देश और अवस्था के आश्रित अमिश्र-अन्य के संसर्ग से रहित-तथा मिश्रसे संसर्ग रखने वाली वस्तु भी छोडने के योग्य है ॥ ११*१ ॥

कहा भी है-

---

९) 1 ज्ञात्वा । १०) 1 युक्त. 2 स्वामी, D किंकरदोषे न प्रभुः दण्ड्यते । ११) 1 व्यापितम्. 2 सद्यम्. 3 एतत्. 4 त्यजनीय, D त्याज्यम् । ११*१) 1 किंचित् अमिश्रं त्याज्यम्, किंचित् मिश्रं त्याज्यम् कालदेशदशादि, D सदोषं त्यजनीयम् ।

971) द्विदलं[1] द्विदलं हेयं भायेणानवतां गतम् ।
शिम्बयः[2] सकलास्त्याज्याः साधिताः सकलाश्च याः ॥ ११*२
972) नरे महारम्भपरिग्रहे दया विदूयते नीरजिनीव[1] निर्जले।
कुशीलमायाविनि वा विबुद्धधीर्यथा न विश्वासमुपैत्यनाकुलः ॥ १२
973) दुःखशोकवधतापदेवनं[1] [illegible]द विदध[2]न्निजान्ययोः[3] ।
उग्रदुःखजनकं समर्जयेद् वेदनीय[4]मविधीरिता[5]वधिः ॥ १३
974) मैत्रीप्रमोदकरुणासमवृत्तय[1]स्तु कार्या[2] यथायथमिहत्यफलं[3] विमुच्य ।
सत्त्वेषु सत्तमगुणेषु[4] सुदुःस्थितेषु दूरं विनीतिरहितेषु[5] विमत्सरेण ॥ १४

दो समान हिस्सों में विभक्त होने वाला द्विदल – मूँग व उडद आदि धान्य विशेष– पुराना हो जाने पर बहुधा छोडने के योग्य हो जाता है । (क्योंकि उसमें कीडे छिद्र करके रहने लगते हैं) । सेम आदि की सब फलियँा जो बिना फाडे ही सिद्ध की गई हैं– पकाई गई हैं–खाने के योग्य नहीं हैं ॥ ११*२ ॥

जो मनुष्य महान्–आरम्भ और परिग्रहमें निरत होता है उसमें दया इस प्रकार से संतप्त –नष्ट–होती है जिस प्रकार कि पानीसे रहित प्रदेश में कमलिनी संतप्त होती है–मुरझा जाती है अथवा जो मनुष्य कुशील और मायाव्यवहार से कलुषित होता है उसके अन्तःकरण में भी दया का वास नहीं होता है । और इसीलिये कोई भी बुद्धिमान् मनुष्य निराकुल हो कर उसके विषय में विश्वास को नहीं प्राप्त होता है ॥ १२ ॥

जो मनुष्य स्वयं अपने और दूसरे के विषय में दुःख, शोक, वध, ताप, देवन (परिदेवन) और आक्रन्दन को करता है तथा मर्यादा का उल्लंघन भी करता है वह तीव्र दुःख को उत्पन्न करने वाले वेदनीय–असातावेदनीय–कर्मको उपार्जित करता है । (उनमें पीडा देने के परिणाम का नाम दुःख है । उपकारक व्यक्ति का वियोग हो जाने पर मन में जो खेद होता है उसका नाम शोक है । वध–आयु, इन्द्रिय, मनोबल, वचनबल, कायबल और श्वासोच्छ्वास इन प्राणोंका नाश करना, निंदा व अपमानादि से चित्त. संतप्त हो कर जो खेद उत्पन्न होता है उसे ताप कहते हैं। संक्लेश परिणाम से गुणस्मरणपूर्वक स्वपरोकार की अभिलाषासहित दया उत्पन्न करने वाला जो शोक होता है उसे देवन कहते हैं । निन्दा व अपमानादिक से अश्रुपातपूर्वक प्रचुर विलाप करने का नाम आक्रन्दन है) ॥ १३ ॥

आत्महित के अभिलाषी सत्पुरुष को इस लोकसंबन्धी फल की अपेक्षा न कर के मात्सर्य भाव से रहित होते हुए यथा योग्य क्रम से प्राणिमात्र के विषय में मित्रता का भाव, उत्तम

११*२) 1 P सारी फली गोरससंयुक्ता, D मुद्गादिकम्. 2 चौला मूंग माष मोठक फली आली कोमल समस्ता त्याज्याः, D वालहुल्लि । १२) 1 पद्मिनी, D कमलिनीव । १३) 1 रुदनम्. 2 कुर्वन् 3 स्वपरनिमित्तयोः, D स्वपरयोः. 4 D वेदनीयं कर्म. 5 निराकृत, D मर्यादारहितम् । १४) 1 माध्यस्थम्. 2 P°कुर्या, करणीया . 3 इहलोकफलम्, D निदानफलम्. 4 D गुणयुक्तेषु. 5 विपरीतवृत्तिषु ।

975) उक्तं च —

कायेन मनसा वाचा सर्वेष्वपि च देहिषु ।
अदुःखजननी वृत्तिर्मैत्री मैत्रीविदां मता ॥ १४*१

976) तपोगुणाधिके पुंसि प्रश्रयाश्रयनिर्भरः ।
जायमानो मनोरागः प्रमोदो विदुषां मतः ॥ १४*२

977) दीनाभ्युद्धरणे बुद्धिः कारुण्यं करुणावताम् ।
हर्षामर्षोज्झिता[1] वृत्तिर्माध्यस्थं समुदाहृतम् ॥१४*३

978) इत्थं प्रयतमानस्य[1] गृहस्थस्यापि देहिनः ।
करस्थो जायते स्वर्गो नास्य दूरे च तत्पदम्[2] ॥ १४*४

सम्यग्दर्शनादि गुणों के धारकों में हर्ष का भाव, रोगादि से अतिशय दुखी प्राणियों के विषय में दयाभाव और अविनीत–विपरीत स्वभाववाले–जनों के विषय में समवृत्ति–मध्यस्थता के भाव–को धारण करना चाहिये ॥ १४ ॥

सब ही प्राणियों के विषय में शरीर से, मन से और वचन से दुःख न उत्पन्न करने की भावना होती है उसे मैत्रीके ज्ञाता मैत्री कहते है ॥१४*१॥

तपगुणसे अधिक–तपश्चरण और संयमादि गुणों में दृढता को प्राप्त–सत्पुरुष के विषय में जोअतिशय विनय के आश्रय से परिपूर्ण मन में अनुराग प्रादुर्भूत होता है उसे विद्वान् पुरुषोंने प्रमोद माना है ॥ १४*२ ॥

दयालु जनों के अन्तःकरण में जो दीन-दुःखी प्राणियों के उद्धार की–दुःख से संरक्षण की– बुद्धि (भावना) उदित होती है, उसका नाम कारुण्य है । और विपरीत बुद्धि मनुष्यों के विषय में जो राग व द्वेष रहित वृत्ति–उदासीनता का भाव – उत्पन्न होती है, उसे माध्यस्थ–भाव कहा गया है ॥ १४*३ ॥

जो प्राणी उपर्युक्त भावनाओं के अनुसार प्रयत्न कर रहा है वह भले ही गृहस्थ क्यों न हो, फिर भी स्वर्ग को उसके हाथ में ही स्थिती समझना चाहिये । तथा वह पद–प्रसिद्ध मोक्षपद – भी उसके लिये दूर नहीं है । (अभिप्राय यह है कि उपर्युक्त भावनाओं का चिन्तन करने वाला मनुष्य गृहस्थ होने पर भी शीघ्र ही स्वर्ग-मोक्ष को प्राप्त करता है ॥ १४*४॥

१४*२) 1 विनय । १४*३) 1 रागद्वेषरहितवृत्तिः । १४*४) 1 यत्नपरायणस्य. 2 PD मोक्षपदम् ।

979) पुण्यं तेजोमयं प्राहुः प्राहुः पापं तमोमयम् ।
तत्पापं[1] पुंसि किं तिष्ठेद्दयादीधितिमालिनि[2] ॥ १४*५

980) क्रियायाः सर्वस्या भवति कलिलं[1] संगतमेव-
मभिध्यानात्प्रायस्तरतमतया[2] किंतु विदुषाम् ।
यथैवैणीसिंह्योः[3] कृषिकरधीवरयोस्तादृकरयोः[4]
प्रियापुंस्त्र्योर्मध्ये वि तविनिवेशस्य[5][6] यदि वा ॥ १५

981) तदुक्तम्—
अथ शुभमशुभं वा सत्यमस्ति क्रियायाः
फलमपघनभाजां[1] निष्फलं नैव कर्म ।
निरवधिपरिशुद्धब्रह्मगम्भीरमूर्तिः
स जयति परमात्मा निष्फला[2] यस्य सेवा ॥ १५*१

पुण्य को तेजोमय–प्रकाशस्वरूप – और पापको अन्धकारस्वरूप कहा जाता है। सो वह अन्धकारस्वरूप पाप क्या दयारूपी सूर्यप्रकाश के धारक पुरुष में अवस्थित रह सकता है ? ॥ १४*५ ॥

जो भी क्रिया है उस सभी से यह पाप संगत–संबद्ध– रहता है । परन्तु प्रायः वह विद्वानों के संकल्प के अनुसार हीनाधिक होता है । जैसे–हरिणी और सिंहिनी में संकल्प को विशेषता से उस पापकी हीनाधिकता होती है । दूसरा उदाहरण–खेत में किसान हल चलाते समय अनेक जीवों को नष्ट करता है,परन्तु उन जीवों को मारने का भाव चूंकि उसके मन में नहीं होता है इसलिये वह अधिक पापका भागी नहीं होता है । परन्तु मछलियों का संहार करने वाला धीवर उन मछलियों को न पकडते हुए भी मन में मारने का संकल्प बना रहने से अधिक पापी होता है। (तीसरा उदाहरण) कोई पुरुष पत्नी और लडकी दोनोंके बीच बैठा हुआ है व उसे दोनों के शरीरका स्पर्श हो रहा है । शरीरस्पर्श यद्यपि दोनों का समान है फिर भी मनोगत भाव में भेद रहता है ॥ १५ ॥

कहा भी है–

१४*५) 1 तमोमयं पापम्. 2 दीधितिमालिन् शब्दः, दीधितिमाली सूर्यः, तस्मिन् दयादीधितिमालिनि, D सूर्यं । १५) 1 (अ) सत्यम्. 2 तारतम्यतया. 3 हरिणीसिंहिनीद्वयोः, D हरिणी. 4 PD कृषिकरधीवरयोः. 5 स्त्रीपुत्रिद्वयोः. 6 कृतानुभवस्य. १५*१) 1 शरीरधारिणाम्, D शरीरभाजां. 2 निष्कर्मा ।

982) अन्यच्च—

क्रियान्यत्र क्रमेण स्यात् कियत्स्वेव[1] च वस्तुषु ।
जगत्त्रयादपि स्फारा चित्ते तु क्षणतः क्रिया[2] ॥ १५*२

983) तदुक्तम् —

पातालमाविशसि यासि नभो विलङ्घ्य
दिङ्मण्डलं भ्रमसि मानस चापलेन ।
भ्रान्त्यापि जातु[1] विमलं तादगात्मनीनं[2]
न ब्रह्म संस्पृशसि वीतजरादिदोषम्[3] ॥ १५*३

984) स्थावरेष्वपि न कामवृत्तयः[1] किंतु कार्यवशतो महाधियः[2] ।
वृत्तिमादधति[3] के ऽपि सत्तमाः[4] सर्वतो ऽपि विरतिं वितन्वते[5] ॥ १५*४

क्रिया का निश्चित ही शुभ अथवा अशुभ कुछ न कुछ फल होता है । क्यों कि देहधारी-संसारी-प्राणियों की कोई भी क्रिया निष्फल नहीं होती है । अमर्याद गुणों से सुशोभित शुद्ध व ब्रह्मस्वरूप गम्भीर मूर्ति के धारक उस परमात्मा की जय हो जिसकी सेवा – हितोपदेशादि रूप क्रिया – निष्फल–पाप अथवा पुण्य के बन्धरूप फल से रहित–होती है ॥ १५*१ ॥

दूसरे इतर कितनी ही वस्तुओं में जो क्रिया होती है वह क्रमशः होती है । परन्तु मन में जो क्रिया होती है वह तीनों लोकों से भी विशाल व एक ही क्षण में होती है । अर्थात् पदार्थ में मनका चिन्तन इतना व्यापक होता है कि उसमें तीनों लोक समा सकते हैं ।।१५*२।।

कहा भी है–मन के विषय में ऐसा कहा है

हे मन ! तू पाताल में प्रवेश करता है,आकाश को लाँघकर जाता है, तथा तू चपलता से सब दिशाओं के घेरे में भी भ्रमण करता है । परन्तु वृद्धावस्थादि दोषोंसे रहित व आत्मा के हितकारी निर्मल ब्रह्म को–परमात्मस्वरूप को - तू भूल से भी कभी स्पर्श नहीं करता है ॥ १५*३ ॥

महाबुद्धिमान् मनुष्य स्थावर प्राणियों के विषय में भी यथेच्छ प्रवृत्ति नहीं करते हैं किन्तु कार्य की अपेक्षा से ही वे उक्त स्थावरों के वध में प्रवृत्त होते हैं । कितने ही सर्व श्रेष्ठ महापुरुष उनमें पूर्णतया विरत होते हैं अर्थात् वे स्थावर घात और त्रसघात दोनों से ही विरत हो कर अहिंसा महाव्रतका पालन करते हैं ॥ १५*४ ॥

१५*२) 1 PD क्रियाश्चैव. २ P° क्रिया. १५*३) 1 कदाचित्. 2 आत्महितम्. 3 D ब्रह्म । १५*४) 1 स्वेच्छाचारिणः. 2 D सत्पुरुषाः. 3 धारयन्ति. 4 सत्पुरुषाः दशमएकादशमप्रति [मा] धारी, D प्रतिमा. 5 विस्तारयन्ति ।

985) ग्रामस्वामिस्वकार्येषु यथालोकं[1] प्रवर्तताम् ।
गुणदोषविभागेषु लोक एव यतो गुरुः[2] ॥ १५*५

986) दर्पादविज्ञानबलादुपेते[1] दोषे प्रमादादुपरोधतो वा ।
यथागमं निर्जरणं[2] विदध्यात्[3] स्वचित्तशुद्ध्यै जनरञ्जनाय ॥ १६

987) प्रायो[1] लोको जिनैरुक्तश्चित्तं तस्य मनो मतम् ।
तच्चित्तग्राहकं कर्म प्रायश्चित्तं निगद्यते ॥ १७

988) द्वादशाङ्गधर एकको ऽखिलं[1] दातुमर्हति[2] न धावनं[3] गुरुः ।
रोगिणीवं[4] भिषगुन्मना भवेत् तत्प्रदा[5]स्तु बहवो बहुश्रुताः ॥ १८

ग्रामकार्य, स्वामिकार्य और आत्मकार्य में लोकव्यवहार के अनुसार प्रवृत्ति करनी चाहिये । क्योंकि गुण और दोष के विभागों में लोक ही गुरु हैं ।(अर्थात् लोक में जिस कार्य को गुण और दोष का कारण माना जाता है उसे उसी प्रकार से गुण और दोष का कारण – उपादेय अथवा हेय समझना चाहिये) ॥ १५*५ ॥

अभिमान के वश हो कर अथवा अज्ञानता के बल से प्रमाद के निमित्त से अथवा दूसरे के आग्रह से दोष के उत्पन्न होने पर आगम के अनुसार अपने चित्त की शुद्धि के लिये और जनसन्तोष के लिये किये हुए अपराधों की निर्जरा करनी चाहिये। (अर्थात् प्रायश्चित्त ले कर शुद्ध होना चाहिये) ॥ १६ ॥

जिन भगवानने 'प्राय' शब्दका अर्थ लोक (जन) कहा है तथा उसके मन को चित्त माना गया है । इस सार्थक नाम के अनुसार लोक के चित्त का ग्राहक (अनुग्राहक)–मनुष्य के मन को निर्मल करने वाला–जो कार्य है उसे प्रायश्चित्त कहा गया हैं । (अभिप्राय यह हैं कि अभिमानादि के वशीभूत हो कर किसी दोष के उत्पन्न होने पर उस की शुद्धि के लिये जो गुरु की आज्ञानुसार क्रिया–उपवासादि–किया जाता हैं उसका नाम प्रायश्चित्त है) ॥१७ ॥

द्वादशांग श्रुतका जानने वाला अकेला एक गुरु सब धावन (प्रायश्चित्त) के देने में इस प्रकार से समर्थ नहीं होता हैं, जिस प्रकार कि रोगी की परीक्षा करने में अकेला विमनस्क वैद्य समर्थ नहीं होता हैं । किन्तु उसके देने वाले अनेक बहुश्रुत विद्वान होते हैं ॥ १८ ॥

१५*५) 1 D लोकवत्. 2 D गुणदोषविचारणे लोक एव गुरुः । १६) 1 प्राप्ते. 2 D प्रायश्चित्तविधिः 3 कुर्यात् । १७) 1 D° तदुक्तम् । १८)1 प्रायश्चित्तम्. 2 योग्यं भवति, D श्रुतकेवली प्रायश्चित्तं दातुं योग्यः. 3 PD शोधनम्. 4 D महावैद्यो यथा. 5 प्रायश्चित्त ।

989) कायेन वाचा मनसा च पापं यदर्जितं तत्क्षपणीयमेभिः[1] ।
त्रिधापि योगो हि शुभाशुभानां यदास्रवाणां कथितो निमित्तम् ॥ १९

990) हिंसाब्रह्मचुराप्रायं काये कर्माशुभं मतम् ।
असभ्या[1]सत्यपरुष[2]प्रायं वचनगोचरम् ॥ २०

991) असूयेर्ष्या[1]मदप्रायं मनोव्यापारसंश्रयम् ।
एत[2]द्विपर्ययाज्ज्ञेयं शुभमेतेषु[3] तत्पुनः[4] ॥ २१

992) हिरण्यकन्यापशुभूमिमुख्यैर्दानैरनेकैः क्षयमेति नैनः[1] ।
यथा हि रोगः पुरुलङ्घ[2]नादिसाध्यो न बाह्यैर्बहुधोपचारैः[3] ॥ २२

993) यथोपवासक्षपणीयरोगे बाह्यो विधिस्तत्र[1] निरर्थकः स्यात् ।
पापे ऽपि तद्वत्परिचिन्त्य कार्य[2]मन्तर्विधेरन्वगुपार्चनाद्यम्[3] ॥ २३

शरीर से, वचन से और मन से जो पाप उपार्जित किया जाता है उस को उन्हींके द्वारा नष्ट करना चाहिये । कारण यह कि शुभ और अशुभ कर्मोंके आश्रवोंका कारण उपर्युक्त-तीनों प्रकार का योग ही कहा गया है ॥ ॥ १९ ॥

हिंसा, मैथुनसेवन और चोरी आदि कार्य शरीर के विषय में अशुभ माना गया है असभ्य, असत्य और कठोर भाषण करना यह वचनविषयक अशुभ कर्म है । असूया–दूसरे के गुणों में भी दोषारोपण करना, ईर्ष्या– दूसरे के अभ्युदय को नहीं सह सकना — और गर्व ये विकार मनोविकार के आश्रय से उत्पन्न होते हैं । इससे विपरीत आचरण उक्त शरीर, वचन और मन के विषय में शुभ समझना चाहिये । जैसे-अहिंसा ब्रह्मचर्य व अचार्य आदिक शरीर-विषयक शुभ आश्रव हैं ॥ २०–२१ ॥

सुवर्ण, कन्या, पशु और भूमि आदि के दानों से विविध पाप का नाश नहीं होता है । जैसे–बहुत लँघनादिकों से साध्य (नष्ट होने वाला) रोग बाहय अनेक उपचारों से साध्य नहीं होता है । जिस प्रकार उपवासों से नष्ट किये जाने वाले रोग पर बाह्य विधि व्यर्थ होती है उसी प्रकार पाप के नाश में भी प्रमुख अभ्यन्तर विधि के पश्चात् पूजा, उपासना आदि रूप बाह्यविधि को करना चाहिये ॥ २२–२३ ॥

---

१९) 1 PD कायवाङ्मनोभिः । २०) 1 ग्रामीकवचनम्, D सतां विमुखं वचनम्. 2 कठिनम् । २१) 1 असहनशीलता, D परदोषग्रहणप्रायं. 2 कायवाङ्मनसाम्. 3 कायवाङ्मनस्सु. 4 शुभम् । २२) 1 PD पापम्. 2 प्रचुरलङ्घन. 3 पूजाऔषधादिभिः, D एतैः हिरण्यादिदानैर्योगजातं पापं क्षयं नोपैति । २३) 1 रोगक्षपणे, 2 करणीयम्. 3 पश्चा. पचरणाद्यम्, D पूजादिकं न साधयन्ति ।

994) तदुक्तम्–
निहत्य निखिलं पापं मनोवाग्देहदण्डनैः ।
करोतु निखिलं कर्म दानपूजादिकं ततः ॥ २३*१

995) ममाप्रवृत्तेर्विरति[1]ः समग्रे बाह्यान्तरङ्गे ऽपि कृतक्रियः सन् ।
संस्मृत्य नामानि महागुरूणां[2] निद्रादि कुर्याद्विधिना रजन्याम्[3] ॥ २४

996) दैवादायुर्यदि विगलितं स्यादमुष्यां[1] रजन्यां
प्रत्याख्यानप्रजनितफलं स्यात्तदा तन्निवृत्तेः ।
भोगैः शून्यं व्रतविरहितं वा ... येत्तम्न कालं
एतावद्यत्पशुमनुजयोरन्त[ ] सूरिगीतम्[2] ॥ २५

997) छेदन[1]ताडनबन्धा भारस्यारोपणं समधिकस्य ।
पानान्नयोश्च रोध[2]ः पञ्चाहिंसाव्रतस्यै...त ॥ २६ । ...चारा इति शेषः ।

998) देवतार्थमपि मारयन्नजं[1] वारसप्तकमभूदजो ऽसुखी ।
ग्राम[2]णीरिति[3] सदैव यः पुनर्हिंसकः कथमसौ मुमुक्षते[4] ॥ २७

मन, वचन, और शरीर के निग्रह से सब पापोंको नष्ट करके तत्पश्चात् दानपूजना-दिक कार्य को करना चाहिये ॥ २३*१ ॥

बाह्य और अन्तरंग सब ही विषय में जब तक मेरी प्रवृत्ति सम्भव नहीं है,तब तक के लिये मैं उस सब से विरत होता हूँ–उसका त्याग करता हूँ–इस प्रकार की प्रतिज्ञा करके महान् गुरुओं के नामों का स्मरण करते हुए रात्रि में विधिपूर्वक निद्रा आदि करना चाहिये ॥ २४ ॥

कारण यह कि दैवयोग से यदि इस रात में मेरी आयु समाप्त हो गई– मरण हो गया–तो जो विषयत्याग मैंने किया है उस से उत्पन्न हुआ फल मुझे प्राप्त होगा । बुद्धिमान् मनुष्य को भोगों से शून्य काल को व्रतरहित नहीं गमाना चाहिये । पशु और मनुष्य के मध्य में यही तो अन्तर आचार्यों ने कहा है ॥ २५ ॥

नासिका आदि का छेदन, ताडन लकडी आदि से मारना-बाँधना, अधिक बोझा लादना ओर भोजन-पान रोक देना, ये अहिंसाणुव्रत के पाँच अतिचार हैं ॥ २६ ॥

कथाग्रन्थों में यह सुप्रसिद्ध है कि जिस ग्रामणी ने–गाँव के मुखिया ने–देवता के लिये भी बकरा मारा था वह मरकर सात बार बकरा हुआ । इस प्रकार वह बहुत दुखी हुआ।

---

२४) 1 D निवृत्तिः. 2 PD पञ्चपरमेष्ठिनाम्. 3 रात्रौ । २५) 1 अस्यां रात्री. 2 PD सूरिभिः कथितम् । २६) 1 D नासिकादिच्छेदनं. 2 जलतृणयोर्निरोधः । २७) 1 [छागम्] 2 ग्रामपालकः 3 D हेतोः. 4 ... मोचयति, D मुक्तो भवति ।

999) धीवरस्तु किल वारचतुष्कं जालगाम्भसिकमप्रतिनिघ्नन्[1][2] ।
मङ्गलं न कतमत्समवाप यत्यतामिति महद्भिरहिंसा ॥ २८

1000) उक्तं च —
न गोप्रदानं न महीप्रदानं न चान्नदानं हि तथा प्रधानम् ।
यथा वदन्तीह महाप्रधानं सर्वप्रदानेष्वभयप्रदानम्॥ २८*१

1001) आद्यव्रतस्वरूपं समासतो ऽभाणि नो विशेषो ऽत्र ।
निघ्नानानिघ्नानानाश्रित्य स[1] पूर्वमेवोक्तः ॥ २९

1002) मन्त्रौषधातिथेयीकृते ऽपि हिंसेति दूरमुत्सृज्या ।
गर[1]कण्टकाहि[2]रिपुवत्म[3] हिंसा सर्वदा त्रेधा ॥ ३०

1003) अहिंसाव्रतमेकत्र[1] परत्र[2] सकलाः क्रियाः ।
चिन्तामणिफलं पूर्वे परत्र च कृषेः फलम् ॥ ३१

फिर भला जो मनुष्य सदैव प्राणिहिंसा किया करता है, वह भला कैसे दुख से मुक्त हो सकता है ? ॥ २७ ॥

इस के विपरीत जिस धीवर ने जाल में आयी हुई मछली को चार बार छोडा व उसे नहीं मारा, वह भला कौन-से कल्याण को नहीं प्राप्त हुआ है ? अर्थात् वह अतिशय सुख को प्राप्त हुआ है । इसलिये महापुरुषोंको उस अहिंसा के विषय में सदा प्रयत्नशील रहना चाहिये ॥ २८ ॥ कहा भी है—

सब दानों में जिस प्रकार अभयदान अतिशय प्रधान है उस प्रकार न तो गौ का दान प्रधान है, न भूमिका दान प्रधान है और न अन्न का भी दान प्रधान है, ऐसा यहाँ कहा जाता है ॥ २८*१ ॥

प्रथम अहिंसाव्रत का स्वरूप संक्षेपसे कहा जा चुका है । उसमें यहाँ कुछ विशेष नहीं है। हिंसा करने वाले और न करने वाले इन दोनों में जो विशेषता है उसे पूर्व में ही कहा जा चुका है ॥ २९ ॥

हिंसा को विष, कण्टक, सर्प और शत्रु के समान भयानक समझ कर निर्मलबुद्धि मनुष्य को उस हिंसा का मन्त्र, औषधि और अतिथि-सत्कार के लिये भी सदा मन, वचन व काय से दूरसे ही परित्याग करना चाहिये ॥ ३० ॥

एक ओर अहिंसा व्रत को और दूसरी ओर अन्य समस्त दानादि क्रियाओंको स्थापित करने पर पूर्व में स्थापित उस अहिंसा का फल चिन्तामणि के समान उसी समय प्राप्त होने

२८) 1 जलगतमानसिकमत्स्यम्. 2 अमारयन्. 3 कतरत्. 4 प्राप्तः. 5 यत्नं कुर्वताम्, D यत्नः क्रियताम् । २९) 1 स विशेषः । ३०) 1 विष. 2 सर्प. 3 निर्मलमनसा पुरुषेण । ३१) 1 स्थाने. 2 अन्यत्र ।

1004) प्रमादयोगादसदुक्तयो[1] यास्ता[2] वीतरागैरनृतं भणीतम् ।
समासतस्तच्च[3] चतुर्विधं स्याद्विचार्य चैनद्[4]व्रतिना महेयम्[5] ॥ ३२

1005) स्वक्षेत्रकालभावैः सदपि[1] हि यस्मिन्निषिध्यते[2] वस्तु ।
तत्प्र[3]थममसत्यं स्यान्नास्ति यथा देवदत्तो ऽत्र ॥ ३२*१

1006) असदपि[1] हि वस्तुरूपं यत्र परक्षेत्रकालभावैस्तु[2] ।
उद्भाव्यते द्वितीयं[3] तदनृतमस्मिन्[4] यथास्ति घटः ॥ ३२*२

1007) वस्तु सदपि स्वरूपात् पररूपेणाभिधीयते यस्मिन् ।
अनृतमिदं च[1] तृतीयं विज्ञेयं गौरिति यथाश्वः[2] ॥ ३२*३

1008) गर्हितमवद्यसंयुत[1]मप्रियमपि भवति वचनरूपं यत् ।
सामान्येन त्रेधा मतमिदमनृतं तुरीयं तु ॥ ३२*४

वाला है। किन्तु दूसरी ओर स्थापित अन्य समस्त क्रियाओंका तुच्छ फल खेती के फल के समान कालान्तर में प्राप्त होने वाला है ॥ ३१ ॥

प्रमाद के वश हो कर जो असत्य वचन बोले जाते हैं उन्हें वीतराग भगवान् ने अनृत (असत्य) वचन कहा है वह संक्षेप से चार प्रकार का है। सत्यव्रती को विचार कर उसका परित्याग करना चाहिये ॥ ३२ ॥

आगे उक्त चार प्रकार के असत्य वचन का ही स्पष्टीकरण किया जाता है–जिस में स्वकीय क्षेत्र, काल और भाव से वस्तु के विद्यमान होने पर भी उस का निषेध किया जाता है वह पहला असत्य वचन है। जैसे–यहाँ देवदत्त नहीं है ॥ ३२*१ ॥

जिसमें परकीय क्षेत्र, काल और भाव से वस्तु स्वरूप के न होने पर भी उसके सद्भाव को प्रकट करना, यह दूसरा असत्य है। जैसे–यहाँ घट है ॥ ३२*२ ॥

जिस में स्वरूप से विद्यमान वस्तु के अस्तित्व को पररूप से कहा जाता है उसे तृतीय असत्य समझना चाहिये। जैसे-बैल को घोडा कहना ॥ ३२*३ ॥

जिस वचन का स्वरूप गर्हित, अवद्य (पाप) संयुक्त, तथा अप्रिय होता है उसे चौथा असत्यवचन जानना चाहिये। वह सामान्य से तीन प्रकार का है ॥ ३२*४ ॥

आगे इसी को स्पष्ट किया जाता है –

---

३२) 1 द्वितीयव्रतं कथयति. 2 उक्तयः 3 अनृतम्. 4 PD चैनं व्रतिना प्रमादयोगम्. 5 त्याज्यम्। ३२*१) 1 विद्यमानवस्तु. 2 यत्र निषिध्यते. 3 स्वक्षेत्रकालभावैः सत्-निषेधः प्रथमम् अनृतम्। ३२*२) 1 अविद्यमान. 2 भाव-आकृति. 3 परक्षेत्रकालभावैः असत्प्रकाशनं द्वितीयम् अनृतम्. 4 क्षेत्रादिषु। ३२*३) 1 P°च Omitted 2 D यथा गौः अश्वः कथ्यते। ३२*४) 1 D अवद्ययुक्तं न च।

1009) पैशून्यहासगर्भं कर्कशमसमञ्जसं[1] प्रलपितं च ।
अन्यदपि यत्स्वतन्त्रं तत्सर्वं गर्हितं गदितम् ॥ ३२*५

1010) छेदनभेदनमारणकर्षणवाणिज्यचौरवचनादि ।
तत्सावद्यं यस्मात् प्राणिवधाद्याः प्रवर्तन्ते ॥ ३२*६

1011) अरतिकरं भीतिकरं[1] खेदकरं वैरकलहशोककरम् ।
यदपरमपि तापकरं परस्य तत्सर्वमप्रियं[1] ज्ञेयम् ॥ ३२*७

1012) सर्वस्मिन्नप्यस्मिन् प्रमादयोगैकहेतुकत्वं यत् ।
अनृतवचनेऽपि तस्मान्नियतं हिंसा समवतरति ॥ ३२*८

1013) अथनैवं चतुर्धा—

असत्यं सत्यगं किंचित् किंचित्सत्यमसत्यगम् ।
सत्यसत्यं पुनः किंचिदसत्यासत्यमेव च ॥ ३२*९

चुगली और हँसी से युक्त वचन, कठोर, असमंजस तथा और भी जो स्वतंत्र–आगम-विरुद्ध–वचन बोला जाता है उस सब को गर्हित वचन कहा गया है ॥ ३२*५ ॥

जो वचन नासिका आदि के छेदने, कान आदि शरीर के अवयवों के खण्डित करने, लाठी आदि से ताडित या सर्वथा घात करने, भूमि के जोतने, व्यापारकार्य करने और चोरी करने में प्राणियों को प्रवृत्त करता है वह सावद्य वचन कहलाता है । कारण यह कि ऐसे वचन से सावद्य–प्राणिवध आदि से होने वाले पाप--की प्रवृत्ति हुआ करती है ॥ ३२*६ ॥

जो वचन अप्रीति, भय, खेद, वैर, कलह और शोक को तथा और भी संताप को उत्पन्न करने वाला हो उसे अप्रिय वचन जानना चाहिये ॥ ३२*७ ॥

इस सब अनृत भाषण में भी चूँकि प्रमादयोग मुख्य कारण है, इसलिये इसमेंभो निश्चय से हिंसा उत्पन्न होती ही हैं ॥ ३२*८ ॥

वचन के चार भेद इस प्रकार भी हैं–

कोई वचन सत्य के आश्रित असत्य, कोई असत्य के आश्रित सत्य, कोई सत्य सत्य और कोई असत्यासत्य ही होता है ॥ ३२*९ ॥

३२*५) 1 D असहनशीलम् । ३२*७) 1 D °भीतिकरं, वैर, वं Omitted. अप्रीतमं ज्ञातव्यम् ।

अस्येवं तात्पर्यम्–असत्यमपि किंचित्सत्यमेव यथा –
अन्धांसि[1] रन्धयति वयति वासांसीति । सत्यमप्यसत्यं
किंचिद्यथा—अर्धमासतमे दिने तवेदं[2] देयमित्यास्थाय[3]
मासतमे संवत्सरतमे वा दिने ददातीति । सत्य[illegible]त्यं
किंचिद्यथा—यद्वस्तु देशकालाकारप्रमाणं प्रतिपन्नं
तत्र तत्रैवाविसंवाद इति । असत्यासत्यं किंचिद्यथा—
यत्स्वस्यासत् संगिरते[4] कल्ये[5] दास्यामीति ।

1014) तुरीयं[1] वर्जयेन्नित्यं लोकयात्रात्रये[2] स्थितः ।
गृहाश्रमी प्रवर्तेत गुणदोषौ विचारयन् ॥ ३३

1015) वाणीमसभ्यां[1] परदोषगर्भामजायम[illegible]प्रगल्भाम् ।
भाषेत नो किं त्वभिजातरम्यां[2] हितां मितां सद्व्यवहारगम्याम्[3] ॥ ३४

इस का तात्पर्य इस प्रकार है—

१) असत्य सत्य–कोई वचन वस्तुत: असत्य हो कर भी व्यवहार में सत्य माना जाता है। जैसे –भात को राँधता है अथवा वस्त्रों को बुनता है। यहाँ भात के योग्य चावलों को भात शब्द से और वस्त्र के योग्य तन्तुओं को वस्त्र शब्द से निर्दिष्ट किया गया है। अतएव उक्त दोनों वाक्यों के असत्य होने पर भी चूंकि लोकव्यवहार में ऐसे वाक्यांको असत्य नहीं माना जाता है, इसीलिये ऐसे वचन सत्याश्रित असत्य माना जाना है। २) सत्यासत्य–कोई वचन सत्य हो कर भी असत्य हुआ करता है। जैसे 'मैं पन्द्रहवें दिन तुम्हें इसे दे दूंगा? इस प्रकार की प्रतिज्ञा करके भी परिस्थितिवश पन्द्रहवें दिन न दे कर महीने में व वर्ष में भी उसे देना। यहाँ चूंकि दे दिया गया, इसीलिये तो सत्य, परन्तु प्रतिज्ञात समय पर नहीं दे सका, इसिलिये उक्त वाक्य कुछ अंश में असत्य भी है। ३) जो वस्तु जिस देश, काल, आकार और प्रमाण में है,उसे उसी स्वरूप में कहना; इस का नाम सत्यसत्य है। ४)जो वस्तु अपने पास नहीं है व जिस का देना असम्भव है उस के विषय में 'मैं उसे कल दे दूंगा 'ऐसी प्रतिज्ञा करना, यह असत्यासत्य वचन कहलाता है।

तीन प्रकार के लोकव्यवहार में स्थित गृहस्थ को उपर्युक्त चार प्रकार के वचन में चौथे असत्यासत्य, वचन का सर्वथा त्याग करना चाहिये। शेष तीन प्रकारके वचन को(असत्य-सत्य, सत्यासत्य और सत्यसत्य को) वह व्यवहार के अविरुद्ध होने से बोल सकता है। उसे गुण और दोष का विचार करते हुए ही प्रवृत्ति करनी चाहिये ॥ ३३ ॥

गृहस्थ को असभ्य, दूसरों के दोषों से परिपूर्ण-निन्दा परक, अतिशय से –किसी प्रका-

---

गद्यम्. 1 भोजनानि, D भोजनं करोति वस्त्रं वुणति. 2 चिन्ताकरम्, D षण्मासान् तव कस्मरं ददामि ददाति वर्षदिने. 3 समाधाय. 4 कथयति, D पुनः पुनः वदति. 5 कल्ये श्वो दिने प्रभाते अन्यदिने । ३३) 1 असत्यासत्यम्. 2 D सत्यं सत्यत्रयी वचः । ३४) 1 अनारी [र्यां]. 2 कुलस्य योग्याम्. 3 D गोचरां ।

1016) सत्यासत्याप्युभयी सानुभयी[1] [2]स्याच्चतुर्विधा वाणी ।
किंतु तृतीया[3] योग्या सत्यव्रतधारिणां गृहिणाम् ॥ ३५

1017) आद्यं तथान्त्यमिति च द्वितयं जनानां[1] क्षेमंकरं भवति तत्किल तीर्थभर्तुः[2] ।
द्व्यक्षादिभवि च व्यवहारदूरं[3] प्रायो मयेत्यभिहितं न विशेषयोगात् ॥

1018) एषु चतुर्षु भेदेषु यत्सत्यं दशधा हि तत् ।
देशादिभेदतः प्रोचूरन्यत्र गदितं यथा ॥ ३७

1019) देशसंमतिनिक्षेप[1]नाम[2]रूपप्रतीतितः ।
संभावनोपमाने च व्यवहारो[3] भाव इत्यपि ॥ ३८

रकी विशेषता से–रहित (अथवा घृणित) और धृष्टतायुक्त वचनको नहीं बोलना चाहिये । किन्तु उसे कुलीन जनों को रमणीय प्रतिभासित होनेवाले ऐसे हितकारक व परिमित वचन को बोलना चाहिये जो कि समीचीन व्यवहार करने वाले सत्पुरुषों को अभीष्ट हो ॥ ३४ ॥

सत्य, असत्य, उभय और अनुभय इस प्रकार से भी वचन के चार भेद होते हैं परन्तु इन में सत्याणुव्रतधारी श्रावकों को तीसरा वचन (उभय) बोलना योग्य है ॥ ३५ ॥

उपर्युक्त चार प्रकार के वचन में प्रथम (सत्य) और अन्तिम (अनुभय) यह दो प्रकार-का वचन प्राणियों के लिये हितकर हैं, और वह तीर्थंकर जिनेन्द्र के हुआ करता है । व्यवहारी जनों से दूर–वह अनुभय वचन–द्वीन्द्रियादि जीवों के भी हुआ करता है । मैंने उसे प्रायः विशेषता के संबंध से नहीं कहा है ॥ ३६॥

इन चार प्रकार के वचनों में जो सत्य वचन है वह देश आदि के भेद से दश प्रकार का है । उसका जैसे अन्य ग्रन्थों में वर्णन किया गया है तदनुसार यहाँ कथन किया जाता है ॥३७॥

देशसत्य, संमतिसत्य, निक्षेपसत्य, नामसत्य, रूपसत्य, प्रतीतिसत्य, संभावनासत्य, उपमानसत्य, व्यवहारसत्य और भावसत्य; इस प्रकार सत्य वचन के दस भेद माने गये हैं । १) देश-सत्य-भिन्न भिन्न देश में वस्तु के जो भिन्न भिन्न नाम रहते हैं, जैसे भातको किसी देशमें चोरू कहते हैं २) संमतिसत्य–राजा की अभिषिक्त पत्नी को देवी कहना संमतिसत्य हैं । ३) निक्षेपसत्य–पाषाण की प्रतिमा में चन्द्रप्रभादिक का संकल्प करना । ४) नामसत्य–किसी मनुष्य का नाम चार भुजाओं के न होने पर भी चतुर्भुज रखना इत्यादि । ५) रूप–सत्य–अधरोष्ठ के लाल व बालों के कृष्ण वर्ण आदि होनेपर भी किसी को श्वेत (गोरा)

---

३५) 1 D सत्यासत्यताभ्यां रहिता अनुभयी कथ्यते. 2 D भवेत्. 3 PD सत्यासत्या । ३६) 1 PD °जनाभ्यां, लोकाभ्याम्. 2 तीर्थंकरस्य. 3 D सत्यासत्यरम्या इन्द्रियज्ञाने. न ज्ञायते अनुभयवाणी । ३८) 1 D स्थापना. 2 D सत्य. 3 व्यवहारे ।

1020) सत्यमन्यन्मृषा यत्रोभयं[1] सत्यानृतं हि तत् ।
तद्विपक्षा[2] तु या भाषा साप्यसत्यामृषा भवेत् ॥ ३९

1021) तत्सत्यं न हि सत्यमस्ति भविनो मृत्युर्यतो जायते
जायन्ते सुदुरुत्तराश्च विपदः स्वस्यापि यस्मात्ततः[1] ।
सर्वत्र प्रियवाक् सुखाकरमसौ प्रेत्यापि कार्यं गृही
कुर्वीतैहिकसाध्यवत्प्रियसमाचारस्थितः सर्वदा ॥ ४०

कहना । ६) प्रतीतिसत्य–यह दीर्घ है, यह ह्रस्व है इत्यादि–ह्रस्व को देख कर उस की अपेक्षा से दूसरे को दीर्घ और दीर्घ की अपेक्षा से छोटे को ह्रस्व कहना । ७) संभावनासत्य–असंभवताका परिहार करते हुए वस्तु के किसी धर्म के निरूपण करने में प्रवृत्त वचन को संभावनासत्य कहते है । जैसे–इन्द्र जम्बुद्वीप को लौटा दे अथवा लौटा सकता है। ८)उपमान सत्य–दूसरे प्रसिद्ध सदृश पदार्थ को उपमा बोलते हैं। इस के आश्रय से जो वचन बोला जाय उस को उपमासत्य कहते हैं । जैसे-पल्य–यहाँ पर रोमखण्डों का आधारभूत गड्ढा पल्य अर्थात खास के सदृश होता है, इसलिये उस को पल्य कहते हैं । ९) व्यवहारसत्य–नैगमादि नयोंकी प्रधानता सें जो वचन बोला जाता है उसे व्यवहारसत्य कहते हैं । जैसें– नैगम नय की अपेक्षा से 'मैं भात पकाता हूँ।' १०) भावसत्य–आगमोक्त विधिनिषेध के अनुसार अतीन्द्रिय पदार्थों में संकल्पित परिणामों को भाव कहते हैं । उसके आश्रित जो वचन हो उस को भाव सत्य कहते हैं।जैसे शुष्क, पक्व और नमक-मिर्च, खटाई आदि से अच्छी तरह मिलाया हुआ द्रव्य प्रासुक होता है । यहाँ पर यद्यपि सूक्ष्म जीवों को इन्द्रियों सें नहीं देख सकते तथापि आगमप्रमाणता सें उसकी प्रासुकता का वर्णन किया जाता हैं । इसलिये इसी तरह के पापवर्ज वचन को भावसत्य कहते हैं । ऐसे ये सत्य वचन के दस भेद कहे गये हैं ॥ ३८ ॥

वस्तुस्वरूप की यथार्थता का बोध करानेवाली सत्य भाषा, उस से भिन्न–विपरीत, वस्तु स्वरूप का वोध कराने वाली–असत्य भाषा, सत्य व असत्य दोनों से मिश्रित उभय भाषा और उसके विपक्षरूप–जो न सत्य कही जा सकती हो और न असत्य भी कही जा सकती हो – वह असत्यामृषा (अनुभय)भाषा कहलाती हैं ॥ ३९ ॥

जिस सत्य वचन से प्राणी का मरण होता हैं वह सत्य वस्तुतः सत्य नही हैं । तथा जिस वचन के आश्रय से अतिशय दुर्लंघ्य विपत्तियाँ अपने लिये भी प्राप्त होती हो वह भी यथार्थ में सत्य नहीं है । इसीलिये गृहस्थ को ऐसा प्रिय वचन बोलना चाहिये जो सर्वत्र—इस लोक और परलोक दोनों में ही – सुख का कारण हो । तथा उसे प्रिय समाचार में – सदाचरण में–स्थित हो कर ऐहिक साध्य के समान उसी कार्य को करना चाहिये जो सर्वत्र व सर्वदा सुखप्रद हो ॥ ४० ॥

३९) 1 D रम्यम्. 2 अनुभवम् । ४०) 1 D सत्यात् ।

1022) येनाप्रत्ययदण्डौ संतापो भवति निरपराधस्य ।
असदभिधानं त्वनृतं तत्त्याज्यं दूरतः सुधिया ॥ ४१

1023) केवलिन्यथ तपःश्रुतसंघदेवधर्मगुणवत्सु च जन्तुः ।
यस्त्ववर्णवचनो ऽस्तु कुतश्चिद् दृग्विमोहनमुपार्जयते ऽसौ ॥ ४२

1024) यो मोक्षमार्गं स्वयमेव जानन् नैवार्थिने योग्यतमाय वक्ति ।
मात्सर्यतो ऽपह्नुवतो मदाद्वा भवेदसावावरणद्वयी तु ॥ ४३

1025) मन्त्रभेदः परीवादः पैशून्यं कूटलेखनम् ।
मुधासाक्षिपदोक्तिश्च सत्यस्यैते विघातकाः ॥ ४३*१

जिस भाषण से अविश्वास उत्पन्न होता है, दण्ड भोगना पडता है और निरपराधी मनुष्य को संताप उत्पन्न होता है ऐसे अप्रशस्त वचन के बोलने का नाम असत्य है । उसका निर्मलबुद्धि मनुष्य को दूरसे ही परित्याग करना चाहिये ॥ ४१ ॥

केवली, तप, श्रुत, संघ, देव, धर्म और गुणीजनों के विषय में जो किसी कारण से निन्दात्मक भाषण करता हैं वह दर्शन मोहनीय कर्म को बाँधता है ।(भावार्थ–महापुरुषों आदि में से जो दोष नहीं हों उनको प्रगट करने का नाम अवर्णवाद है । केवली का अवर्णवाद –केवली कवलाहार–ग्रासमय आहार–को किया करते हैं । तप अवर्णवाद–तपका स्वरूप पञ्चाग्नि आदि बतलाना । श्रुत अवर्णवाद–आगम में माँस भक्षण को निर्दोष कहा गया है, इत्यादि ।संघ अवर्णवाद–मुनिसंघ के विषय में ये नंगे बैल है, अपवित्र है इत्यादि निन्दावचन कहना । देव अवर्णवाद – देव मद्यपान व माँसभक्षण करते हैं, इत्यादि कथन करना । धर्म अवर्णवाद–अहिंसा धर्म निरर्थक है, उस के धारक कायर होते हैं, इत्यादि प्रकार से समीचीन धर्म की निन्दा करना) ॥ ४२ ॥

जो श्रावक मोक्षमार्ग को स्वयं जानता हुआ भी उसके जानने के अभिलाषी अतिशय योग्य व्यक्ति को मात्सर्य, अथवा अभिमान के वश हो कर नहीं कहता हैं उस के ज्ञानावरण और दर्शनावरण इन दोनों कर्मोंका बन्ध होता है ॥ ४३ ॥

मंत्रभेद,परिवाद, पैशून्य, कूटलेखन, तथा मुधासाक्षिपदोक्ति ये सत्यव्रत के विघातक पाँच अतिचार हैं । (इन का स्पष्टीकरण इस प्रकार है–१) मन्त्रभेद–अंगविकार आदिसे दूसरे के अभिप्राय को जानकर उस को प्रगट करना। २) परिवाद–दूसरों की निन्दा करना । ३) पैशून्य–चुगली करना । ४) कूट लेखन–जो न दूसरेने कहा है और न जो किया भी है उसे

४२) 1 दोषवचन दोषोद्भावन. 2 D दर्शनमोहं । ४३) 1 दर्शनज्ञानावरणद्वयी । ४३*१) 1 P °साक्षिः पदोक्तिश्च. 2 D दोषाः ।

1026) राजद्विष्टामन्यरामानुबन्धां स्वाम्यारम्भप्रोज्झितां लो[illegible]वर्ज्याम् ।
स्वाचारस्थः संकथां तादृशीं नो [illegible]यादन्यां सर्वतः प्रीतिमिच्छन् ॥ ४४

1027) सा मिथ्यापि न [1]गीर्मिथ्या या गुर्वा[illegible]सादिनी[2] ।
प्रियोक्ता चाटुकारोक्त्या स्नेहगर्भगिरा समम् ॥ ४५

1028) स्वं न स्तुयान्नाप्यसतो गुणांश्च प्रतारयेन्नापि परं न दुष्यात् ।
सतो[1] गुणानित्थमथो [illegible]तन्वन्[2] समर्जयेन्नीचतमं हि गोत्रम् ॥ ४६

1029) इति विलोमवादी स्यादुच्चगोत्रगमी पुमान् ।
यत्परस्य हितार्थी ना[1] स्वस्यैव हितकारकः ॥ ४७

उसने ऐसा कहा है या किया है, इस प्रकार के किसी अन्य की प्रेरणा पाकर वचन के कारण भूतल्लेखके लिखने का नाम कूटलेखन है। ५ मुधासाक्षिपदोक्ति – व्यर्थ साक्षी देना, इन्हें सत्याणुव्रत के विघातक होने से छोड देना चाहिये) ॥४३*१॥

समस्त लोगों की प्रीति के अभिलाषी गृहस्थ के लिये अपने आचार में स्थित रहते हुए राजा के विषय में द्वेष को बढानेवाली, परस्त्री से संबन्ध रखने वाली, स्वामी के आरम्भ से रहित तथा अन्य भी उसी प्रकार की लोकनिषिद्ध – निन्द्य–कथाको – वार्तालाप को – नहीं करना चाहिये ॥ ४४ ॥

गुरु आदि को प्रसन्न करने वाला जो स्तुतिरूप – वचन किसी प्रिय व्यक्ति के द्वारा बोला जाता है, वह असत्य हो कर भी खुशामदी वचन व स्नेह से परिपूर्ण वाणी के समान असत्य नहीं होता है ॥४५॥

सत्यव्रती अपनी स्तुति न करें तथा जो गुण अपने में नहीं हैं उनका कीर्तन भी न करें। साथ ही वह न दूसरे की प्रतारणा करें – उसे न धोखा दें – और न उस के विद्यमान गुणों मे द्वेष भी करें। यदि वह ऐसा करता है तो अवश्य ही नीच गोत्र को बाँधता है ॥ ४६ ॥

इससे विपरीत बोलनेवाला–जो न अपनी स्तुति करता है और न अपने में अविद्यमान गुणों का वर्णन भी करता है, तथा न किसी को धोखा देता है और न उस के विद्यमान गुणों से द्वेष करता है–वह पुरुष उच्च गोत्रका बन्ध करता है। जो पुरुष अन्य का हित चाहता है वह स्वयं अपना ही हित करता है ॥ ४७ ॥

---

४५) 1 D वाणी. 2 PD प्रसादनी. 3 D अविद्यमानान् गुणान् कथयति। ४६) 1 [illegible]न् गुणान्. 2 D [illegible] । ४७) 1 PD पुरुषः ।

1030) यद्वद्यद्वद्रचयति परे यो हि कालुष्यमज्ञ-
स्तद्वत्तद्वत्प्रथममम्मुनास्यैव नाड्यः[1] समस्ताः ।
संसिध्यन्ते दहति दहनो यत्समुत्थस्तमादौ
पश्च दन्यं प्रदहति नवेति प्रियोक्तिः परे स्यात् ॥४८

1031) दोष[1]ग्रासाभ्यासाद्विषूचिकावन्ति[2] मनुजचेतांसि ।
प्रियवाक्यौषधमन्त्रैर्विदधति विरुजानि सद्वैद्याः ॥ ४९

1032) हेतौ प्रमत्तयोगे निर्दिष्टे सकलवितथवचनानाम् ।
हेयानुष्ठानादेरनुवदनं[1] भवति नासत्यम् ॥ ४९*१

1033) भोगोपभोगसाधनमात्रं सावद्यमक्षमा मोक्तुम् ।
ये ते विशेषमनृतं समस्तमपि नित्यमेव मुञ्चन्तु[1] ॥ ४९*२

1034) अनन्तो वा[illegible]लसो यः स ज्ञेयः परमागमात् ।
[illegible] व्रतं तूक्तमुपयुक्त[1]मगारिणाम् ॥ ५० ॥

अज्ञानी मनुष्य जैसे जैसे दूसरे के विषय में कलुषता को उत्पन्न करता है वैसेही इससे उस की सब नाडियाँ (?) सिद्ध होती हैं । ठीक है – जिस से अग्नि उत्पन्न होती है उसे वह प्रथमतः जलाती है । तत्पश्चात् दूसरों को वह जलाये भी अथवा नहीं भी । इसीलिये दूसरों के साथ प्रिय भाषण करना चाहिये ॥ ४८ ॥

सज्जनरूपी वैद्य दोषरूपी आहार के अभ्यास से विषू(सू)चिका रोग से ग्रस्त हुए मनुष्यों के चित्तों को प्रियवचनरूपी औषध और मन्त्रों से रोगरहित करते हैं ॥ ४९ ॥

जितने भी असत्य भाषण हैं, उनका कारण चूंकि प्रमादयुक्त योग निर्दिष्ट किया गया है, अतएव 'अमुक आचरण त्याज्य है' ऐसा त्याग का उपदेश कष्टदायक होता हुआ भी असत्य नहीं है, क्यों कि उसका कारण प्रमत्तयोग नहीं है ॥ ४९*१॥

जो भोग और उपभोग के कारण मात्र सावद्य वचन के छोड देने में असमर्थ है वे अन्य समस्त विशेष असत्य भाषण को सर्वदा के लिये छोड दें ॥४९*२॥

जो वचन का विलास– विस्तार– अपरिमित है उसका स्वरूप परमागम से जानना चाहिये । मैंने यहाँ गृहस्थों के लिये उपर्युक्त सत्यासत्य व्रत का यहाँ वर्णन किया है ॥५०॥

---

४८) 1 D बन्धनम् । ४९) 1 D परदोष. 2 वमनम् अजीर्णम् । ४९*१) 1D मुहुर्जल्पनम् । ४९*२) 1 D त्यजन्तु असत्यम् । ५०) 1 युक्तम् ।

1035) वसुः श्वभ्रं प्रापद्वितथवचने साक्षिकतया
प्रविख्यातं चैतत्सकलभुवने चन्द्रमृगवत् ।
दिवाकीर्तिः[1] साक्षादवितथगिरः[2] सिद्धिमगमन्
महाविद्याविद्वान् रमयति जनं सत्यवचसि ॥५१

1036) किं कर्पूरकणोत्करैर्विरचिता[1] चन्द्रप्रभाभिः किमु
स्वेष्टप्रेमरसापगा नु मधुनः किं वा वियद्वापिका ।
श्रीखण्डद्रवकूपिका किमु सुधानिष्यन्दकुल्या[2] भवेत्
तन्वानेति वितर्कमुत्तमधियां वाणी समालप्यते ॥५२

इति श्री-धर्मरत्नाकरे द्वितीयप्रतिमामूलभूताहिंसासत्यव्रतविचारो
द्वादशो ऽवसरः ॥१२॥

वसु राजा असत्य भाषण में साक्षी होने से नरक में गया, यह वृत्त सर्व जगत् में चन्द्र के मृग-लांछन-के समान प्रसिद्ध है । इस के विपरीत सत्य भाषण से दिवाकीर्ति नामक महापुरुष मुक्तिपद को प्राप्त हुआ है । सत्यवचन में तत्पर जो पुरुष है उसे महाविद्याओं के ज्ञाता लोग संतुष्ट करते हैं, उसकी यथार्थ स्तुति करते हैं ॥ ५१ ॥

निर्मलबुद्धि सत्य भाषियों की वाणी क्या कपूर के कण समूहों से रची गयी है, अथवा क्या चन्द्रकी कान्तियों से रची गयी हैं, अथवा क्या मधु की अतिशय अभीष्ट प्रेमरस की नदी है, अथवा क्या आकाशवापिका– गंगा नदी– है, अथवा क्या चन्दन द्रवका छोटा–सा कुआँ है ॥ अथवा क्या अमृतप्रवाह की छोटीसी नदी है; इस प्रकार के वितर्क को उत्पन्न करने वालर कही जाती है। अर्थात् सत्य बोलनेवाले की वाणी को सुनकर लोगों को अतिशय आनन्द उत्पन्न होता हैं ॥ ५२ ॥

इस प्रकार धर्मरत्नाकर में द्वितीय प्रतिमा के मूलभूत अहिंसाव्रत और सत्याणुव्रत का विचार जिसमें किया है ऐसा यह बारहवाँ अवसर समाप्त हुआ ॥१२ ॥

५१) 1 नापितः. 2 D सत्यवाच्य: । ५२) 1 इति तर्क्यते, इयं वाणी किं कर्पूर... विरचिता इत्यादि. 2D अथ. 3 सरसी ।

[१३. त्रयोदशो ऽवसरः]

[अस्तेयब्रह्मपरिग्रहविरतिव्रतविचारः]

1037) प्रमादतो ऽन्यस्य परिग्रहं यो गृह्णात्यदत्तं तदवादि[1] चौर्यम् ।
बहिश्चरप्राणविमोषणत्वाद्धिंसा च सा मृत्यवसानदुःखा ॥ १

1038) उक्तं च–
अर्था नाम[1] य[2] एते प्राणा एते बहिश्चराः पुंसाम् ।
हरति स तस्य प्राणान् यो यस्य जनो हरत्यर्थान् ॥ १*१

1039) हिंसायाः स्तेयस्य च नाव्याप्तिः[1] सुघट एव हिं स[2] यस्मात् ।
ग्रहणे प्रमत्तयोगो द्रव्यस्य स्वीकृ[3]तस्यान्यैः ॥ १*२

जो पुरुष प्रमाद से अन्य किसीके विना दिये हुए परिग्रह (धनधान्यादि) को ग्रहण करता है उसे चौर्य (चोरी) कहते हैं। उक्त धनधान्यादि परिग्रह प्राणी के बाह्य प्राण जैसा है। इसीलिये उसके चुराने से हिंसा होती है जिसका अन्तिम फल मरण का दुःख होता है ॥ १॥

कहा भी है–

ये जो धन हैं वे प्राणियों के बाह्य प्राण हैं। इसीलिये जो मनुष्य दुसरे के धन का हरण करता है, वह उसके प्राणों को लूटता है, यह समझना चाहिये ॥ १*१॥

हिंसा में स्तेय (चौर्यकर्म) की भी अव्याप्ति सम्भव नहीं है। (अर्थात् हिंसाका वह लक्षण लक्ष्य (हिंसा) के एकदेशभूत उस स्तेय में नहीं जाता हो, सो भी बात नहीं है) क्यों कि, दूसरों के द्वारा स्वीकृत धन के अपहरण करने में वह प्रमत्तयोग घटित होता ही है। (अभिप्राय यह है कि, प्रमादयुक्त योग से दूसरे के प्राणों का जो अपहरण किया जाता है, इसका नाम हिंसा है। सो यह हिंसाका लक्षण चूंकि उक्त प्रकार से स्तेय में भी घटित होता है, अतएव वह हिंसाका लक्षण अव्याप्ति दोष से दूषित नहीं है) ॥ १*२ ॥

---

१) 1 उक्तम् । १*१) 1 D अहो. 2 त एते. । १*२) 1 D एकस्वरुपमेव. 2 D प्रमत्तयोगः. 3 P° स्वंकृतस्य ।

1040) नातिव्याप्तिश्च तयोः प्रमत्तयोगैककारणविरोधात् ।
अपि कर्माणुग्रहणे नीरागाणाम[1]विद्यमानत्वात् ॥ १*३

1041) सर्वजनभोगयोग्यं तोयतृणाद्यं[1] विमुच्य विनिवृत्तिः ।
पतितस्थापितविस्मृतपरार्थतः[2] किंतु हर्म्यवताम्[3] ॥ २

1042) दिग्दण्डो भवति यतो भूपतिकृतदण्डनादि येन[1] स्यात् ।
परकीयं नादेयं मनस्विना स्वापतेयं[2] तत् ॥ ३

1043) येनात्मा दूयेत च दूयन्ते सज्जनाश्च शुभमपि तत्[1] ।
हृद्यं[2]मिवान्नमपथ्यं त्याज्यं[3] सत्कर्मणा गृहिणा ॥ ४

वीतराग छद्मस्थ — ग्यारह, बारह और तेरहवें गुणस्थानवर्ती संयत — जिन सातावेदनीयरूप कर्मपरमाणुओं को ग्रहण किया करते हैं वे चूंकि किसी के द्वारा दिये नहीं जाते हैं, अतएव इस अदत्तग्रहणरूप स्तेयलक्षण की वहाँ अतिव्याप्ति होती है, ऐसी आशंका भी यहाँ नहीं करनी चाहिये। क्योंकि, वहाँ पर प्रमत्तयोगरूप एक कारण का विरोध है। कारण यह कि वह उक्त वीतराग छद्मस्थों के संभव नहीं है। (अभिप्राय यह है कि उपर्युक्त तीन गुणस्थानवर्ती जीव यद्यपि योग के निमित्त से कर्मपरमाणुओं को अवश्य ग्रहण किया करते हैं, परन्तु वहाँ प्रमादयुक्त योग की संभावना न होनेसे वहाँ उक्त लक्षण अतिव्याप्त नहीं होता है) ॥ १*३ ॥

गृहस्थों को सर्वसाधारण जन के उपभोग के योग्य पानी एवं घास आदि को छोडकर अन्य सब ही गिरे हुए, रखे हुए अथवा भूले हुए दूसरे के धनसे विरत (पराङ्मुख) होना ही चाहिये ॥ २ ॥

जिससे दिग्दण्ड — देशनिकाला — होता है, तथा जिससे राजा के द्वारा किये गये दण्ड को धन के अपहरण और शारीरिक कष्ट आदि को-सहना पडता है ऐसे उस दूसरे के द्रव्य को निर्मल मनवाले मनुष्य को नहीं ग्रहण करना चाहिये। (उस चौरकर्मका परित्याग करना चाहिये) ॥३ ॥

जिससे आत्मा स्वयं दुःखी होता है तथा अन्य सज्जन दुःखी होते हैं उस उत्तम कार्य का भी सत्कर्म करनेवाले — सदाचारी — गृहस्थ को मनोहर अपथ्य भोजन के समान त्याग करना चाहिये ॥ ४ ॥

१*३) 1 मुनीनाम् २) 1 स्वामित्वरहिततृणपत्रफलजलादि अरण्यजाता [नि] कूपवापीसरोजलानि वा. 2 D परद्रव्यतः सकाशात्. 3 गृहस्थानाम् । ३) 1 D चौर्येण. 2 PD द्रव्यम् । ४) 1 कर्म. 2 मनोज्ञम्. 3D अजीर्णो यथान्नं त्यजनीयम् ।

1044) ज्ञातीनामत्यये वित्तमदत्तमपि कल्प्यते[1] ।
जीवतां तु निदेशेन[2] व्रतक्षतिरतो ऽन्यथा ॥ ४*१

1045) यदर्जितं[1] न्यायबलेन सन्तः परं प्रहृष्यन्ति धनेन येन ।
कुलं महार्येन सुसूनुनेव[2] ग्रहीतुमिष्टं तदगारिणां तु ॥ ५

1046) रिक्थं[1] निधिनिधानोत्थं न राज्ञो ऽन्यस्य युज्यते ।
यत्स्वस्यास्वामिकस्येह[2] दायादो[3] मेदिनीपतिः[4] ॥ ५*१

1047) रत्नरत्नाङ्गरत्नस्त्रीरत्नाम्बरविभूतयः ।
भवन्त्यचिन्तिताः पुंसामस्तेयं[2] येषु[3] निर्मलम् ॥ ५*२

1048) प्रतिरूपव्यवहारास्तेन[1]नियोगास्तदाहृतादानम्[2] ।
राजविरोधातिक्रमहीनाधिकमानकरणे च ॥ ६

अपने कुटुम्बी जनों की मृत्यु हो जानेपर न दिये हुए भी उनके धन का ले लेना योग्य है । यह अवश्य है कि उनके जीवित रहते उस धन को उन की आज्ञा के अनुसार ही ग्रहण करना योग्य है, अन्यथा इसके विपरीत अचौर्यव्रत का नाश होता है ॥ ४*१ ॥

जो धन न्यायसे कमाया गया है, जिससे सत्पुरुष अतिशय हर्षित होते हैं, तथा जिस महान्-धन से कुल उत्तम पुत्र के समान हर्ष को प्राप्त – समृद्ध या सुशोभित – होता है, उसी धन का ग्रहण करना गृहस्थों को अभीष्ट होता है ॥ ५ ॥

निधि और निधान – भाण्डार या भूमि आदि–से उत्पन्न हुए धन का ग्रहण करना राजा को छोडकर अन्य किसी के लिये योग्य नहीं है । कारण इसका यह है कि ऐसे अस्वामिक लावारिस – धन के ग्रहण करने का अधिकारी यहाँ राजा हुआ करता है ॥ ५*१ ॥

जिन महापुरुषों में उस निर्मल अचौर्यव्रत का सद्भाव होता है, उनको रत्न, रत्नांग –सुन्दर शरीर–श्रेष्ठ स्त्री और रत्नमय वस्त्र आदि विभूतियाँ विना विचार के ही प्राप्त हुआ करती हैं ॥ ५*२ ।

प्रतिरूप व्यवहार, स्तेननियोग, तदाहृतादान, राजविरोधातिक्रम और हीनाधिक-मानकरण, ये अचौर्यव्रतके पाँच अतिचार हैं ।

४*१) 1 गृह्यते. 2 आदेशेन । ५) 1 धनम्. 2 शोभनपुत्रेण । ५*१) 1 PD द्रव्यम्. 2 PD द्रव्यस्य. 3 गृ[ग्र]हीता. 4 D राजा । ५*२) 1 येषां पुंसाम्. 2 PD अचौर्यव्रतम्. 3 पुरुषेषु । ६) 1 चौर्य, D चौरसंसर्ग. 2 चौर्येस्यानीतम् ।

पञ्चास्तथव्रतस्यातिचा । इत्युपस्कारः ।

1049) हस्तिनागनगरे सुयोधनो[1] मन्त्रिणा च नृपतिः पुरोधसा ।
आत्मकोशहरणात्पदच्युतः सत्यभूति[2]रपरार्थगार्द्धतः[3] ॥ ७

1050) वारिधर्मनगरे च नैगमः[1] स्वं[2] परस्य पतितं परित्यजन् ।
कीदृशीं न समवापदुन्नतिं ढौकयंश्च किल धर्मभूपते[3]ः ॥ ८

1051) त्यागिनो[1] गृध्नवश्चैव[2] सुखदुःखोपभोगिनः[3] ।
श्रूयन्ते न कियन्तो ऽन्ये[4] पररायो[5] जिनागमे[6] ॥ ९

1052) अदत्तः परा[1]स्त्याज्यस्ततः कृत्याकलत्रवत्[2] ।
न्यायागतमपि ग्राह्यं कल्प्यं[3] स्वार्थपरायणैः ॥ १०

१) प्रतिरूपक व्यवहार–अधिक मूल्यवाली वस्तु में उसकेस मान किसी दूसरी अल्पमूल्यवाली वस्तु को मिलाकर बेचना । जैसे–घीमें चर्बी मिलाकर बेचना । २) स्तेननियोग–दूसरे को चौर्यकर्मके लिये प्रेरित करना या स्वयं चोरी करते हुए पुरुष की अनुमोदना करना । ३) तदाहृतादान – चोरी करके लाये हुए सोना व चाँदी आदि का ग्रहण करना । ४) राजविरोधातिक्रम – राजकीय नियमों का उल्लंघन करके क्रयविक्रयादि करना । ५) हीनाधिकमानकरण – देने लेने के बाँटों को निश्चित प्रमाणसे हीन और अधिक रखना । इस प्रकार ये पाँच अतिचार उस अचौर्याणुव्रत को मलिन करनेवाले हैं । यहाँ श्लोक में 'ये पाँच अचौर्याणुव्रत के अतिचार हैं, इतने अंश की अनुवृत्ति ग्रहण करना चाहिये ॥ ६ ॥

हस्तिनाग नगर में सुयोधन राजा ने मंत्री और पुरोहित के साथ अपने कोश का अपहरण किया । इससे उसे राज्यपद से भ्रष्ट होना पडा । तथा सत्यभूति ब्राह्मण को भी दुसरों के धन में अतिशय लुब्ध रहने के कारण अपने पुरोहितपदसे भ्रष्ट होना पडा ॥ ७ ॥

वारिधर्म नगर में जिस वैश्यने गिरे हुए धन का परित्याग किया था – उसके विषय में मुग्ध नहीं हुआ था – वह धर्मराजा के द्वारा उपस्थित की गई कौनसी उन्नति को नहीं प्राप्त हुआ है ? (अर्थात् उसे धर्मराजा के द्वारा अतिशय लाभ हुआ है) ॥ ८ ॥

दूसरेके धन का परित्याग कर के सुख का अनुभव करने वाले तथा लोभ धारण कर के दुख का अनुभव करनेवाले कितने अन्य जनों की कथायें जिनागम में नहीं सुनी जाती हैं? ॥ ९ ॥

इसलिये अपने प्रयोजन को सिद्ध करनेवाले सज्जनों को दुष्ट स्त्री के समान न दिये हुए

---

७) 1 दृष्टान्तः, D राज्ञः. 2 मन्त्री. 3 लोभतः, D अर्थलाम्पट्यात् । ८) 1 वनिकः [वणिक्] D श्रेष्ठी. 2 PD परद्रव्यम्. 3 PD °धर्मभूपतिः । ९) 1 त्यक्तवन्तः. 2 गृहीतवन्तः. 3 कथंभूताः, सुखदुःखोपभोगिनः. 4 अन्ये कियन्तोऽपि किं न श्रूयन्ते अपि तु श्रूयन्ते. 5 परद्रव्याणि, D परद्रव्यस्य. 6 क्व श्रूयन्ते, जिनागमे । १०) 1 PD परद्रव्यम्. 2 अकलत्रव्याजवत्, D अन्यस्त्री. ३ योग्यं द्रव्यम् ।

1053) यद्वेदरागयोगान्मैथुनमभिधीयते तदब्रह्म।
अवतरति तत्र[1] हिंसा वधस्य सर्वत्र सद्भावात् ॥ १०*१

1054) हिंस्यन्ते तिलनाल्यां[1] तप्तायसि[2] विनिहिते तिला यद्वत्[3] ।
बहवो जीवा योनौ हिंस्यन्ते मैथुने तद्वत् ॥ १०*२

1055) अब्रह्म[1] मैथुनमिति प्रतिपादने[2] ऽपि
माता निजेव भगिनीव सुतेन साक्षात् ।
अन्यस्य योषिदनुरागभरे ऽपि दृश्या[3]
त्रेधापि चारुचरितेन निशान्तभाजा[4] ॥ ११

1056) यतो विरज्येत महाजनः सदा स्वयं विशङ्केन[1] यतो ऽनुरागतः ।
निजस्त्रियं तां च परस्त्रियं शुचिः समालपेन्नो[2] मनसापि मानवः ॥ १२

परकीय धन का परित्याग करना चाहिये और न्याय से प्राप्त हुए योग्य धन का ग्रहण करना योग्य है ॥ १० ॥

वेदराग के — स्त्री और पुरुषवेदस्वरूप नोकषाय के — उदयसे जो संभोगकार्य होता है उसे अब्रह्म कहते हैं । इसमें हिंसा होती है, क्योंकि इसमें भी सर्वत्र जीवों के वध का सद्भाव पाया जाता है ॥ १०*१ ॥

जिस प्रकार तिलों की नाली में तपी हुई लोहशलाका के रखने पर उसमें सब तिलोंका नाश होता है, उसी प्रकार मैथुनकार्य में योनि में अवस्थित बहुत से जीवोंकी हिंसा हुआ करती है ॥ १०*२ ॥

अब्रह्म या मैथुन इस प्रकार कहने में भी तथा तद्विषयक अनुरागकार्य में भी सदाचारी गृहस्थ को अन्यकी स्त्री को मन, वचन व कायसे साक्षात् अपनी माता, बहिन और पुत्री के समान देखना चाहिये। (अभिप्राय यह है कि, जिस प्रकार अपनी माता व बहिन आदिके समक्ष मैथुनविषयक अनुराग तो दूर रहा, किन्तु अब्रह्म या मैथुन शब्दों का उच्चारण भी निन्द्य माना जाता है, उसी प्रकार अन्य की स्त्री को भी माता आदि के समान समझकर तद्वत् ही व्यवहार करना चाहिये) ॥ ११ ॥

महापुरुष जिस स्त्री की ओरसे सदा विरक्त रहता है तथा स्वयं जिस अनुराग से शंकित रहता है, पवित्र मनुष्य को उस स्वकीय स्त्री और परस्त्री से मन से भी वार्तालाप नहीं करना चाहिये ॥ १२ ॥

१०*१) 1 मैथुने । १०*२) 1 तिलनालीविषये. 2 लोहे. 3 यथा । ११) 1 मैथुनसेवकेनापि. 2 महान् दोषः. 3 दर्शनीया. 4 निशान्तं गृहं, निशान्तभाजा गृहस्थेन, D उपासकेन । १२) 1 D °विशङ्केत° निजस्त्रीसार्धं रागजल्पनम् अवसरे योग्यम्. 2 मनुष्यः ।

1057) विवाहितां वा[1] यदि वाविरुद्धां[2] भजेदुदीर्णे[3][4] मदने ऽथ वेश्याम् ।
विवर्जयेत्स्वामपि किं त्वकाले स्वदारसंतोषपरः[5] सदैव ॥ १३

1058) धर्मकर्मचरणे स्वभावतो मानुषो हि नियतस्मरो[1] भवेत् ।
तत्स्वजानिं[2]मवलम्ब्य तत्परां बन्धुलिङ्गिरमणी[3]र्विवर्जयेत् ॥ १४

1059) सुखं तदेव संभोगैः सैव चान्ते विडम्बना ।
तासु[1] चान्यासु च स्त्रीषु परस्त्रीष्वथ को ग्रहः ॥ १५

1060) मदनोद्दीपनैः शास्त्रै रसैर्वृष्यैः[1] प्रदीपयेत् ।
प्रशान्तं दर्पकं[2] तेन स्वेच्छया तानि नाश्रयेत् ॥ १६

स्वदारसन्तोषव्रती काम के उद्दीप्त होने पर विवाहित अपनी स्त्री अविरुद्ध—भाडा आदि दे कर कुछ समय के लिये अपनी की गई (?) — अन्य स्त्री अथवा वेश्या का सेवन कर सकता है। परंतु उसे असमयमें अपनी पत्नीके सेवन का भी परित्याग करना चाहिये ॥१३॥

धर्मकर्म का आचरण करते समय मनुष्य के लिये स्वभाव से ही अपने कामविकार को अपने अधीन रखना चाहिये — जितेन्द्रिय रहना चाहिये। उसे अपनी धर्मपत्नीका अवलंबन ले कर उससे भिन्न अपनी मित्रस्त्री तथा अपनी जातिकी स्त्री और आर्यिकादिक स्त्रियोंका त्याग करना चाहिये ॥ १४ ॥

उन तथा अन्य स्त्रियों के साथ भोग करते समय जो सुख होता है और सम्भोग के समाप्त होनेपर जो विटम्बना होती है, वही अवस्था अन्य स्त्री के सेवन में भी होती है। फिर मनुष्य परस्त्री के सम्बन्ध में क्यों आग्रह करता है ? (अर्थात् परस्त्रीसेवन में स्वस्त्रीसेवन से कुछ अधिक सुख तो होता नहीं, प्रत्युत उसमें अधिक संक्लेश ही होता है। अतः उसका त्याग करना ही श्रेयस्कर है ॥ १५ ॥

शान्ति को प्राप्त हुआ कामदेव कामवासना को उत्तेजित करनेवाले शास्त्रों और गरिष्ठ रसों से उद्दीप्त हुआ करता है। इसीलिये अपनी इच्छा से न वैसे शास्त्रोंका आश्रय लेना चाहिये और न उस काम को उद्दीप्त करने वाले गरिष्ठ भोजनका भी उपभोग करना चाहिये ॥ १६ ॥

१३) 1 अथवा, 2 D अन्यकामिनीं. 3 स्वां परां च वेश्यां भजते यः रागी. 4 सति. 5 यः नीरागः । १४) 1 नियमितकामः, D जितस्मरः कन्दर्पः.2 स्वस्त्रीम्. 3 D वेषधारिणी । १५) 1 D स्वस्त्रीषु । १६) 1 P° वृत्तेः 2 कन्दर्पं ।

1061) हव्यैरिव हुतप्रीतिः पाथोभिरिव नीरधिः ।
धृतिमेति पुमानेष न भोगैर्भवसंभवैः ॥ १६*१

1062) रक्ष्यमाणे प्रबृंहन्ति[1] यत्रा[illegible]हिंसादयो गुणाः ।
उदाहरन्ति तद् ब्रह्म ब्रह्मविद्याविशारदाः ॥१६*२

1063) बाह्यास्तास्ता रचयतु पुमान् सत्क्रियाः कामचित्त[1]:
संक्लेशात्मा समधिकतया[2] निर्वृतो भावलाभे[3] ।
तस्मात्त्यक्त्वा मदनविभवास्ताः क्रियाः स्वानुलोमाः[4]
संकल्पन्ते फलविहतये कामिनां[5] शुद्धधर्मे ॥ १७

1064) धर्मध्यानविभूतिदेहविषया[1] अन्तर्ज्वलन्मन्मथे[2]
रक्षोपार्जनसत्क्रियाप्रभृतयो[3] नश्यन्ति सर्वाः क्रियाः ।
तत्तं[4] द[illegible]कारं कृतधिया[5] त्याज्यं यदाहारवत्
सेवन्तां वपुरुत्[illegible][6] ऽत्यासक्तिवेगच्छिदः[7] ॥ १८

जिस प्रकार होम के योग्य घृतादि पदार्थों से कभी अग्नि तृप्त नहीं होती है, तथा पानी से कभी समुद्र तृप्त नहीं होता है उसी प्रकार संसार के भोगों से यह मानव भी कभी तृप्त नहीं होता है ॥ १६*१ ॥

जिसके रक्षण करने पर अहिंसादिक गुण वृद्धिगत होते हैं उसे ब्रह्मविद्या में चतुर -अध्यात्मवेदी महर्षि - ब्रह्म कहते हैं ॥ १६*२ ॥

जिस मनुष्य का चित्त काम से व्याकुल हो रहा है तथा जो अतिशय संक्लेश परिणामों से युक्त है वह भले ही उन अनेक बाह्य समीचीन क्रियाओं को करता रहे, परन्तु उसे अतिशय निर्वृति (संतोष) भावलाभ होने पर होगी । (अर्थात् - संक्लेश परिणामों को छोडकर परिणामविशुद्धिसे ही निर्वृति - मुक्तिसुख - प्राप्त होता है) । इसलिये कामविकार से उत्पन्न होनेवाली अर्थात् उसे अनुकूल होनेवाली क्रियाओं को छोडकर शुद्ध धर्म की सहायकक्रियाओं को भावपूर्वक करनी चाहिये । नहीं तो कामिओं की क्रिया फलनाश के लिये - पुण्यनाश के लिये - कारण होगी ॥ १७ ॥

जिसका अन्तःकरण कामाग्नि की ज्वालाओं से सन्तप्त हो रहा है उसका धर्मध्यान विभूति, शरीर और इन्द्रियविषय (अथवा धर्मध्यान, विभूति और शरीरको विषय करने-

---

१६*१) 1 D इन्धनैः. 2 PD अग्निः । १६*२) 1 प्रवर्धयन्ति. 2 ब्रह्माणि । १७) 1 सकामः 2 अधिकचरित्रेऽपि. 3 P °भाविलाभे, आगामिफल [ला] भेन रहितो भवति. 4 कथंभूतास्ताः क्रियाः, स्वानुलोमाः स्वानुकूलाः, D समीचीनाः 5 किं कुर्वताम् । १८) 1 पञ्चेन्द्रियगोचर. 2 कस्मिन् सति. 3 काः क्रिया नश्यन्ति. 4 ततः तं मन्मथम्. 5 कृतबुद्धेः पुरुषस्य, D °कृतधियो त्याज्यं°, सतः. 6 कस्यै. 7 अति-आसक्ति-वेगविनाशकस्य ।

1065) परस्त्रीसंगमानङ्गक्रीडान्योपयमक्रियाः [1] [2] [3] ।
तीव्रता[4] रतिकैतव्ये[5] हन्युरेतानि तद्व्रतम् ।। १८*१

1066) तदुक्तम्—
मद्यं द्यूतमुपद्रव्यं[1] तौर्यत्रिकमलंक्रिया[2] [3] ।
मदो विटा वृथाट्येति[4] दशधानङ्गजो गणः ।। १८*२

1067) नवधाप्यनेकधा वा ब्रह्मोक्तं मुक्तसकलरागस्य ।
समये[1] ऽत्र तु स्वरूपं स्थूलब्रह्मव्रतस्योक्तम् ।। १९

1068) राजश्रेष्ठिप्रियासक्तो मन्त्रिपुत्रो ऽत्र जन्मनि
अवापं[1] नीडजादित्वं[2] प्रेत्या[3]प दुःखमुद्धतम् ।। २०

वाली) तथा रक्षा–धनादि के संरक्षण–उपार्जन और सत्क्रिया आदि– जिनपूजनादि–सब ही क्रियायें नाशको प्राप्त होती हैं । इसलिये बुद्धिमान मनुष्यों को अनेक दोषसमूहों के जनक होने से परित्याग के योग्य उस काम का सेवन शरीर में उत्पन्न हुए संताप को नष्ट करने के लिये आहार के समान अनासक्तिपूर्वक ही करना चाहिये ।। १८ ।।

परस्त्रीसेवन करना, योनि और लिंग के विना अन्य प्रकार से कामक्रीडा करना, अपनी कन्या और पुत्र के सिवाय अन्य किन्हीं का विवाह करना और काम सेवन में अत्यासक्ति रखना ऐसे कार्य–पाँच अतिचार–उस ब्रह्मचर्य व्रत को नष्ट करते हैं ।। १८*१ ।।

कहा भी है–

1302) श्रित्वा विविक्तवसतिं[1] समस्तसावद्ययोगमपनीय[2] ।
सर्वेन्द्रियार्थविरतः कायमनोवचनगुप्तिभिस्तिष्ठेत् ॥ ५*१
1303) धर्मध्यानासक्तो वासरमतिवाह्य विहितसांध्यविधिः[1] ।
शुचिसंस्तरे त्रियामां[2] गमयेत्स्वाध्यायहृतनिद्रः[3] ॥ ५*२

उक्त चार प्रकार के आहार के परित्याग को उपवास कहा जाता है । (अभिप्राय यह है कि, उपवास के समय इन्द्रियाँ अपने अपने विषयों से विरत होकर धर्मकार्य में प्रवृत्त होती हैं। इसीलिये 'उपेत्य वसन्ति अत्र इति उपवासः' इस उपयुक्त निरुक्ति के अनुसार चार प्रकारके आहार के परित्याग का 'उपवास' यह नाम सार्थक समझना चाहिये) ॥ ४ ॥

कहा भी है–

प्रत्येक दिन में आत्मापर आरोपित– अंकुरित किये गये – सामायिक के संस्कार को स्थिर करने के लिये दोनों पक्षार्धों में (अर्थात् प्रत्येक पक्ष के दो दो अर्ध भागों में -दोनों अष्टमी और दोनों चतुर्दशी दिनों में) उपवास को अवश्य करना चाहिये ॥ ४*१ ॥

प्रोषधोपवास के पूर्वदिन–सप्तमी व त्रयोदशी–के अर्धभाग (मध्यान्ह) में समस्त आरम्भकार्योंको छोडकर शरीरादि की ओर से निर्ममत्व होते हुए उपवास को स्वीकार करना चाहिये ॥ ४*२ ॥

वह उपवास आचार्य अथवा जिनदेव के पास ग्रहण किया जाता है। परन्तु जहाँ आचार्य अथवा जिनदेव नहीं है, वहाँ वह उत्तम विधि के अनुसार गुरुदेव की आज्ञा से स्वयं भी ग्रहण किया जा सकता है ॥५॥

उपवास को स्वीकार करनेवाले श्रावक को किसी एकान्त स्थान का आश्रय लेकर समस्त सावद्य प्रवृत्ति का त्याग करते हुए सम्पूर्ण इन्द्रिय विषयों से विरत होना चाहिये तथा कायगुप्ति, मनोगुप्ति और वचनगुप्ति इन तीन गुप्तियों के साथ स्थित होना चाहिये ॥५*१॥

इस प्रकारसे उसे धर्म ध्यान में आसक्त होकर दिन को – सप्तमी या त्रयोदशी के

४*२) 1D त्यक्त्वा । ५) 1 D समीपे । ५*१) 1 D एकान्तगृहम्. 2 D निराकृत्य । ५*२) 1 [illegible]. 2 रात्रि. 3 D निद्रारहितः ।

1304) प्रातः प्रोत्थाय ततः कृत्वा तात्कालिकं क्रियाकल्पम् ।
निर्वर्तयेद्यथोक्तं जिनपूजां प्रासुकैर्द्रव्यैः ॥ ५*३

1305) उक्तेन ततो विधिना नीत्वा दिवसं द्वितीयरात्रिं च ।
अपि वाहयेत्प्रयत्नादर्धं च तृतीयदिवसस्य ॥ ५*४

1306) इति यः षोडशयामान् गमयति परिमुक्तसकलसावद्यः ।
तस्य तदानीं नियतं पूर्णमहिंसाव्रतं भवति ॥ ५*५

1307) अनवेक्षिताप्रमार्जितमादानं संस्तरस्तथोत्सर्गः ।
स्मृत्यनुपस्थानमनादरश्च पञ्चोपवासघ्नाः ॥ ५*६

इत्युपवासविधिः ।

दिन को–बिताते हुए सायंकाल को विधि– सामायिक वंदना आदि को–करना चाहिये। तत्पश्चात् पवित्र बिस्तर पर– शुद्ध चटाई आदि के ऊपर – स्वाध्यायसे निद्रा को जीतते हुए रात्रि को व्यतीत करना चाहिये ॥ ५*२ ॥

पश्चात् प्रातःकाल में उठकर और उस समय की सामायिक–देववन्दनादि विधि को कर के तदनन्तर आगमोक्त विधि के अनुसार प्रासुक जल चन्दनादि द्रव्यों से जिनपूजा को करना चाहिये ॥ ५*३ ॥

तत्पश्चात् उपर्युक्त विधि के साथ दूसरे दिन और रात्रि को – अष्टमी और पूर्णिमा या अमावस्या के दिनभाग और रात्रिभाग को–बिताकर प्रयत्नपूर्वक तीसरे दिन के– नवमी प्रतिपद् के–आधे भाग को भी बिताना चाहिये ॥ ५*४ ॥

इस प्रकारसे जो समस्त सावद्य प्रवृत्ति से रहित होकर सोलह (४+८+४ = १६) प्रहरों को बिताया करता है, उसके उस समय नियम से पूर्ण अहिंसाव्रत – अहिंसा महाव्रत – होता है ॥५*५ ॥

अनवेक्षित – अप्रमार्जित आदान, अनवेक्षित–अप्रमार्जित संस्तर, अनवेक्षित–अप्रमार्जित उत्सर्ग, स्मृत्यनुपस्थान और अनादर ऐसे पाँच प्रोषधोपवास के विघातक अतिचार हैं।

(अनवेक्षित–अप्रमार्जित आदान–प्राणियों को बिना देखे तथा मृदु उपकरण से बिना झाडे अर्हदादि परमेष्ठियों के पूजोपकरण, पुस्तकादिक और अपने वस्त्र आदि को ग्रहण करना या रखना।

अनवेक्षित–अप्रमार्जित संस्तर– प्राणियों को बिना देखे और बिना झाडे चटाई आदि को भूमिपर बिछाना।

५*५) 1 D महाव्रतम् । ५*६) 1 D विस्मरणम् ।

1308) आरम्भजलपानाभ्यां मुक्तो ऽनाहार[1] उच्यते ।
अनूपवासस्त्वारम्भादुपवासो ऽम्बुपानतः[2] ॥ ६

1309) महोपवासो द्वयवर्जितः[1] सदा जिनागमाकर्णनपाठचिन्तनैः ।
अलंकृतः प्रासुकभूमिशय्यया जिनालये स्वालय एव वा रहः[2] ॥ ७

1310) चतसृणां[1] तु भुक्तीनां द्वयोर्वापि विवर्जनात् ।
द्विविधो ऽसौ[2] पुनर्ज्ञेयः प्राचीनः[3] सकलो ऽपि हि ॥ ८

1311) पर्वसु स भवेन्नित्यः पञ्चम्यादिषु महाविधानेषु ।
नैमित्तिको व्रतवतामितरेषां स्याद्विधाने सः ॥ ९

अनवेक्षित–अप्रमार्जित उत्सर्ग –प्राणियों को बिना देखे और बिना झाडे भूमिपर मल–मूत्र छोडना।

स्मृत्यनुपस्थान – भूखसे पीडित होने से प्रोषधव्रत में मन नहीं लगना।

अनादर–भूख से पीडित होने से आवश्यकों में उत्साह न होना, प्रोषधव्रत में उत्साह न रहना) ॥ ५*६ ॥

इस प्रकार से यह उत्तम उपवास की विधि कही गई है।

आरम्भ और जलपान से मुक्त अनाहार कहा जाता है। आरम्भ से अनूपवास और जलपान से उपवास कहा जाता है ॥६॥

परन्तु महोपवास सदा उन दोनों से रहित होता है और वह जिनालय में अथवा अपने ही घर के भीतर एकान्त स्थान में प्रासुक भूमिशय्या के साथ जिनागम के सुनने, पढने और ध्यान से सुशोभित होता है। (अभिप्राय यह है कि चारों प्रकार के आहार का जो सर्वथा परित्याग किया जाता है वह महोपवास कहलाता है। इस महोपवास में सब प्रकार के आरम्भ को छोडकर जिनभवन अथवा अपने ही घर के एकान्त भाग में प्रासुक भूमिके ऊपर स्थित हो कर स्वाध्याय, स्तुतिपाठ एवं ध्यान आदि में समय बिताना चाहिये। इससे उसकी शोभा के साथ सफलता भी निश्चित है) ॥ ७ ॥

वह उपवास चारों भोजनों के परित्यागसे अथवा दो ही भोजनों के परित्याग से दो प्रकार का जानना चाहिये–प्राचीन और सकल ॥ ८ ॥

वह व्रती जनों के अष्टमी व चतुर्दशी पर्वों में नित्य तथा पंचमी आदि महाविधानों में व्रतविशेषों में–नैमित्तिक होता है। अन्य जनों के–अव्रतियों के विधान के समय होता है ॥९॥

---

६) 1 निर्जलः उपवासः. 2 जलपानात् उपवासः उच्यते। ७) 1 आरम्भजलपानाभ्यां वर्जितः महोपवासो भवति. 2 एकान्ते। ८) 1 अशनं खाद्यं स्वादं पेयं चतुःप्रकारमाहारं भवति । तत्र अशनं भक्तादिकम्, खाद्यं पक्वान्नकम्। द्वयोर्वर्जनाद् द्विविधः संज्ञोपवासो भवति. 2 उपवासः. 3 एकविधिः सर्वपूर्वाचार्योक्तः।

1312) हेतोरात्मस्वभावस्य पूरणात्पर्व गीयते।
पूजाक्रियाव्रताधिक्यं धर्मकर्मात्र बृंहयेत् ॥ १०

1313) यद्यत्र चित्तमालिन्यं[1] शक्तिर्वापि न विद्यते।
एकभक्तादिकं किंचिद्विधीयेत विशेषणम् ॥ ११

1314) तदुक्तम्–
तत्तपो ऽभिमतं बाह्यं येन चेतो न दुष्यति।
जायते येन च श्रद्धा येन योगक्षतिर्न च ॥ ११*१

1315) बाह्यं तपः षड्विधमात्मशक्त्या तथान्तरङ्गं सकलं विभक्त्या।
कर्मेन्धदाहोर्ध्वगतिप्रकाशं विधीयतां पावकसंनिकाशम्[1] ॥ १२

1316) सर्वे सर्वविदो[1]ऽप्यतीतजनने शार्दूलविक्रीडित–
प्रायाण्युच्चविधानकानि सकलान्यूचुश्च चक्रुः[2] स्वयम्।
छन्दांसीव सुसंहतानि[3] श्रयति प्रस्तारभाज्यादरा–
दाचीर्णानि कियन्त्यपीतरजनैर्ब्रूमो वयं तद्यथा ॥ १३

आत्मा के स्वभाव को पूर्ण करनेरूप हेतु से अष्टमी चतुर्दशी आदि को पर्व कहा जाता है। पर्व दिनोंमें पूजा, क्रिया एवं व्रतों की अधिकता को वढाना चाहिये। (अभिप्राय यह है कि अष्टमी आदि पर्व दिनों में आरम्भ के परित्यागपूर्वक उपवास व स्वाध्यायादि शुभ क्रियाओं में प्रवृत्त रहने से आत्मस्वभाव की पूर्णता होती है, अतः इनका पर्व यह नाम सार्थक है)॥१०॥

यदि उपवास के विषय में अपना चित्त मलिन है,अथवा उसके करने की शक्ति नहीं है, तो एक भक्त एकाशन व ऊनोदर–आदि कुछ विशेष करना चाहिये ॥ ११ ॥

सो ही कहा है–

जिस से चित्त दूषित (मलिन) नहीं होता है, जिस से श्रद्धा उत्पन्न होती है और जिससे आत्मध्यान में बाधा नहीं आती है वह बाह्य तप माना गया है ॥ ११*१ ॥

अनशन, अवमोदर्य, वृत्तिपरिसंख्यान, रसपरित्याग, विविक्त शय्यासन और कायक्लेश के भेद से बाह्य तप छह प्रकार का है। उसे अपनी शक्ति के अनुसार करना चाहिये तथा अन्तरंग तप भी जो छह प्रकार का है उसे विभाग रूप से करना चाहिये। ये दोनों तप कर्मरूप इन्धन को जलाकर जीव की ऊर्ध्व गति को प्रगट कर देते हैं। इसलिये अग्नि के समान कर्मरूप इन्धन के जलानेवाले इन तपों का आचरण करना चाहिये॥ १२ ॥

सब ही सर्वज्ञों ने–वीतराग जिनों ने– पूर्व भव में सिंह की क्रीडा के समान भयानक

---

११) 1 D मलिनम्। १२) 1 अग्निसदृशम्। १३) 1 D अरहंतः. 2 कृतवन्तः. 3 D छन्दप्रसारवत् मिलितानि।

1317) आनन्दतो ऽनन्तधनश्रियौ[1] ते ईप्सू[2] विधिं प्रोषधमग्रहीष्टाम्[3] ।
आनन्दतो ऽनन्तधनश्रियौ ते संसाररु[4]ग्भेषधमेतदेव ॥ १४

1318) विदेहादौ क्षेत्रे कुलकरगणैः प्राप्य जननं[1]
वितीर्याशादानं[2] परममुनिपानां च विधिना ।
कृतः कल्याणाख्यः सकलजिनपानां विधिरयं
समग्रैस्तैर्भद्रैरविचलधिया सौख्यसरणिः ॥ १५

1319) कल्याणराजसुतपो ऽकृत[1] राजगुप्त[2]-
श्चान्द्रायणेन सह संखिकया[3] च धीरः ।
आचाम्लवर्[4]धनमधीरजनाविषह्यं
दैवीं च खेचरभवां श्रियमाप तेभ्यः ॥ १६

समस्त उत्कृष्ट व्रतविधानों– शार्दूल विक्रीडित आदि व्रत विशेषों– का व्याख्यान भी किया था तथा स्वयं आचरण भी किया था । इसके अतिरिक्त छन्दों–काव्यगत वृत्तों– के समान अतिशय मिले हुए और प्रस्तारों का– रचनाविशेषों का– आश्रय लेनेवाले उन कितने ही व्रतविधानों का आचरण सर्वज्ञों के अतिरिक्त अन्य जनों ने भी आदरपूर्वक किया था उनका हम यहाँ इस प्रकार से कथन करते है ॥ १३ ॥

अनन्त और धनश्री नाम के दो भव्यों ने व्रतपालन की इच्छा से प्रोषध को धारण किया था। इससे वे दोनों आनन्दसे अनन्त धन और लक्ष्मी से सम्पन्न हुए । संसाररूप रोग के नष्ट करने के लिये यही उत्तम औषध है ॥१४॥

कुलकर समूहों ने विदेहादि क्षेत्र में जन्म लेकर विधिपूर्वक उत्तम मुनियों को दान दिया था । तथा सर्व तीर्थंकरों की कल्याण नाम की इस विधि को किया था । (प्रत्येक कल्याण के दिन विधिपूर्वक उपवासादि किया था)। इससे उन सब भद्रजनोंने निश्चल बुद्धि से सुख के मार्ग को प्राप्त किया था ॥ १५ ॥

धीर राजगुप्त ने संखिका श्राविका के साथ चान्द्रायण तप और कल्याणराज नामक तप को किया था। तथा कातर जनों के लिये असह्य ऐसे आचाम्लवर्धन नामक तप को किया था। उन व्रतोंके प्रभाव से वे देवोंकी लक्ष्मी को और विद्याधरों की विभूति को प्राप्त हुए थे ॥

---

१४) 1 अनन्तश्रीधनश्रीश्रियौ द्वे. 2 द्वे वाञ्छके. 3 द्वे गृहीतवत्यौ. 4 रोगः विनाशकः वा। १५) 1 D पूर्वभव. 2 D समस्तद्रव्यदानम्, आसमन्तात् दानम् । १६) 1 कृतवान्. 2 कश्चिद् राजा. 3 PD सुप्तः संख्यावल्या व्रतम्, D विनिभद्रपूर्वभवे ।

1320) विनिर्ममे[1] ऽनामिकयाविनिन्द्यः श्रुतैकभक्त्या श्रुतसागराख्यः ।
श्रेयः[2] श्रियं प्राप यतो दुरापां श्रेयस्यतु[3] प्राणिगणस्ततोऽपि ॥ १७

1321) श्रीदत्ताप्यकरोद्धर्मचक्रवालं[1] यतो ऽभवत् ।
अर्धचक्रिसुता धर्मचक्रचिह्नं स्वमिच्छती ॥ १८

1322) संपदा[1] संपदास्थानं पञ्चमी कमलश्रिया ।
रोहिणीं[2] रोहिणी चक्रे सशोका शोकहारिणीम् ॥ १९

1323) नैरन्तर्यसान्तर्यतिथितीर्थाक्षपूर्वकः[1] ।
उपवासविधिश्चित्रश्चिन्त्यः श्रुतसमाश्रयः ॥ १९*१

1324) निगदितं बहुधेति जिनेश्वरैरनशनं भवसंततिनाशनम् ।
यदभि[1]सेवनमाचरतां सतां गलति कर्मकदम्बकडम्बरम् ॥ २०

1325) विशुध्येन्नान्तरात्मा[1]यं कायक्लेशविधिं विना ।
किमग्नेरन्यदस्तीह काञ्चनाश्मविशुद्धये ॥ २०*१

अनामिका श्राविकाने श्रुतज्ञान के ऊपर असाधारण भक्ति रखकर श्रुतसागर नाम के प्रशंसनीय तप को किया था, जिससे उस को श्रेयान् राजा के भव में दुर्लभ मोक्षलक्ष्मी प्राप्त हुई । इसलिये सभी प्राणिसमूह को शुभकार्य में प्रवृत्त होना चाहिये ॥१७॥

अपने को धर्मचक्र का चिन्ह प्राप्त होवे, ऐसी इच्छा रखनेवाली श्रीदत्ता ने धर्मचक्रवाल नामक व्रत को किया था, इस से वह अर्धचक्रवर्ती को कन्या हुई ॥ १८ ॥

कमलश्री नामक श्राविका ने ऐश्वर्य से सम्पत्ति के स्थानभूत पंचमी व्रत को किया था तथा शोकपीडित रोहिणीनामक श्राविका ने शोक को हरनेवाले रोहिणी व्रत को किया था ॥

जो तपोव्रत आगम में कहे गये हैं, उनके अनेक प्रकार हैं । उनका विचार कर के स्वरूप को समझ कर के उनका आचरण करना चाहिये । यथा– कोई तपोव्रत निरन्तर करना पडता है, कोई व्रत सान्तर – कुछ समयका अन्तर दे कर – करना पडता है । कोई व्रत पंचम्यादि विशेष तिथि में ही किये जाते हैं और कोई व्रत – रोहिणि आदि – विशेष नक्षत्र के समय में किये जाते हैं ॥१९*१॥

जिनेश्वरोंने संसार परम्परा को नष्ट करनेवाले उस अनशन तप को अनेकप्रकार कहा है, जिसका कि सेवन करनेवाले सज्जन अपने कर्म समूह के प्रभाव को नष्ट करते हैं ॥२०॥

यह अन्तरात्मा कायक्लेश तप के बिना शुद्ध नहीं हो सकता है । सो ठीक भी है, क्यों कि, सुवर्ण पाषाण को शुद्धि के लिये अग्निको छोडकर दूसरा कोई उपाय है क्या ॥२०*१

---

१७) 1 Dममतारहित. 2 D श्रेयांस. 3 D लभ्यति । १८) 1 व्रतं उपवासं च । १९) 1 D विभूत्या. 2 D व्रतम् । १९*१) 1 P°तीर्थर्क्ष° । २०) 1 यस्यानशनस्य । २०*१) 1 PD °द्ध्येतान्त° ।

1326) हस्ते चिन्तामणिस्तस्य दुःखद्रुमदवानलः ।
पवित्रं यस्य चारित्रैश्चित्तं सुकृतजन्मनः ॥ २०*२

1327) स्वाहारतो यथाशक्ति ग्रासादिपरिहापनम्[1] ।
ऊनोदरं तदाख्यातं रुध्यते[2] गाद्धर्यमुद्धतम् ॥ २१

1328) दातृपात्रगृहवस्तुगोचरो मानसे भवति यो विनिश्चयः ।
उद्धताक्षबलभङ्गकारणं तत्तपो ऽकथि[1] जिनैस्तृतीयकम् ॥ २२

1329) एकान्तयोगव्रतभावनादिसिद्ध्यै गतासंयतजन्तुसंगा ।
यावस्थितिः शून्यनिकेतनादौ विविक्तशय्येति संस्तुतम् ॥ २३

1330) कारणं करणवृत्तिरोधने कामदर्पदलने क्षमं तपः ।
सर्पिरादिरसवर्जनं यथाशक्ति पञ्चममगादि[1] संयतैः ॥ २४

जिसका जन्म पुण्य से सुशोभित है, चारित्र से चित्त पवित्र है, उसके हाथ में दुःखरूपी वृक्ष को वनाग्नि के समान भस्म करनेवाला चिन्तामणि रत्न स्थित है, ऐसा समझना चाहिये ॥ २०*२ ॥

अवमौदर्य - ऊनोदर तप

अपने आहार के प्रमाणमें (एक, दो व तीन आदि) यथाशक्ति ग्रासों का कम करना, इसे ऊनोदर तप कहते हैं। इस तप से आहार के विषय में जो उत्कट लोलुपता होती है वह नष्ट होती है ॥ २१ ॥

दाता, बर्तन, घर और वस्तु के विषय में जो मन में निश्चय होता है-यदि आज पुरुष, स्त्री अथवा पति-पत्नी पडगाहन करेंगे, तो आहार को ग्रहण करूँगा, अन्यथा नहीं ग्रहण करूंगा, इत्यादि नियम किया जाता है - उसे जिन भगवान्‌ने तीसरा तप- वृत्ति परिसंख्यान कहा है। यह तप उन्मत्त इन्द्रियों के बल को नष्ट करनेवाला है - उन्हें - विषयों की ओरसे विमुख किया करता है ॥ २२ ॥

एकान्त समाधि और व्रत (और मैत्री) आदि भावनाओं को सिद्ध करने के लिये निर्जन (पर्वत की गुंफा आदि) स्थानों में, जहाँ असंयत स्त्रीपुरुषादि तथा अन्य प्राणियों का संपर्क न हो, रहना उसे विविक्त शय्यासन नामक तप कहते हैं ॥२३॥

यथाशक्ति जो घी आदि रसोंका परित्याग किया जाता है उसे संयमी जनों ने पाँचवा - रस परित्याग- तप कहा है। यह तप इन्द्रियों के व्यापार- विषय प्रवृत्ति- के रोकने में कारण एवं काम के अभिमान के नष्ट करने में समर्थ है ॥२४॥

---

२१) 1 त्यजनम्. 2 P° रुद्ध्यतो। २२) 1 D कथितम्। २४) 1 गदितम्, D कथितम्।

1331) क्षित्यासन[1]विशेषाश्च क्षुदादिसहनं तथा ।
संवेगभावितस्वान्तः कायक्लेशस्तदुच्यते ॥ २५

1332) यथादेशं यथाकालं [illegible] यथानरम् ।
यथागमं च कुर्वीत प्रायश्चित्तं विशुद्धये ॥ २६

1333) चित्रीयते[1] त्रिजगती च वशीभवन्ति
देवादयोऽपि रिपवोऽप्यनुगा भवन्ति ।
यस्याः[2] श्रियोऽप्युपनता[3] जगतां दुरापा[4]
ज्ञानादि पञ्च सुविनीतिममूं तनोतु ॥ २७

1334) पात्रं किंचित्तमिह लभते यः श्रियां कोशवासो
यस्मात्कीर्तिः स्थगयति दिशां चक्रवालं[1] सुशुभ्रा ।
अभ्यर्चां स्वं नयति नितरामुन्नतिं सद्गुणौघं
वैयावृत्त्यं दशसु रचयेत् सूरिमुख्येषु विद्वान् ॥ २८

क्षिति आदिक विविध आसन विशेषों से स्थित होकर ध्यान में लीन होना, भूख आदि की बाधा को सहन करना तथा मन को धर्मानुराग से संस्कृत करना, इसे कायक्लेश कहा जाता है ॥२५॥

देश, काल, दोष और मनुष्य की शक्ति के अनुसार आत्मविशुद्धि के लिये आगमोक्त विधि से प्रायश्चित्त करना, यह प्रायश्चित्त नाम का अभ्यन्तर तप है ॥ २६॥

जिस विनय तप के प्रभाव से तीनों लोक आश्चर्यचकित होते हैं,देवादिक भी वश में होते हैं, शत्रु भी अपने अनुचर (सेवक) हो जाते हैं तथा साधारण मनुष्यों को दुर्लभ ऐसी संपदायें प्राप्त होती हैं उस ज्ञानादि पाँच विषयक विनय को करना चाहिये ॥२७॥

वैयावृत्य का परिपालन करनेवाला गृहस्थ उस पात्र को प्राप्त करता है, जो अनेक प्रकार की सम्पत्तियों का भाण्डागार होता है,जिसके निमित्त से अतिशय धवलकीर्ति दिङ्मण्डल को आच्छादित (व्याप्त) करती है तथा जिस के आश्रय से अपने आपको, पूजा प्रतिष्ठा को और समीचीन गुणों के समूह को अतिशय उन्नति को प्राप्त करता है । इसलिये विद्वान् को आचार्य व उपाध्यायादि स्वरूप दश प्रकार के पात्रों में वैयावृत्य को करना चाहिये ॥ २८ ॥

---

२५) 1 कठिन आसन । २७) 1 D विन [य] व्रतम्. 2 विनीतेर्विनयस्य. 3 जगतां पूज्याः श्रियः. D सेवा. 4 अमूं विनीतिं दुरापाम् । २८) 1 दिशाचक्रम् ।

1335) आत्मेष्टप्रतिबोधनं परिणतिः पापात्मिका हीयते
मार्गे नित्यमकम्पता नवनवं संवेजनं[1] गुप्तयः ।
प्रागल्भ्यं दधति स्फुरन्त्यपि वरं ज्ञप्तिप्रगल्भा गिरः
स्वाध्यायः स तु पञ्चधा निरुपमं तप्यं तपो ऽतन्द्रितैः ॥ २९

1336) वपुष्यपि त्यक्तममत्वबुद्धिः प्रदर्शकं मुक्तिपथप्रकाशकम् ।
असंयमोच्छृङ्खलताप्रणाशं व्युत्सर्जनं[1] धत्त[2] कृतान्तरासम्[3] ॥ ३०

1337) दासन्त्युच्चैः सर्वलक्ष्म्यो हि यस्माल्लोकाधीशा येन[2] ते मागधन्ति[3] ।
सर्वे भावा हस्तरेखन्ति यस्माद्ध्याने तस्मिन् भूयतामेकतानैः ॥ ३१

स्वाध्यायसे अपने जो इष्ट जन है उन को उपदेश दे कर सन्मार्ग में लगाया जा सकता है, उस के निमित्त से पापप्रवृत्ति नष्ट होती है, मोक्षमार्ग में सदा स्थिरता होती है,नवीन नवीन संवेग उत्पन्न होता है, (धर्म में उत्साह वृद्धिगत होता है, मन, वचन और शरीर की प्रवृत्ति याँ अपने वश रहती है), तथा तत्त्वज्ञानसे सामर्थ्य को प्राप्त हुई वाणी प्रकाशमान होती है अर्थात् लोगों को हितमार्ग दिखाने में उद्युक्त होती है । वह अनुपम स्वाध्याय वाचना, पृच्छना, अनुप्रेक्षा, आम्नाय और धर्मोपदेश के भेद से पाँच प्रकारका है । इसलिये उस स्वाध्याय तपका निरन्तर आलस्य रहित होकर आचरण करना चाहिये ॥ २९ ॥

जिस व्युत्सर्ग तप के प्रभावसे प्राणी अपने शरीर के विषय में भी ममत्व बुद्धि को छोड देता है, जो प्रदर्शक हो कर मोक्षमार्ग को प्रकाशित करता है, असंयमभाव से होनेवाली स्वेच्छाचारिता को नष्ट करता है, तथा जिसने मनकी चञ्चलता को नष्ट किया है (?) उस व्युत्सर्ग नामक अभ्यन्तर तप को धारण करना चाहिये ॥३०॥

जिस ध्यान के प्रभाव से सर्व सम्पत्तियाँ दास के समान सेवा करती है,लोक के स्वामी इन्द्र, धरणेन्द्र व चक्रवर्ती आदि – स्तुति किया करते हैं तथा जिससे सब पदार्थ हाथ की रेखाओं के समान स्पष्ट जाने जाते हैं, ऐसे उस उत्तम ध्यान में एकाग्रचित्त होना चाहिये ॥३१॥

---

२९) 1 PD वैराग्यम् । ३०) 1 कायोत्सर्गम्. 2 यूयं कुरुत. 3 प्रलम्बितभुजम्. P °कृतान्तरासम्°, D अभ्यन्तरअंगं । ३१) 1 ध्यानात्. 2 ध्यानेन. 3 भट्टत्वं कुर्वन्ति भट्टा इव आचरन्ति वा, D स्तुवन्ति. 4 ध्यानात्. 5 ध्याने ।

1338) प्राचीनाप्रतिमाभिरुद्वहति चेद्यः प्रौषधं ख्यापितं
तद्रात्रौ पितृकानने निजगृहे चैत्यालये ऽन्यत्र वा ।
व्युत्सर्गी सिचयेन संवृततनुस्तिष्ठेत्तनावस्पृहः
दूरत्यक्तमहाभयो गुरुरतिः स प्रौषधी प्राञ्चितः ॥ ३२

1339) व्रतानि पूर्वाणि करोति सम्यक् तथैव चेत्प्रोषधमादधाति ।
स मध्यमो निःप्रतिमो[1] लघीयान् यथाकथंचिद्द्वितयं वितन्वन् ॥ ३३

इति धर्मरत्नाकरे प्रोषधप्रतिमाप्रपञ्चनः
षोडशो ऽवसरः ॥ १६ ॥

जो श्रावक पूर्व प्रतिमाओं के साथ पूर्व प्रकीर्तित प्रोषध प्रतिमा धारण करता है, रात्रि में श्मशान में, अपने घर में, चैत्यालय में अथवा अन्य स्थानमें इस व्युत्सर्ग तप को धारण करता है। वह वस्त्र से शरीर को ढँकता हुआ भी शरीर से निःस्पृह होता है। वह महाभय का भी दूर से परित्याग करता है, उसकी पाँच परमेष्ठियों में अतिशय श्रद्धा होती हैं। ऐसा प्रोषध-प्रतिमाधारक लोकपूज्य होता है ॥ ३२॥

जो श्रावक पूर्व व्रतों का निर्दोष पालन करता है तथा उन के साथ प्रोषधको धारण करता है तो उसे मध्यम प्रोषधधारक समझना चाहिये । तथा जो श्रावक प्रतिमाओं से रहित होकर जिस किसी प्रकार से सामायिक व प्रोषध को धारण करता है, उसे जघन्य प्रोषधधारी श्रावक समझना चाहिये ॥३३॥

इस प्रकार धर्मरत्नाकर में प्रोषधप्रतिमा का विस्तार से वर्णन करनेवाला
सोलहवाँ अवसर समाप्त हुआ ॥१६॥

---

३३) 1 P° निःप्रतिमां.

[१७. सप्तदशो ऽवसरः]

[सचित्तादिप्रतिमाप्रपञ्चनम्]

1340) यो भोजनादिरुचितः किल को ऽपि भावो
भोगाभिधां स लभते विविधप्रकारः।
भूषादिको ऽपि बहुधा कथितोपभोगो
भुञ्जीत तौ नियमितौ[1] सततं[2] गृहस्थः ॥ १

1341) अविरुद्धा अपि भोगा निजशक्तिमपेक्ष्य धीमता त्याज्याः।
अत्याज्येष्वपि[1] सीमा कार्यैकदिवानिशोपभोग्यतया ॥ १*१

जो अनेक प्रकार के भोजन आदि – एक ही बार भोगने योग्य –कोई भी उचित पदार्थ हैं वे भोग इस नाम को प्राप्त करते हैं तथा जो भूषण आदि– अनेक बार भोगने योग्य – बहुत-से पदार्थ हैं उन्हें उपभोग कहा गया है। गृहस्थको निरन्तर उन दोनों को–भोग और उपभोग पदार्थों को –नियमित प्रमाण में भोगना चाहिये॥ १ ॥

जो भोग पदार्थ अविरुद्ध भी हैं अर्थात् जिनका सेवन अहिंसा धर्म के विरुद्ध नहीं है उनका भी विद्वान् मनुष्य को अपनी शक्ति के अनुसार परित्याग करना चाहिये। तथा जिन का परित्याग नहीं किया जा सकता है उनके विषय में भी इतने पदार्थों का उपभोग दिन में और इतने पदार्थोंका उपभोग रात्रि में करूंगा, ऐसी मर्यादा – प्रतिज्ञा – करनी चाहिये ॥ १*१॥

१) भोगोपभोगौ. 2 D निरन्तरम् । १*१) 1 स्त्रीआभरणेष्वादिषु, D अपरेषु।

1342) पुनरपि पूर्वकृतायां[1] समीक्ष्य तात्कालिकीं निजां शक्तिम् ।
सीमन्यन्तरसीमा[2] प्रतिदिवसं भवति कर्तव्या ।। १*२

1343) इति यः परिमितभोगैः संतुष्टस्त्यजति बहुतरान् भोगान् ।
बहुतरहिंसाविरहात्तस्याहिंसा विशिष्टा[1] स्यात् ।। १*३

1344) एकमपि प्रजिघांसुर्[1]निहन्त्यनन्तान्यतस्ततोऽवश्यम् ।
करणीयमशेषाणां परिहरणमनन्तकायानाम्[2] ।। १*४

1345) पलाण्डु[1]केतकीनिम्बसुमनः[2]सूरणादिकम् ।
त्यजेदाजन्म तद्रूपं बहुप्राणिसमाश्रयम् ।। १*५

1346) नवनीतं च त्याज्यं योनिस्थानं प्रभूत[1]जीवानाम् ।
न यथापि पिण्डशुद्धौ विरुद्धमभिधीयते किंचित् ।। १*६

फिर वर्तमानकालीन अपनी शक्ति को देखकर पूर्व में जो मर्यादा की थी उसमें भी प्रतिदिन अन्यान्य मर्यादाओं को करना चाहिये। (अभिप्राय यह है कि रागभाव को दूर करनेके लिये पूर्व में की गई प्रतिज्ञा का भी संकुचित कर के प्रतिदिन यथाशक्ति विविध प्रकार की प्रतिज्ञाओं को करना चाहिये) ।।१*२।।

इस प्रकार से जो श्रावक मर्यादित भोगों से संतुष्ट हो कर अधिक भोगों का त्याग करता है उसकी अहिंसा बहुतर हिंसाके नष्ट हो जानेसे विशिष्ट प्रकार की होती है। (अभिप्राय यह है कि भोगोपभोग वस्तुओं को जितना कम किया जायेगा आरम्भ के कम होने से उतना ही अहिंसाव्रत वृद्धिगत होगा) ।। १*३ ।।

जो गृहस्थ अनन्तकाय – साधारण वनस्पति – के उपभोग में उद्यत हो कर किसी एक का भी घात करना चाहता है वह उसके आश्रय से अनन्त प्राणियों का घात करता है – अनन्त जीवों की हिंसा का भागी होता है। इसीलिये जो वनस्पति अनन्त साधारण जीवों से प्रतिष्ठित होती है उन सब का अवश्य ही त्याग करना चाहिये ।। १*४।।

प्याज, केतकी पुष्प, नीम के पुष्प और सूरण आदि को का जन्मपर्यन्त के लिये त्याग करना चाहिये। कारण कि इन पदार्थों के आश्रित इसी रूप के अन्य बहुत से प्राणी रहा करते हैं ।। १*५।।

मक्खन का भी त्याग करना चाहिये, क्योंकि वह प्रचुर जीवों का उत्पत्ति स्थान है इस प्रकारसे आहारशुद्धि में विरुद्ध कुछ भी नहीं कहा जा सकता है ।। १*६।।

१*२) 1 सीमाम्, D संख्यायाम्. २ D विषये। १*३) 1 D महाव्रतं स्यात्। १*४) 1 D विनाशयन्. २ D कन्दादीनाम्। १*५) 1 ल्हसणं, D प्याजु ल्हसणु. 2 D पुष्प। १*६) 1 D उत्पन्न।

1347) भोगोपभोगहेतोः स्थावरहिंसा भवेत्किलामीषाम्[1] ।
भोगोपभोगविरहादिह न हि लेशो ऽपि हिंसायाः ॥ १*७

1348) वाग्गुप्तेर्नास्त्यनृतं न समस्तादानविरहतः स्तेयम् ।
नाब्रह्म मैथुनमुचः[1] संगो नाङ्गे ऽप्यमूर्च्छस्य ॥ १*८

1349) इत्थमशेषितहिंसः प्रयाति सुमहाव्रतत्वमुपचारात् ।
उदयति चरित्रमोहे लभते न तु संयतस्थानम्[1] ॥ १*९

1350) भोगोपभोगमूला विरताविरतस्य नान्यतो[1] हिंसा ।
अधिगम्य वस्तुतत्त्वं स्वशक्तिमपि तावतस्त्याज्यौ[2] ॥ १*१०

1351) दुःपक्वस्य निषिद्धस्य जन्तु[1]संबन्धमिश्रयोः ।
अवीक्षितस्य च प्राशं[2]स्तत्सं[3]ख्याक्षतिकारणम् ॥ १*११

भोग और उपभोग रूप वस्तुओं के निमित्त से गृहस्थों के स्थावर जीवों की हिंसा हुआ करती है, परन्तु इस व्रत में - भोगोपभोग परिमाण में-बहुतसे भोगोपभोग वस्तुओं का परित्याग हो जाने से तन्निमित्तक हिंसा का उनके लेश भी नहीं रहता है ॥ १*७ ॥

भोगोपभोग परिमाण व्रती के वाग्गुप्ति -वचन के ऊपर नियंत्रण-रहने से असत्य भाषणकी संभावना नहीं रहती, दूसरों के समस्त पदार्थों के ग्रहण में प्रवृत्त न होने से उस के चौर्य कर्म भी असंभव हो जाता है, मैथुन का परित्याग कर देने से अब्रह्म भी उससे दूर ही रहता है, तथा जब वह अपने शरीर के विषय में भी ममत्व बुद्धि से रहित होता है तब उस के परिग्रह की तो संभावना ही कैसे की जा सकती है; इस प्रकार वह समस्त हिंसा के निर्मूल कर देने से उपचार से महाव्रती हो जाता है। परन्तु चारित्रमोह- प्रत्याख्यानावरण चतुष्क का उदय रहने से वह संयत पद को-छठे- सातवें गुणस्थान को- प्राप्त नहीं होता है ॥ १*८-९ ॥

विरताविरत-देशव्रतोंका पालन करनेवाले - श्रावक के जो हिंसा होती है, वह भोगोपभोग के सेवनसे ही होती है, इस को छोडकर अन्य किसी कारण से उसके हिंसा नहीं होती है, इसलिये वस्तुस्वरूप को तथा अपनी शक्ति को भी जानकर उन दोनों-भोग और उपभोग - का त्याग करना चाहिये ॥१*१०॥

दुष्पक्व अर्थात् जो ठीक तरहसे नहीं पका हुआ है या आधपके हुए आहार का ग्रहण करना, निषिद्ध- आगम प्रतिषिद्ध अनन्तकायादिका- भक्षण करना, जन्तुसंबन्धी (अर्थात् जिसका सचेतन वस्तु से संबन्ध है ऐसे भक्ष्य) पदार्थ का ग्रहण करना- (जैसे सचित्त वृक्ष से

१*७) 1 स्थावराणां अनन्तकायानाम् । १*८) 1 मैथुनत्यागात् मैथुनरहितस्य ।१*९) 1 यतित्वम्, D मुनिव्रतम् । १*१०) 1 भोगोपभोगाभ्यामन्यतो हिंसा न. 2 भोगोपभोगौ । १*११) 1 D सचित्त:. 2 P प्रायस्तत्. 3D भोगोपभोगयोः ।

1352) भोगोपभोगविभवैर्न समेति तृप्तिं
देवाधिपः[1] फणिपतिः किल चक्रपाणिः ।
एधैर्विभावसुरिवेत्यवगम्य भोगै-
रन्यैः प्रतुष्य[4] विजहातु[5] सचित्तजातम्[6] ॥ २

1353) यमश्च नियमश्चेति द्वौ त्याज्ये[1] वस्तुनि स्मृतौ ।
यावज्जीवं यमो ज्ञेयः सावधिर्नियमः स्मृतः ॥ ३

1354) आहाराद्यं प्रगृह्णानो भूषावस्त्रादिकं तथा ।
स्वे न्तरायान् समालोच्य तत्सेवेत गृहाश्रमी ॥ ४

1355) अस्थिचर्मरुधिरं पलं तथा पूयकं कृतनिवृत्तिभोजनम् ।
एभिरेव कृतमेलनं[1] च यत् विघ्नसप्तकमिदं समुच्यते ॥ ५

संबद्ध गोंद आदि का भक्षण करना),जन्तुसंमिश्र– सचित्त मिर्च आदिसे मिश्रित–दाल आदि का भक्षण करना, तथा ठीकसे न देखे गये आहार का ग्रहण करना; ये पाँच अतिचार उस भोगोप-भोग परिमाण को नष्ट करनेवाले हैं ॥१*११॥

भोगोपभोग के वैभवसे इन्द्र, धरणेन्द्र और चक्रवर्ती भी इस प्रकार तृप्त नहीं होते हैं, जिस प्रकार कि इन्धन से कभी अग्नि तृप्त नहीं होती है,यह जानकर अन्य भोगों से–अचित्त वस्तुओं से– संतुष्ट होकर सचित्त वस्तुओं के समूहको छोड देना चाहिये ॥२॥

त्याज्य वस्तुओं के त्याग के विषय में यम और नियम ऐसे दो प्रकार हैं । उनमें जीवनपर्यन्त जो त्याज्य वस्तु का त्याग किया जाना है उसे यम और जो कुछ कालमर्यादा के अनुसार उसका त्याग किया जाता है उसे नियम कहते हैं ॥ ३ ॥

गृहस्थ जिन आहारादि रूप भोग वस्तुओं को तथा भूषण और वस्त्र आदि रूप उप-भोग वस्तुओं को ग्रहण करता है उनका सेवन उसे अपने अन्तरायोंका सम्यक् विचार करके ही करना चाहिये ॥४॥

हड्डी, चमडा, रक्त, माँस, पीव तथा जिस भोज्य वस्तु का त्याग किया गया है, ये छह और इनसे मिश्रित भी; इस प्रकार इन्हें विघ्न सप्तक कहा जाता है । इनका गृहस्थको त्याग करना चाहिये ॥५॥

---

२) 1 इंद्रः. 2 इंधनैः. 3 अग्निः. 4 PD प्रसक्तं [भं] प्रसन्. 5 D त्यजतु. 6 D मिश्रम् । ३) 1 P त्याज्यौ । ५) 1 D मिश्र. 2 अन्तरायम्, D अन्तरायाः ।

1356) संकल्पादर्शनाद्विघ्नः संसर्गात् स्पर्शनात्क्वचित् ।
हिंसनाक्रन्दनप्रायात्पापात्प्रत्ययकारिणः ॥ ६

1357) यत्र त्रसप्रहननं हि समक्ष[1]मेव
तत्तत्परित्यजतु भोजनपानकाद्यम् ।
मा संगृहीद[2]पि नियुङ्क्त च मा सुधर्मा
मा संस्पृशच्च तदसावनुमंस्त मा च ॥ ७

1358) अतिप्रसक्तिप्रतिषेधनार्थं तपोभिवृद्ध्यै व्रतबीजरूढ्यै ।
शरीरनैर्मम्यनिदर्शनार्थमित्यन्तराया गृहिणोऽपि दिष्टाः ॥ ८

1359) अप्पीय[1]माव[1]परिपोसणकारणट्ठं
ह[2]म्मासमी कहियमाणक[3]मं पि किंचि ।
णिच्चं कुणादु णिय[4]संजमपोसणट्ठं ।
पुव्वुत्तदुल्लहवयाणि विसंभरेदुं ॥ ८*१

भोजन में उपर्युक्त हड्डी आदिकी कल्पना के होनेपर, उनका दर्शन हो जाने पर उनका संबन्ध हो जानेपर, उनके छू जाने पर तथा कहीं हिंसा और तद्रूप रोने–चिल्लाने आदि शब्दके सुनने से भोजन में विघ्न – अन्तराय – हुआ करता है ॥ (अभिप्राय यह कि भोजन करते समय यदि मन में किसी प्रकार की घृणित कामना हो उठती है अथवा उपर्युक्त हड्डी आदि घृणित वस्तुओं का दर्शन स्पर्शन आदि होता है तो विवेकी जीव को उस समय भोजन का परित्याग कर देना चाहिये) ॥ ६ ॥

जिस भोजन–पानादि में प्रत्यक्ष में ही त्रस जीवों का घात हो रहा हो उस भोजन पानादि का परित्याग करना चाहिये। तथा जिनमें त्रस जीवों का विनाश होता हो ऐसे चेतन–अचेतन पदार्थोंका धर्मात्मा श्रावकको न संग्रह करना चाहिये न उस में किसीको नियुक्त करना चाहिये, न उनका स्पर्श करना चाहिये और न ऐसे कामों को करनेवालों की अनुमोदना भी करनी चाहिये ॥ ७ ॥

भोजन के विषय में अतिप्रसंग के दूर करनेके लिये, तप के बढानेके लिये, व्रतरूप बीज के अंकुरित होने के लिये और शरीर के ऊपर ममता के नष्ट करने के लिये गृहस्थों के लिये भी अन्तराय कहे गये हैं ॥८॥

गृहस्थ को लक्ष्य कर के जो कुछ भी व्रतों का क्रम कहा जा रहा है उसका क्षमा

७) 1PD प्रत्यक्षम्. 2 P°संग्रहीदपि । ८) 1 D व्रतस्य बीजम् । ८*१) 1 आत्मभाव. 2 D गृही. 3 D क्रमम्. 4 निज ।

1360) पूर्वप्रणीतप्रतिमाभिरेतां यः पालयंत्सर्वसचित्तदूराम् ।
स सत्तमो ऽत्रादि लघुश्च कांचित्कुर्वन् कदाचिच्च यथाकथंचित् ॥ ९

1361) व्रतानि सर्वाण्यपि पाति यत्नात् यः प्रोषधेष्वेव सचित्तमोची ।
सुसंयमप्रसारणसक्तचित्तः स मध्यमो ऽगायि सचित्तमोची ॥ १०

1362) वारिषेणो ऽत्र दृष्टान्तः प्रोषधव्रतधारणे ।
रजनीप्रतिमायोगपालने ऽप्यतिदुष्करे ॥ ११ सचित्तप्रतिमाख्या ।

1363) सीमन्तिनीनयनगोचरतां प्रयाताः[1]
स्वं न स्मरन्ति न परं सुविवेकिनोऽपि ।
कांचिद्दशामुपगता वचसामगम्यां
प्रस्पन्दनादिरहिता[2] इव योगिचन्द्राः ॥ १२

मार्दवादि रूप आत्मिक भावों को पुष्ट करने के लिये अपने संयम का पोषण करने के लिये और पूर्वोक्त दुर्लभ व्रतों का स्मरण करने के लिये सदा पालन करना चाहिये ॥ ८*१ ॥

जो श्रावक पूर्वोक्त व्रत प्रतिमादिकों के साथ इस सर्व सचित्त के त्यागस्वरूप प्रतिमा का पालन करता है वह श्रेष्ठ तथा जो कभी जिस किसी प्रकार से किसी भी प्रतिमा का पालन करता है वह हीन सचित्तत्यागी कहा गया है ॥९॥

जो प्रयत्नपूर्वक सब ही व्रतों का पालन करता है, केवल पर्वों में ही सचित्त का परित्याग करता है, तथा जिसका मन उत्तम संयम के विस्तृत करने में आसक्त रहता है वह मध्यम सचित्तत्यागी श्रावक कहा गया है ॥१०॥

यहाँ प्रोषध व्रत के धारण में वारिषेण राजपुत्र का दृष्टान्त है और अतिशय दुष्कर रात्रिप्रतिमायोग के पालन में राजा श्रेणिक के पुत्र वारिषेण का दृष्टान्त है ॥ ११ ॥

सचित्त प्रतिमा का कथन समाप्त हुआ ।

सुन्दर स्त्रियों के कटाक्षों से आक्रान्त हुए अतिशय विवेकी जन भी न अपने आपको स्मरण करते हैं और न दूसरे को भी स्मरण करते हैं। वे उस समय ध्यान में स्थित श्रेष्ठ योगीन्द्रों के समान हलन चलनादि क्रिया से रहित हो कर किसी अनिवर्चनीय अवस्था को प्राप्त हो जाते हैं ॥१२ ॥

---

१२) 1 प्राप्ताः सन्तः. 2 नेत्रपरिस्पन्दादिरहितम् ।

1364) भोगोपभोगविभवैकभुवो हि भामा
नामापि रागजलधिं सततोत्तरङ्गम् ।
यासां तनोति तुहिनद्युति[1]बिम्बतुल्यं
तत्सेवनं न करणीयमतो ऽह्नि[2] विज्ञैः[3] ॥ १३

1365) विश्वप्रदेशान् प्रविलङ्घ्य रागरज[1]स्तथा विस्फुरति प्रसह्य[2] ।
आत्मप्रकाशं कलुषीकरोति यथा रजोऽभ्युल्लसितं तमोरेः[3] ॥ १४

1366) अर्धस्य रागजलधेर्विदधाति शोषं
पोषं च संयमतरोर्व्यवहारवल्ल्याः ।
वृद्धिं महर्द्धिनिवहं निजयोग्यतां[1] च
यः सेवते न दिवसे नियमेन रामाः ॥ १५

1367) उल्लाससंलापभरं गृणानो दिने युवत्या ह्यनुरागमत्या ।
कैश्चिच्च हस्येत विनिन्द्यते ऽन्यैर्दिवा व्यवायं[1] त्यजतु[2] तो ऽसौ ॥ १६

स्त्रियाँ भोगोपभोग के वैभवका अधिष्ठान है – उनके आश्रय से प्राणी भोग और उपभोग वस्तुओं के उपभोग में प्रवृत्त होते हैं । चन्द्रबिम्ब के समान उनका केवल नाम भी राग रूप समुद्र को सेकडों विस्तृत तरंगों से–उत्कण्ठादिकों से– व्याकुल बनाता है । इसलिये विज्ञजनों को उनका सेवन दिन में नहीं करना चाहिये ॥ १३ ॥

रागरूप धूलि समस्त प्रदेशों को लाँघकर हठात् इस प्रकार से वृद्धिंगत होती है व आत्मा के प्रकाश को– उसके ज्ञानादिमय स्वरूप को – कलुषित – मलिन किया करती है जिस प्रकार कि धूलि वृद्धिंगत होकर सूर्य के प्रकाश को कलुषित कर दिया करती है ॥१४॥

जो नियम से दिन में स्त्रीसेवन नहीं करता है वह आधे रागरूप समुद्र को सुखा डालता है तथा संयमरूप वृक्ष को पुष्ट करता हुआ वह व्यवहार रूप लता को भी वृद्धिंगत करता है । इस तरह दिन में अतिरिक्त स्त्रीसेवन न करने से वह वैभव की वृद्धि के साथ योग्यता को भी बढाता है ॥ १५ ॥

दिन में अनुराग बुद्धि से युवती स्त्री के साथ हर्षित होकर संभाषण करनेवाले मनुष्य की अन्यजन हँसी मजाक किया करते हैं और दूसरे कितने ही जन उसकी निन्दा भी करते हैं । अतः व्रती पुरुष के लिये दिन में मैथुनसेवन छोडना चाहिये ॥ १६ ॥

१३) 1 चन्द्रबिम्ब. 2 D दिवस. 3 दिवाब्रह्मचारिभिः । १४) 1 P°रागरयः. 2 हठात्. 3 सूर्यस्य । १५) 1 °निजकार्यनियोज्यतां च । १६) 1 D मैथुनम्. 2 त्यजतु ।

1368) पूर्वोदिष्टव्रतगणशिरो ऽलंकरोत्येतया यः
सो ऽह्नि ब्रह्मव्रतगुणवतां वर्तते मूर्ध्नि धीमान् ।
पूर्वैरेतां विरलविरलं पाति मध्यो यथोक्तैः
रक्षत्येतद्द्वितयमपि चेत्कर्हिचित्स्याल्लघीयान् ॥ १७

1369) स्वात्मोपलम्भसुखसंगपराङ्मुखस्य
कन्दर्पसर्पविषवेगविमोहितस्य ।
नारीनिषेवणपरायणमानवस्य
नो शीलसंयमगुणाः सविधे वसन्ति ॥ १८

1370) हेयादेयविचारणाविरहिता बुद्धिर्न धर्म्यं धुरं
धर्तुं यत्र सहा सुधाद्रवमुचो ऽगण्या गुरूणां गिरः ।
चेतो ऽनेकविकल्पजालगहने नैवैकतानं क्वचि-
द्रागः को ऽपि समुच्छलत्यविकलो रामाप्रसंगे नृणाम् ॥ १९

जो श्रावक पूर्व में निर्दिष्ट व्रतसमूह रूप शिर को इस प्रतिमा से विभूषित करता है, अर्थात् पूर्व सब प्रतिमाओं के साथ इस प्रतिमा का पालन करता है, वह बुद्धिमान् दिन में ब्रह्मचर्य का पालन करनेवाले मनुष्यों के अग्रभाग में स्थित होता है—वह दिवा मैथुन त्यागियों में श्रेष्ठ माना जाता है। और जो पूर्व प्रतिमाओं के साथ इस प्रतिमा का विरल विरल पालन करता है– कदाचित् पालन करता है, और कदाचित् नहीं भी पालन करता है – वह मध्यम दिवा-मैथुन त्यागी कहा गया है। इन के अतिरिक्त जो इन दोनों का भी कदाचित् रक्षण करता है वह अतिशय हीन माना गया है ॥ १७ ॥

जो मानव आत्मस्वरूप की प्राप्तिरूप सुख से दूर रहता हुआ कामरूपी सर्प के विष-वेग से मूर्च्छित होकर स्त्रीसंभोग में तत्पर होता है उसके पास शील संयम आदि कोई भी गुण नहीं रहते हैं ॥ १८ ॥

स्त्री संभोग में मनुष्यों के कोई ऐसा पूर्ण रागभाव उत्पन्न होता है जिससे उनकी हेय—उपादेय के विचार से रहित बुद्धि धर्म की धुरा के धारण करने में असमर्थ होती है – वह धर्म की ओरसे विमुख रहती है, अमृतरूप रस को छोडनेवाली गुरुजनों की वाणी की कोई गणना नहीं की जाती है—उसकी अवहेलना की जाती है, तथा अनेक विकल्पों के समूहरूप वन में विचरता हुआ चित्त कहीं – शुभ क्रियाओं में –एकाग्रता को नहीं प्राप्त होता है ॥ १९ ॥

१७) 1 पूर्वकथित. 2 दिवसे. 3 D मस्तके. 4 P°रक्षत्येत । १८) 1 D निकटे । १९) 1 P°सुहा-सुधा° ।

1371) उक्तं च-

पापिष्ठैर्जगतीविधीतमभितः[2] प्रज्वाल्य रागानलं
क्रुद्धैरिन्द्रियलुब्धकैर्भयपदैः संत्रासिताः सर्वतः।
हन्तैते शरणैषिणो जनमृगाः स्त्रीच्छद्मना निर्मितं
घातस्थानमुपाश्रयन्ति मदनव्याधाधिपस्याकुलाः ॥ १९*१

1372) हासो ऽस्थिसंदर्शनमक्षियुग्ममत्युज्ज्वलं तत्कलुषं वसायाः।
कुचादि पीनं पिशितं घनं तत्स्थानं रतेः किं नरकं न योषित् ॥ २०

1373) यदत्र लोके ऽथ परे[1] नराणामुत्पद्यते दुःखमसह्यवेगम्।
विकासिनीलोत्पलचारुनेत्रास्त्यक्त्वा स्त्रियस्तस्य[2] न हेतुरन्यः ॥ २१

कहा भी है-

अतिशय पापी, दुष्ट और भय के स्थानस्वरूप इन्द्रियरूप व्याधों के द्वारा संसाररूप मृगादि पशुओं के निवासस्थान के चारों ओर रागरूप आग को जलाकर सब ओर से पीडा को प्राप्त कराये गये ये प्राणिरूप मृग खेद है कि रक्षा की अभिलाषा से व्याकुल हो कर स्त्री के मिषसे बनाये गये कामदेवरूप व्याधराज के मारणस्थान का आश्रय लेते हैं ॥१९*१॥

स्त्रियों का हास्य मानो हड्डियों का दर्शन है, उनकी अतिशय निर्मल ऐसी दोनों आँखें मेदासे कलुषित–मलिन–है, तथा पुष्ट स्तन आदि अवयव सघन दृढ मांस के पिंड हैं। तथा जो संभोग का स्थान अर्थात् योनि है वह प्राणियों का घात करने का स्थान है। इसीलिये अनुराग की स्थानभूत स्त्री क्या साक्षात् नरक नहीं है? अर्थात् वह प्राणी को साक्षात् नरक में ले जानेवाली है ॥ २०॥

इस लोक में अथवा परलोक में जो मनुष्यों को असह्य वेगवाला दुःख उत्पन्न होता है उसका कारण विकसित नील कमल के समान सुन्दर नेत्रोंवाली स्त्रियाँ ही हैं, उन को छोडकर अन्य कोई भी दुःख का कारण नहीं है ॥२१॥

१९*१) 1 D विनाश [निवास] for विधीत°. 2 D समन्तात्। २०) 1 P°मप्युज्ज्वलं। २१) 1 D परलोके. 2 दुःखस्य।

1374) तृप्तिर्न यत्र[1] समभूदमरेश्वराणां
वाञ्छातिरिक्तविषयोपरि लोलितानाम् ।
वार्तैव का परजनेष्विति नातिसंगा-
दाहारवद्युवतिरप्यनुभूय हेया ॥ २२

1375) चारित्राद्भुतरत्नचोरणपटुर्मायालताजन्मभू-
र्वैकल्यं वचसामगोचरतरं[1] धर्मार्थयोस्तन्वती ।
दृष्ट्वा गौरिव शाद्वलं[2] कमपि या स्वच्छन्दवाञ्छा नरं
रामा सा कथमस्तु हन्त महतां[3] विश्रामभूश्चेतसाम् ॥ २३

1376) मानिनीमदनसंभवं सदा दोषडम्बरमवेत्य पण्डितः ।
सर्वतो ऽपि च सुचित्तमात्मनश्चेदभीप्सति जहातु[1] कामिनीम्[2] ॥ २४

इच्छा से भी अधिक इन्द्रियविषयों में लोलुपता को प्राप्त इन्द्रों को भी जहाँ — जिस स्त्री के विषय में— तृप्ति नहीं होती है वहाँ फिर अन्य जनों के विषय में क्या कहा जाय? अर्थात् तब वैसी अवस्था में उनसे अतिशय तुच्छ सुखसामग्री को प्राप्त कर सकने वाले अन्य मनुष्यादिकों को उससे तृप्ति हो ही नहीं सकती है । इसीलिये उसका आहार के समान उपभोग करके उसे छोड देना चाहिये, अतिशय आसक्ति से उसका उपभोग करना योग्य नहीं है।।२२।।

जो स्त्री पुरुषों के चरित्ररूप अद्भुत रत्न का अपहरण करने में चतुर, मायारूप लता की जन्मभूमि, धर्म और अर्थ पुरुषार्थ की अनिर्वचनीय विकलता को विस्तृत करनेवाली तथा गाय जैसे घास से हरेभरे प्रदेश को देखकर स्वच्छन्दतापूर्वक उसकी इच्छा किया करती है, उसी प्रकार जो स्वेच्छाचारितापूर्वक उसकी इच्छा करती है — उसके विषय में आसक्त होती है— ऐसी स्त्री महापुरुषों के चित्त का विश्रामस्थान कैसे हो सकती है ? अर्थात् महापुरुष ऐसी स्त्री का कभी विश्वास नहीं किया करते हैं ॥२३॥

विद्वान् यदि अपने चित्त की पूर्ण शुद्धि को चाहता है तो उसे स्त्री संबन्धी कामभोग से उत्पन्न हुए दोषों के आडम्बर को जानकर उस स्त्री का त्याग करना चाहिये ॥ २४ ॥

२२) 1 स्त्रीषु । २३) 1 P°चरचरं. 2 शाद्वलं हरितं स्थानं घनादि शाद्वलं पुरुषं च. 3 विवेकिजनानाम् । २४) 1 त्यजतु. 2 P°कामिनोः ।

1377) जनयातितर.[1] चिन्ता यासां दशा दश कामिना-
मखिलजगतां याश्चैकैका प्रवृद्धिमती सती ।
स्थगननिपुणाः श्यामाङ्गीस्ता विचारपराः सदा
वितिमिरमहादृष्ट्यन्धत्वमदा इति मुञ्चतु ॥ २५

1378) अहं रामा कामानुभवनपरिप्राप्तधृतिकः
सदा निर्वेदोत्थाखिलविषयवैतृष्ण्यमतिकः ।
इदानीं तिष्ठन्त्यो ऽपि हि युवतयो मे ऽन्यनृसमा
इतीत्थं[1] मत्वा यस्त्यजति रमणीर्ब्रह्मविदसौ ॥ २६

1379) हरिणच्छीवग्गाओ कस्स वि पुण सव्वदो[1] विरदी ।
इय सुत्तट्ठं पालउ कालं भावं तु वयसत्ती ॥ २६*१

जिन स्त्रियों को चिन्ता – तद्विषयक विचार कामी पुरुषों के उन दस कामावस्थाओ को उत्पन्न करती है जिनमें से एक एक अवस्था भी वृद्धिगत हो कर समस्त जगत् को व्याप्त करती है । ये स्त्रियाँ सदा दूसरों के दोष ढकने में निपुण हो कर तिमिर रोग के बिना ही दृष्टि में अतिशय अन्धपने को उत्पन्न करती हैं । ऐसा विचार कर के विद्वानों को उनका सदा त्याग करना चाहिये ॥ २५ ॥

मैं स्त्रियों के साथ कामभोगविषयक अनुभव से धैर्य को प्राप्त कर चुका हूँ – उसकी ओर से सन्तुष्ट हो चुका हूँ । इस समय अन्य मनुष्यों के समान मेरे सामने उन युवती स्त्रियों के स्थित रहने पर भी मेरी बुद्धि निरन्तर वैराग्य से- उत्पन्न विषय तृष्णा से- कामभोगविषयक अनासक्ति से-परिपूर्ण हो चुकी है । इस प्रकार से विचार कर के जो स्त्रियों का परित्याग किया करता है उसे ब्रह्मवित्-आत्मज्ञ या ब्रह्मचर्य का ज्ञाता- जानना चाहिये ॥२६ ॥

हरिण के समान नेत्रोंवाली उन स्त्रियों की ओर से किसी विरले पुरुष को ही पूर्णतया वैराग्य प्राप्त होता है, ऐसा सूत्रार्थ समझकर काल, भाव और व्रत के सामर्थ्य की मार्गप्रतीक्षा करे। अर्थात् वैराग्य योग्य काल, परिणाम, वय और सामर्थ्य के प्राप्त होने पर स्त्री का त्याग करना चाहिये ॥ २६*१ ॥

२५) 1 D अतिशयेन । २६) 1 D अमुना प्रकारेण । २६*१) 1 P° सव्वदो हवे [हवे] वि° ।

1380) रक्षन्ति प्रतिमामिमां यदि समं पूर्वव्रतैर्निर्मलै-
स्ते स्युर्ब्रह्मचराग्रवर्तिन इति द्वन्द्वद्वयध्वंसिनः ।
एतान् पान्ति यथोदितान् यदि तदा मध्या व्रतैः प्राक्तनैः
किर्मीरैर्द्वितयं भवन्ति लघवो ये पालयन्ते तथा ॥ २७

1381) भोगोपभोगमूलः स्यादारम्भो गृहमेधिनाम् ।
भोगोपभोगा यैस्त्यक्ताः स्यात्तेषां स कुतस्तनः ॥ २८
1382) हिंसां त्रसानामपि सर्वथैव निरोद्धुमिच्छत्यसुखैकधात्रीम् ।
यः स्थावराणामपि दुर्निवारामारम्भमुज्झत्विति सोऽवबुध्य ॥ २९

1383) बाह्यारम्भे विनिहितमनाः स्यात्पराधीन[1] एव
तस्माद्धर्मं निजसमुचितं न स्मरेन्नापरं वा ।
धर्मारामस्मृतिविरहितः किं न तिर्यक्समानो
हिंस्रत्वं तत्कथमिव जने मित्रतां नानुरुन्ध्यात् ॥ ३०

यदि श्रावक निर्मल पूर्वव्रतों के साथ इस प्रतिमा का पालन करते हैं तो वे ब्रह्मचर्य पालनेवालों में अग्रगण्य होते हैं तथा (सुखदुःखरूप) दोनों द्वन्द्व को नष्ट करते हैं। यदि पूर्वोक्त व्रतों के साथ उक्त विधिसे वे इनका पालन करते हैं तो वे मध्यम ब्रह्मचारी होते हैं और जिनके ये दोनों कभी कभी होते हैं वे लघु ब्रह्मचारी होते हैं ॥२७॥

गृहस्थों के जो आरम्भ होता है, उसके मूलकारण भोग और उपभोग हैं। परन्तु जिन्होंने भोग और उपभोग को छोड दिया है उनके वह आरम्भ कहां से हो सकता है ॥२८॥

जो श्रावक एक मात्र दुःख को उत्पन्न करनेवाली त्रस जीवों की हिंसा के सर्वथा रोकनें की इच्छा करता है तथा जो दुर्निवार– जिसका रोकना अशक्य है– ऐसी स्थावर जीवों की भी हिंसा को रोकना चाहता है उसे बुद्धिपूर्वक आरम्भ का त्याग करना चाहिये ॥२९॥

जिसका मन बाहिरी आरम्भ में संलग्न है वह पराधीन ही है। इसी से वह न तो अपने समुचित धर्म का स्मरण कर सकता है। और न अन्य भी कर्तव्य कार्य का स्मरण कर सकता है। इस प्रकार से जब वह धर्मरूप उद्यान के स्मरण से रहित होता है तब वह क्या पशुतुल्य नहीं होगा? (अवश्य होगा, क्योंकि मनुष्य और पशु में यही तो भेद है कि मनुष्य विशिष्ट ज्ञानी होने से धर्माचरण में उद्यत होता है, परन्तु विवेकशून्य होने से पशु उस में

२७) 1 D भवेयुः. 2 मिश्रितैः। २८) 1 PD आरम्भः। ३०) 1 P स्यात्स्वरा°।

1384) आरब्धवस्तुनि जनो हि यथाकथंचित्
प्रायो ऽर्थयत्नकरणीयशतैः समाप्तिम् ।
रात्रिं न वेत्ति न दिनं लभते न निद्रां
भुङ्क्ते न भोजनमनेकविधं मनोज्ञम् ॥ ३१

1385) बाह्यारम्भप्रसृतधिषणो वर्तते ऽतिक्रमे ऽपि
स्वज्ञातीनां त्रिभुवनहितप्रापिणां वा गुरूणाम् ।
धर्म्या धूलीरिव विगणयन् सुक्रिया दुःखलभ्या
इत्यारम्भे कुश इव कियद्दोषतार्णं ब्रवीमि ॥ ३२

1386) चिरं तु परिलालिता अपि गुणेषु संयोजिताः
कलत्रतनयादयस्त इह चारभन्ते तथा ।
यथाहमधुनार्थिषु प्रवितरामि भुञ्जे स्वयं
उदासवदवस्थितो भवति नूनमारम्भहा ॥ ३३

उद्यत नहीं होता है । और जब ऐसी अवस्था है तब भला उसका वह हिंसक स्वभाव प्राणी के विषय में मित्रता को कैसे नहीं रोकेगा ? अवश्य वह मैत्रीभावना से शून्य होगा ॥३०॥

जिस कार्य का प्रारम्भ किया गया है उसे मनुष्य प्रायः सैंकडों यत्न कर के समाप्त करना चाहता है । उसमें न वह रात और दिन को गिनता है, न निद्रा को प्राप्त होता है और न उस कार्य की समाप्ति होने तक वह अनेक प्रकार के मनोज्ञ आहार को भी ग्रहण करता है ॥३१॥

जिसकी बुद्धि बाहिरी आरम्भ कार्य में संलग्न है वह अपने जातिबन्धुओं और तीनों लोकों के हित को प्राप्त करने वाले गुरुजनोंका भी उल्लंघन करता है – उनका तिरस्कार करता है । वह दुर्लभ धर्मयुक्त उत्तम आचरणों को धूलि के समान तुच्छ मानता है इस लिये कुश के समान आरम्भ में मैं कितने दोषयुक्त तृण कहूँ ॥३२॥

मैंने पत्नी, पुत्र आदिकों को दीर्घकाल तक पालपोस कर गुणों में भी तत्पर किया है अर्थात्–सद्गुणी बनाया है । अब वे बाह्य आरम्भ करते हैं–धनादि कमाते हैं, इसलिये मैं अब याचकों को धन दूँगा तथा स्वयं उदासीन भाव से स्थित हो कर भोजन करूँगा । ऐसे विचार से उदासीन के समान स्थित होता हुआ आरंभत्यागी बनता है ॥३३॥

---

३१) 1 PD'प्रायार्थयत्न । ३२) 1 धर्मयुक्ताः. 2 D°बुस इव । ३३) 1 D प्रतिपालिता. 2 D ददामि. 3 आरम्भरहितः ।

1387) अनारम्भात्कायः प्रचलति नवोच्छृङ्खलतया
ततश्चित्तं चित्रां रचयति न वा बाह्यसुरतिम् ।
वचो ऽविन्यासो ऽतो विरमति विकल्पद्रुमवधा–
त्त्रिगुप्तः[2] स्यादित्थं मुनिरिव जनो यत्नरहितः ॥ ३४

1388) यो ऽनारम्भतनुत्रसंवृ[1]ततनुर्नारम्भदोषेषुभिर्[2]–
र्व्याविध्येत कथंचनाप्यतिशुभारम्भे ऽन्यदीये समुत्[3] ।
नानागन्धसमागमे ऽपि न यथा कश्चिन्मणिर्वास्यते
हेयादेयविशेषवर्जितनिजोद्गन्धस्वभावस्थितः ॥ ३५

1389) पूतामेतामगतमलैः पान्ति पूर्वैर्वरेण्या
मध्याः शुद्धां किमपि शबलैर्[1]लेशतस्तैर्व्रतैर्ये[2] ।
ये वा युग्मं पुनरिदमिहाशेषसंपल्लतानां
कन्दं मन्दं शबलमतयः स्युस्तदा ते कनिष्ठाः ॥ ३६

आरम्भ से रहित हो जाने के कारण शरीर उच्छृंखलतापूर्ण प्रवृत्ति नहीं करता है, इस से मन बाह्य पदार्थों के विषय में जो अनेक प्रकार के अनुराग की रचना करता था वह नष्ट हो जाती है। और इसीलिये विकल्परूप वृक्ष के निर्मूल हो जाने से वचन की रचना भी स्वयं समाप्त हो जाती है। इस प्रकार श्रावक तीनों गुप्तियों से संपन्न हो कर मुनि के समान सब प्रकार से प्रयत्नरहित हो जाता है ॥३४॥

जिसका कि शरीर आरंभत्यागरूप कवच से ढँका हुआ है वह आरम्भजनित दोषरूप बाणों से किसी प्रकार भी नहीं वेधा जाता है, वह दूसरे के अतिशय शुभ आरम्भ कार्य में हर्ष का अनुभव करता है। जिस प्रकार कोई मणि अनेक द्रव्यों का समागम होने पर भी उन से सुवासित नहीं होता है उसी प्रकार वह आरम्भरहित गृहस्थ हेय उपादेय के भेद से रहित होकर अपने उत्कृष्ट गन्धस्वभाव में अवस्थित होता हुआ अनेक गन्धों का समागम होने पर भी उन से सुवासित नहीं होता है—आरम्भजनित दोषों से वह दूर ही रहता है ॥ ३५ ॥

उत्कृष्ट आरम्भत्यागी निर्मल पूर्वव्रतों के साथ इस पवित्र प्रतिमा का पालन करते है जो कुछ मलिन उन पूर्वव्रतों के साथ इस शुद्ध प्रतिमा का पालन करते हैं, वे मध्यम आरम्भत्यागी माने जाते हैं। और जो मलिनमति यहाँ समस्त सम्पत्ति रूप लताओं के इस युगल कन्द को मन्दता से पालते हैं, वे हीन आरम्भत्यागी होते हैं ॥३६॥

---

३४) 1 इत्यर्थः. 2 P°द्रुमघातृगुप्तः° । ३५) 1 कवच. 2 बाणैः. 3PD सहर्षः । ३६) 1 मिश्रितैः. 2 P°व्रतैर्वा ।

1390) भोगोपभोगास्त्यजिता हि दारा द्रव्याण्यपास्तानि बहिर्भवानि ।
विमुञ्चता भाण्डमिवेह शुल्कदानं ततस्तस्य परिग्रहस्त्वम् ॥ ३७

1391) द्वयं[1] त्यजन्नेतदथान्तरङ्गाननेकधा मन्दयते स संगान्[2] ।
अथास्ततां यान्ति यतः स्वतोऽन्ये मृधाहते[3]ऽधीश इवान्ययोधाः ॥ ३८

1392) अन्वर्थमेते निगदन्ति शब्दं संगा नृणां संजनकाल[1] एव ।
स्वभावतो गत्वरतां[2] दधाना नगापगातोयरयं[3] विजित्य ॥ ३९

1393) तदुक्तम्–
उद्भूताः[1] प्रथयन्ति मोहमसमं नाशे[2] महान्तं नृणां
संतापं जनयन्त्युपार्जनविधौ क्लेशं प्रयच्छन्ति[3] च ।
एता[4] नीलपयोदगर्भ[5]विलसद्विद्युल्लताचञ्चलाः
काले कुत्र भवन्ति हन्त कथय क्षेमावहाः संपदः[6] ॥ ३९*१

जिस प्रकार से जो भाण्ड–पूँजी (धन सम्पत्ति) का परित्याग कर देता है उसके उससे संबद्ध शुल्क — कर (टैक्स) – का त्याग स्वयमेव हो जाता है, उसी प्रकार जो भोग और उपभोगरूप वस्तुओं का परित्याग कर चुका है उसके स्त्री और अन्य बाह्य पदार्थों का परित्याग स्वयमेव हो जाता है । इसीलिये तब उस के एक आत्मा मात्र परिग्रह रह जाता है ।। ३७ ॥

इन दोनों – भोग और उपभोग पदार्थों–का त्याग करनेवाला गृहस्थ क्रोध-मानादिरूप अन्तरंग अनेक प्रकार के परिग्रहों को मंद (अप्रधान) कर देता है । जैसे-युद्ध में सेनापति के मारे जाने पर अन्य योद्धागण स्वयं नाश को प्राप्त होते हैं — मारे जाते हैं या भाग जाते हैं – वैसे ही उक्त भोगोपभोग पदार्थों के दूर हो जाने पर अन्तरंग रागद्वेषादि भी हट जाते हैं ।।३८।।

पर्वत पर से बहनेवाली नदी के पानी के वेग को जीतकर मनुष्यों के संयोगकाल में ही स्वभाव से गमनशीलता को धारण करनेवाले ये 'संग – परिग्रह – ' संग ' शब्द की सार्थकता को बतलाते हैं । सम्–प्राप्त हो कर– गच्छन्ति – जो नष्ट होते हैं वे संग कहे जाते हैं, यह उस ' संग ' शब्द का निरुक्त्यर्थ है ।। ३९ ।। सो ही कहा गया है–

जो संपत्तियाँ प्रादुर्भूत हो कर मनुष्यों के असाधारण मोह को प्रथित करती हैं – उन्हें मुग्ध करती हैं, जो नष्ट हो कर उन के लिये अतिशय संताप को उत्पन्न करती हैं, तथा

---

३८) 1 D परिग्रहं सचेतनाचेतनं, बाह्याभ्यन्तरम्. 2 परिग्रहत्यागः. 3 PD संग्रामे । ३९) 1 D उत्पत्तिसमये, प्रश्रयकाले. 2 अनित्यतां. 3 वेगम् । ३९*१) 1 D उत्पद्यमानाः, संपद उत्पन्नाः. 2 विनाशे. 3 D ददति. 4 संपदः. 5 श्रावणमेघ. 6 D लक्ष्म्यः ।

1394) [illegible] कथमप्यवाप्य सुचिरात्संसारसारं पुन –
स्तत्यक्त्वैव यदि क्षितीश्वरवराः प्राप्ताः श्रियं शाश्वतीम् ।
त्वं प्रागेव परिग्रहान् परिहर त्याज्यान् गृहीत्वा पुन–
र्मा भूद्भौतिकमोदकव्यतिकरं संपाद्य हास्यास्पदम् ॥ ३९*२

1395) अनेकधा चिन्तनजल्पगुम्फनः परिग्रहव्याकुलिताशयो भवन् ।
अनर्थजातं स्वयमानयत्यसौ चलन्निवान्धैर्बधिरमूकभावैः ॥ ४०

जो उपार्जन के समय में उन्हें महान् क्लेश को देती हैं; खेद है कि वे नीले मेघों के मध्य में चमकती हुई बिजली के समान चंचल--देखते देखते ही नष्ट हो जानेवाली - सम्पत्तियाँ भला कौन से काल में कल्याणकारक होती हैं, यह हमें कहिये ॥३९*१॥

साम्राज्य – चक्रवर्तिपद – संसारका सार है । उसे दीर्घकाल तक प्राप्त कर के भी पृथ्वीपतियों में श्रेष्ठ माने जानेवाले चक्रवर्तियों ने उसका परित्याग कर के ही शाश्वती--अविनश्वर--मुक्तिलक्ष्मी को प्राप्त किया है । इसलिये हे भव्य ! तू ग्रहण करने के पूर्व ही उन का त्याग कर दे । इससे तू उन त्यागने योग्य परिग्रहों को फिरसे ग्रहण कर परिव्राजक साधु के मोदक के प्रस्ताव को संपादित कर के हँसी का पात्र नहीं बनेगा । (विशेष–भौतिक मोदक का वृत्त इस प्रकार है – एक परिव्राजक साधु को एक धनिक ने लड्डू दिया, परंतु वह उस की झोली में न पडकर मलिन स्थान में जा पडा । उसे साधु ने उठाकर अपनी झोली में डाल लिया । यह देख किसी मनुष्य ने कहा कि महाराज ! इस प्रकार मलिन स्थान में से लड्डू उठाना योग्य नहीं है । इसपर साधु ने उत्तर दिया कि मैं उसे अपने स्थान में ले जाकर पानी से धोकर अलग रखूंगा । साधु के इस उत्तर को सुनकर उस मनुष्य ने फिरसे कहा कि हे महात्मन् ! जब आप अपने स्थान में ले जाकर भी उसे छोडना ही चाहते हैं तो उसे यहाँ से उठाकर झोली में रखना हास्यास्पद है । सर्वश्रेष्ठ तो यही था कि उस घृणास्पद मोदक को ग्रहण ही नहीं किया जाता) ॥३९*२॥

जैसे अंधा, बहरा और गूंगा मनुष्य जहाँ भी जाता है, वहीं वह अनर्थोंमें पडता है वैसे ही परिग्रह में आसक्त हुआ मनुष्य उसी परिग्रह के विषय में चिन्तन करता है, उसी के विषय में बोलता है व मनोरथों की रचना करता है । इस से वह स्वयं ही अनर्थसमूह को जुटाता है ॥४०॥

४०) 1 बधिरः. 2 PD°विमूकमानवः, D अन्धबधिरमूकक: ।

1396) मूर्धाभिषिक्तां[1]श्च निजा[2]स्त्वनेकमलिम्लुचाद्यां[3]श्च बहुप्रकाराः ।
गृद्धाः[4] परेऽप्यर्थवतीव सिद्धं यत्रामिषं तत्र खगाः[5] पतन्ति ॥ ४१

1397) यं[1]त्रोपतप्तिमुपयाति गते न चात्मा
षट्कर्मवर्धनपरं न परिग्रहः स्वम् ।
यत्स्वास्थ्यते[2]रुपचयाय च तत्परं य-
न्मुञ्चन्नशेषमपरिग्रहगेहिधुर्यः ॥ ४२

1398) साक्षादुच्छ्वसतीव संयमतरुर्निर्भीततारोहती-
वोल्लासं व्रजतीव शान्तपदवी शुद्धिं दधातीव च ।
धर्मः शर्मकरः समस्तविषयव्यामुग्धता मूर्च्छती-
वासंगे लसतीव लाघवगुणः स्वायत्तता क्रीडति ॥ ४३

जिस के पास धन-परिग्रह-है उस के ऊपर मूर्धाभिषिक्त - राजा, कुटुंबीजन, अनेक चोर आदि तथा अन्य भी अनेक लोग लुब्ध हो कर टूट पडते हैं । सो ठीक है - जहाँ मांस होता है वहाँ गीध आदि पक्षी आकर गिरते ही हैं ॥४१॥

जिस स्वके-द्रव्य के— नष्ट हो जानेपर आत्मा संताप को प्राप्त नहीं होता है, जो श्रावक के छह आवश्यक कर्मोंको वृद्धिगत करनेवाला है, तथा जो आत्मा के स्वास्थ्य की वृद्धि का कारण है; उस द्रव्य को वस्तुतः परिग्रह नहीं समझना चाहिये । इससे भिन्न द्रव्य का जो परित्याग करता है वह परिग्रहत्यागी गृहस्थों में श्रेष्ठ समझा जाता है ॥४२॥

अपरिग्रह की दृढता हो जाने पर संयमवृक्ष मानो पल्लवित होता है, निर्भयपना मानो बढ जाता है, शान्ति मानो प्रमुदित होती है, सुखदायी धर्म मानो शुद्धि को धारण करता है, समस्त विषयों में उत्पन्न हुआ मोह दूर हो जाता है, लाघव (विनय) उत्पन्न होता है और स्वाधीनता क्रीडा करती है ।।४३॥

४१) 1 राजानः. 2 कुटुम्बादयः. 3 PD चौराद्याः. 4 D लम्पटाः भवन्ति. 5 D पक्षिणः । ४२) 1 D द्रव्ये. 2 D आत्मस्वस्थतावर्धनाय यत् तस्मात् परं यत् परिग्रहे अशेषं मुञ्चन् ।

1399) पूर्वव्रतानि [illegible]ने विभूषितानि
पात्येतया प्रतिमया य इहोत्तमो ऽसौ ।
मध्यो व्रतानि विशदानि कथंचिदेता-
मेतद्द्वयं शबलितं कथितः कनिष्ठः ॥ ४४

1400) पञ्च प्रथां[1] समनयन्तु सचित्तमुक्ति-
मुख्यां गृहाश्रमवतां प्रतिमां दुरापाम् ।
भोगोपभोगनियमानतिरिक्तदेहाः[2]
संभावयन्तु जयसेननुतां विमुक्तिम् ॥ ४५

इति धर्मरत्नाकरे शिक्षाव्रतान्तर्गतस-चित्तादि-पञ्चमप्रतिमाप्रपञ्चनः
सप्तदशमो (दशो) ऽवसरः ॥ १७ ॥

जो इस परिग्रहत्यागप्रतिमा से सुशोभित सब ही पूर्वोक्त व्रतों का पालन करता है वह यहाँ उत्तम परिग्रहत्यागी माना गया है । मध्यम परिग्रहत्यागी वह है जो कथंचित् इन व्रतों का पालन करता हुआ प्रकृत प्रतिमा का पालन करता है । तथा जिस के ये – पूर्वव्रत और यह प्रतिमा-दोनों सदोष होते हैं उसे जघन्य समझना चाहिये ॥ ४४ ॥

भोगोपभोग पदार्थों के नियम को धारण करनेवाले गृहस्थ जो सचित्त त्यागादि पाँच प्रतिमायें गृहाश्रमवालों के लिये दुर्लभ हैं, उनका निर्दोष रूपसे पालन करते हैं (अर्थात् सचित्त त्याग, दिवाब्रह्मचर्य, पूर्णब्रह्मचर्य आरम्भत्याग और परिग्रहत्याग इन पाँच प्रतिमाओं को वृद्धि-गत करते हैं), वे श्रावक जयसेन आचार्य के द्वारा प्रशंसित विमुक्तिका आदर करते हैं, अर्थात् वे मुक्ति को प्राप्त होते हैं ॥४५॥

इस प्रकार धर्मरत्नाकर में शिक्षाव्रत के अन्तर्गत सचित्तादि पाँच प्रतिमाओं का सवि-स्तर वर्णन करनेवाला सत्रहवाँ अवसर समाप्त हुआ ॥१७॥

---

४५) 1 प्रतिमाम्. 2 भोगोपभोगनियमादत्यक्तो [दनतिरिक्तो] देहो येषां ते भोगोपभोगानति-रिक्तदेहाः ।

[१८. अष्टादशोऽवसरः]

[उद्दिष्टान्तप्रतिमाप्रपञ्चनम्]

1401) यथाविधानं गुणिना प्रदेयं यथागमं कालमवेत्य देशम् ।
पात्राय दानं स्वपरोपकारसंपादकं नित्यमतन्द्रितेन ॥ १

1402) प्रतिग्रहोच्चासनपादपूजाप्रणामवाक्कायमनःप्रसादाः ।
विधाय[1] शुद्धिश्च[2] नवोपचाराः कार्या यतीनां गृहमेधिनेति ॥ २

1403) आगच्छत्पात्रमालोक्य वदान्यो[1] यत्र तत्र यत् ।
जिनवत्प्रतिगृह्णाति स प्रतिग्रह उच्यते ॥ ३

गुणी श्रावक को आगम के अनुसार देश और काल को देखकर आलस्य से रहित हो विधिपूर्वक सदा पात्र के लिये दान देना चाहिये । यह दान स्व – दाता – और पात्र दोनों का ही उपकार करने वाला है ॥ १ ॥

